422

दानचंद्रिका।

	Dāna Chandrikā		Title
		Diwākara Kāla	Author
			Editor
			Year, Vols.
			Publisher
422			Remarks

॥श्रीगणेशायनमः॥ ॥श्रीआर्यादुर्गायैनमः॥ ॥प्रणम्यमातरंगंगांभैरवंवनशंकरी
॥महादेवाख्यपितरंश्रौतस्मार्तविशारदं॥दिवाकरेयासुधियासारमुध्धृत्यशास्त्र
तः॥शिष्टानांतन्यतेतुष्ट्यैदानसंक्षेपचंद्रिका॥तत्रपरस्वत्वोत्पत्त्यंतोद्रव्यत्यागोदानं॥
देवलः॥अर्थानामुदितेपात्रेश्रद्धयाप्रतिपादनं॥दानमित्यभिनिर्दिष्टंव्याख्यानंतस्य
कथ्यते॥तत्रदानंत्रिविधोक्तं॥गीतासु॥दातव्यमितियद्दानंदीयतेनोपकारिणे॥
देशेकालेचपात्रेचतद्दानंसात्विकंस्मृतं॥यत्तुप्रत्युपकारार्थंफलमुद्दिश्यवापुनः॥
दीयतेचपरिक्लिष्टंतद्राजसमुदाहृतं॥अदेशकालेयद्दानमपात्रेभ्यश्चदीयते॥अ
सत्कृतमवज्ञातंतत्तामसमुदाहृतं॥गारुडे॥अर्हतेयत्स्ववर्णादिदानंतत्कालिकंस्मृतं

तं॥तुलादानानि॥आर्त्तानामन्नयंदत्तमेतद्दैवाचिकंस्मृतं॥विद्यामादायजप्यैस्तद्दानं
मानसकंद्विजाः॥इतिअथपात्रं॥याज्ञवल्क्यः॥नविद्ययाकेवलयातपसावापिपात्र
ता॥यत्रवृत्तमिमेचोभेतद्धिपात्रंप्रचक्षतइति॥भविष्ये॥किंचिद्वेदमयंपात्रंकिंचित्पा
त्रंतपोमयं॥पात्राणामुत्तमंपात्रंशूद्रान्नंयस्यनोदरइति॥व्यासः॥प्रथमंतुगुरोर्दानं
दत्वाश्रेष्ठमनुक्रमात्॥ततोन्येषांचविप्राणांदद्यात्पात्रानुरूपतइति॥भविष्यपुराणे
॥संनिधानस्थितान्विप्रान्दौहित्रंविट्पतिंतथा॥भागिनेयंविशेषेणतथाबंधुगृह
गतान्॥नातिक्रामेन्नरस्त्वेतान्सुमूर्खानपिगोपते॥अतिक्रम्यमहारौद्रंरौरवंनरकंव्र
जेत्॥दक्षः॥समम्ब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवे॥सहस्रगुणमाचार्येत्वनंतंवे

दपारगे॥ अथब्राह्मणलक्षणमाह॥ व्यासः॥ ब्राह्मबीजसमुत्पन्नोमंत्रसंस्कारवर्जि
तः॥ जातिमात्रोपजीवीचभवेद्ब्राह्मणःसतु॥ ब्राह्मणब्रुवलक्षणमाह॥ तत्रैवगर्भाधा
नादिभिर्युक्तस्तथोपनयनेनच॥ नकर्मविन्नचाधीतेसभवेद्ब्राह्मणब्रुवः॥ अथद्रव्यवि
भागः॥ शिवधर्मे॥ तस्मात्त्रिभागंवित्तस्यजीवनायप्रकल्पयेत्॥ भागद्वयंतुधर्मार्थंम
नित्यंजीवितंयतः॥ वित्तस्यभागपंचकंकृत्वाभागत्रयंजीवनार्थं॥ भागद्वयंदानार्थं
॥ इतिहेमाद्रिः॥ अथअयाच्यदानानिस्कांदे॥ अजिनंभद्रशय्यांचमेषींचोभयतोमुखी
ंकुरुक्षेत्रेचगृह्णानोभ्रूणहापुरुषोभवेत्॥ मनुः॥ हिरण्यंभूमिमश्वंगामन्नंवासस्ति
लान्घृतं॥ अविद्वान्प्रतिगृह्णानोभस्मीभवतिकाष्ठवत्॥ अविद्वान्नामविद्यातपो

भ्यांहीनेनेयात्तमिति॥ अथदानकालः॥ वाराहे॥ दर्शेशतगुणंदानंशतघ्नंतुदिनक्ष
ये॥ शतघ्नंतत्तुसंक्रांतौशतघ्नंविषुवेततः॥ युगादौतच्छतगुणंअयनेतच्छताहतं॥ सो
मग्रहेतच्छतघ्नंतच्छतघ्नंरवेर्ग्रहे॥ तच्छतघ्नंव्यतीपातेदानंवेदविदोविदुः॥ विष्णुधर्मो
त्तरे॥ वैशाखीकार्त्तिकीमाघीपूर्णिमातुमहाफला॥ पौर्णिमासीषुसर्वासुमासर्क्षसहि
तासुच॥ दत्तानामिहदानानांफलंशतगुणंभवेदिति॥ अथपुण्यदेशाः॥ मनुः॥
दृषद्वत्यसरस्वत्योर्देवनद्योर्यदंतरं॥ तद्देवनिर्मितंदेशंब्रह्मावर्तंप्रचक्षते॥ नारदः॥ पु
ण्यदेशेषुसर्वेषुगृहेदेवालयादिषु॥ यत्रसाधर्संपत्तिस्तत्रदानंसमाचरेत्॥ भविष्य
पुराणे॥ वाराणसीकुरुक्षेत्रंप्रयागंपुष्करंतथा॥ गोकर्णंनैमिषारण्यंसेतुःश्रीपर्व
तंतथा॥ महाकालंतथारंगमेतान्तु॰ पुण्यतमान्विदुः॥ पाद्मे॥ लिंगंवाप्रतिमावा

पिद्दूपतेयत्रकुत्रचित्॥तत्सर्वंपुण्यतांयातीदानेषुचमहाफलमिति॥षदानमतिप्र
शस्तमितिहेमाद्रिः॥अथतीर्थेप्रतिग्रहनिषेधः॥पाद्मे॥नतीर्थेप्रतिगृह्णीयात्प्रा
णैःकंठगतैरपिइति॥तीर्थतीरेक्षेत्रेच॥गंगाकृष्णागोदावर्यातीरमाहविष्णुः॥गंगा
गोदावरीकृष्णातीरमाकूर्महर्षयः॥उत्तरेनवगव्यूतिर्दक्षिणेयोजनत्रयमिति॥नविषे
॥तीरात्गव्यूतिमात्रंतुपरितःक्षेत्रमुच्यतइति॥गंगायांतुतीरेपितन्मात्र्यमित्यर्थः॥ब्रा
ह्मे॥प्रवाहमवधिंकृत्वायावद्धस्तचतुष्टयं॥अत्रनप्रतिगृह्णीयात्प्राणैःकंठगतैरपि
इति॥प्रवाहोगर्भःस्नानधर्मे॥भाद्रशुक्लचतुर्दश्यांयावदाक्रमतेजलं॥तावद्गर्भंविजा
नीयात्तदूर्ध्वंतीरमुच्यतइति॥गर्भेप्रतिग्रहनिषेधः॥प्रसिद्धनदीषु॥गंडक्यादिषुतीरे
पिनिषेधः॥तदुक्तंस्नानधर्मेनग्राह्यंतीर्थमिच्छतेतिवचनात्॥अत्रतापदितीर्थे

पियात्रां॥अथचेत्प्रतिगृह्णीयाद्ब्राह्मणोवृत्तिकर्षितः॥दशांशमार्जितंदद्यादेवंधर्मो
नहीयतइतिपाद्मात्॥अथदानप्रकारः॥वाराहे॥सुस्नातःसम्यगाचांतःकृतसंध्यादि
कक्रियः॥कामक्रोधविहीनश्चपाखंडस्पर्शविवर्जितः॥दद्यादितिविशेषः॥कात्यायनः॥
कुशेषुपरिनिविष्टेनतथायज्ञोपवीतिना॥देयंप्रतिग्राह्यंतव्यमन्यथाविफलंभवेदिति॥
गौतमः॥अंतर्जानुकरंकृत्वासकुशंसतिलोदकं॥फलान्यपिचसंधायप्रदद्यात्श्रद्धा
यान्वितः॥नामगोत्रंसमुच्चार्यप्राङ्मुखोदेयकीर्तनात्॥उदङ्मुखायविप्रायदत्वातंस्व
स्तिकीर्तयेत्॥संदेवंतावदेककीर्तनानंतरंदत्वेत्यर्थः॥अर्घ्यंप्रतिगृह्णीतकृत्स्नंतत्रैव॥
ओंकारमुच्चरन्प्राज्ञोद्रविणंसकुशोदकं॥गृह्णीयाद्दक्षिणेहस्तेतदंतेस्वस्तिकीर्तये
त्॥प्रतिगृह्णीतासावित्तंसर्वत्रैवानुकीर्तयेत्॥सावित्रंदेवस्यत्वेति॥ततःकीर्त

दा॰चं॰का॰
४

येत्वार्धं द्रव्येण द्रव्यदेवतां॥ समापयेत्ततः पश्चात्कामस्कृत्वा प्रतिग्रहं॥ यथावारुणकद्व
द्वंकस्माअदादिति मंत्रं पठित्वेत्यर्थः॥ आदित्यपुराणे॥ प्रतिग्रहं पठेदुच्चैः प्रतिगृह्य द्वि
जोत्तमात्॥ मंत्रं पठेत्तु राजन्याद्वैश्यात्तु च तथा विदि॥ मनसा च तथा शूद्रे स्वस्तिवाचन
मेव च॥ ओंकारं ब्राह्मणे कुर्यान्निरोंकारं महीपतौ॥ उपांशु च तथा वैश्ये मनसा शूद्रजे
तथेति कौमतिः॥ पुनस्तत्रैव॥ प्रतिग्रहस्य धर्मो यो न जानाति द्विजो विधिं॥ द्रव्यस्तेन्यसमा
युक्तो नरकं प्रतिपद्यत इति॥ तथा॥ विधिं तु काम्यं विज्ञाय ब्राह्मणस्तु प्रतिग्रहे॥ दात्रा सह
तरत्येव महादुर्गाध्यमो॥ धर्मवृद्रतियाज्ञवल्क्योक्तेश्च॥ अथ द्रव्यमानं॥ याज्ञवल्क्यः॥ जाल
सूर्यमरीचिस्थं त्रसरेणु रजस्मृतं॥ तेऽष्टौ लिक्षास्तु तास्तिस्रो राजसर्षप उच्यते॥ गौरस्तु ते त्र
यः षट् ते यवो मध्यश्च ते त्रयः॥ कृष्णलः पंच ते माषस्ते सुवर्णस्तु षोडश॥ पलं सुव ४

र्णाश्चत्वारः पंच वा परिकीर्तितं॥ द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते॥ शतमानं तु दशभि
र्धरणैः पलमेव तु॥ निष्कं सुवर्णाश्चत्वार इति हेमाद्रिः॥ ॥ अथ धान्यमानं॥ तत्र विष्णुः॥ प
लद्वयं तु प्रसृतं द्विगुणं कुडवं मतं॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः॥ आ
ढकः॥ आढकैस्तैश्चतुर्भिश्च द्रोणस्तु कथितो बुधैः॥ द्रोणैः षोडशभिः॥ खार्यो विंशत्या कु
म्भ उच्यते॥ कुंभैस्तैर्दशभिर्वाहो धान्यमानं प्रकीर्तितमिति॥ ॥ अथ दक्षिणापरिमाणमाह
व्यासः॥ सुवर्णं परमं दानं सुवर्णं दक्षिणा परा॥ सर्वेषामेव दानानां सुवर्णं दक्षिणेष्यते॥
अदक्षिणं तु यद्दानं तत्सर्वं निःफलं भवेत्॥ परेत्यके पुरुषोहारोपयिकं तंदुलादिकमपि
दक्षिणेति हेमाद्रिः॥ तथा॥ देयद्रव्यतृतीयांशं दक्षिणां परिकल्पयेत्॥ अनुक्तदक्षिणाने दश
शं वापि शक्तितः॥ तत्र विष्णुः॥ ज्ञेयं निष्क्रयतं पार्थदाने फविधिरुत्तमः॥ मध्यमस्तु तदर्धं

नतदर्धेनाधमः स्मृतः॥ मेष्यां च कालपुरुषे तथान्येषु महत्स्वपि च॥ एवं वृद्धेरथे जे च धेनोः कृ
ष्णाजिनस्य च॥ अजराकास्यापि क्रमोयं पंचसौवर्णिको विधिरिति॥ जपाभिषेकमुदाहृत्य लि
ङ्गपुराणे॥ अष्टषष्टिपलोन्मानाद्याद्दक्षिणां गुरोः॥ होतृणां चैव सर्वेषां त्रिंशत्पलमुदाहृतं॥
तदर्धं जापकानां च द्वारपालास्तदर्धकं॥ एतेन सर्वत्र गुरोरर्धमृत्विजां तदर्धं जापकानां तदर्धं
द्वारपालानामिति हेमाद्रौ॥ दक्षिणाविनयो वक्तव्यः॥ ॥ अथ द्रव्यदेवता विष्णुधर्मोत्तरे॥
अन्नपेयं सर्वदैवत्यं भूमेर्वै विष्णुदेवता॥ कन्या दासस्तथा दासी प्राजापत्याः प्रकीर्तिताः॥ प्रजा
पत्यो गजः प्रोक्तः स्करंगो यमदैवतः॥ तथा चैकशफं सर्वं कथितं यमदैवतं॥ महिषश्च तथा
याम्य उष्ट्रो वै निरृतो भवेत्॥ रौद्री धेनुर्विनिर्दिष्टा छागमाग्नेयमादिशेत्॥ मेषं तु वारुणं वि
द्याद्वाराहं वैष्णवं तथा॥ आरण्या ये रवाः सर्वे कथिता वायुदेवताः॥ जलाशयानि सर्वा ५

णि वारिधीनां कमंडलुं॥ कुंभं च करकं चैव वारुणानि निबोधत॥ समुद्रजानि रत्नानि वारुणानि ति
द्विजोत्तम॥ आग्नेयं कनकं प्रोक्तं सर्वलोहानि चाप्यथ॥ प्राजापत्यानि सस्यानि पक्वान्नमपि च द्वि
जाद्गेयास्तु सर्वगंधांश्च गांधर्वा वै विचक्षणाः॥ बार्हस्पत्यं स्मृतं वासः सौम्या ज्ञेया रसास्तथा॥
पक्षिणश्च तथा सर्वे वायव्याः परिकीर्तिताः॥ विद्या ब्राह्मी विनिर्दिष्टा विद्योपकरणानि च॥ सारस्व
तानि ज्ञेयानि पुस्तकादीनि पंडितैः॥ सर्वेषां शिल्पानां द्रव्यं विश्वकर्मा तु देवता॥ द्रुमाणामथ पुष्पा
णां शाकानां हरितके तथा॥ फलानामथ सर्वेषां तथा ज्ञेया वनस्पतिः॥ मत्स्यमांसे विनिर्दिष्टे प्राजाप
त्ये तथैव च॥ छत्रं कृष्णाजिनं शय्यां रथमासनमेव च॥ उपानहौ तथा यानं यच्चान्यत्प्राणिवर्जितं
॥ सर्वं चांगिरसत्वेन प्रतिगृह्णीत मानसः॥ युद्धोपयोगि यत्सर्वमस्त्रं चर्म ध्वजादिकं॥ तत्सोपक
रणं सर्वं विज्ञेयं सर्वदैवतं॥ गृहं तु सर्वदैवत्यं प्रदत्तं तु द्विजोत्तमाः॥ विज्ञेयं विष्णुदैवत्यं सर्वं वा दि

दा॰ चं॰ का॰
६

जमस्त्वमेदृति॥ प्रतिग्रहस्थानानितु गृह्यपरिशिष्टे॥ प्रतिगृहीतगांपुच्छे कर्णेवाहस्तिनक
रे॥ भूमिंदासीमजेचैवपृष्ठेश्वतरगर्दभौ॥ अश्वकर्णेसटायांवाअन्नमुद्दिश्यधारयेत॥
गृह्यासनगृहंदेवंसंस्पृश्यादायकांचनं॥ उष्ट्रंचककुदेस्पृष्ट्वामृगंश्वमहिषादिकान॥ गो
धामश्वविधानेनपक्षेसंस्पृश्यपक्षिणः॥ छत्रंदंडेतरूंमूलेफलंसंगृह्यगोरवान्॥ प्रग्
ह्योपानहौमंत्रंवासयेत्प्रतिमुच्यवै॥ अमत्रंपात्रं॥ वासस्तयासमादायकन्यांशीर्षेयवाक
रे॥ कन्यायादक्षिणांसमन्तिमस्तेदित्यर्थः॥ रतिनार्येपरपूर्वांप्रतिगृह्णीनचाक्षतां॥ पुत्र
मुत्संगमारोप्यप्रतिगृह्णीतदत्तकं॥ रथंरथमुखेस्पृष्ट्वाप्रतिगृह्णीतकूबेरे॥ कूबरोयुग ६
धारकाष्ठं॥ तथाचहेमाद्रौदानखंडे॥ नृनेःप्रतिग्रहंकुर्याद्भूमिंकृत्वाप्रदक्षिणं॥ करेगृ
हीत्वांकन्यांतुदासंदासींद्विजोत्तमः॥ आरुह्यत्वगजाःस्योक्तःकर्णेवोस्मिश्वकीर्तितः॥ त

याचैकशफानांतुसर्वेषांचविशेषतः॥ प्रतिगृह्णीताज्ञांशृंगेपुच्छेकृष्णाजिनंतथा॥ मेचैः
कशफाःशृंगिणःदानविशेषतःशृंगेप्रतिगृह्णीयादित्यर्थः॥ कर्णेचपुरोवावःसर्वेषांमाह्या
पुच्छेविचक्षणैः॥ गृह्णीयान्महिषंशृंगेखरंवैपृष्ठदेशतः॥ प्रतिग्रहंमथोक्तस्पयानांताचा
धिरोहणात॥ बीजानांमुष्टिमादायरत्नानादायसर्वतः॥ वस्त्रंदत्वांताददद्यात्परिधाया
पिवापुनः॥ आरुह्योपानहौमंचमारुह्येतत्रपादुके॥ धर्मध्वजोतुसंस्पृश्यगृह्णीयात॥
अवतीर्यचसर्वाणितत्स्थानानिर्विदेद्विजाः॥ आयुधानिसमाधायतयामुच्यविभूषणं॥
आमुच्यवध्वेत्यर्थः॥ इतिप्रतिग्रहस्थानानि॥ अथपादौतुव्यापुरुषदानं॥ हेमाद्रौमात्स्ये॥
अनेनविधिनायेतुव्यापुरुषमाचरेत॥ प्रतिश्लोकाधिपस्थानेप्रतिमन्वंतरेवसेत॥ वि
मानेनार्कवर्णेनकिंकिणीजालमालिना॥ पूज्यमानोप्सरोभिश्चततोविष्णुपुरंव्रजेत॥

दा०चं०
५

कल्पकोटिशतंयावत्तस्मिंल्लोकेमहीयते॥कर्मन्दृयादिहपुनर्नृविराजोन्नृपाढ्योतिम
णिरंजितपादपीठः॥अयोद्विनोनवतियज्ञसहस्तैयाजीदीप्तप्रतापजितसर्वमहीपाली
कः॥योदीयमानमपिपश्यतितुक्रियुक्तःकालांतरेयस्मरतिवाचयतीहलोके॥योवाप्र
योतिपतीहसमानरूपश्चात्सोपिधामपरंदरदेवजुष्टमिति॥तत्रैववह्निपुराणेएवंदत्वासु
वर्णतुब्रह्महत्यादिकंचयत्॥पापंनिहत्यपुरुषःस्वर्गलोकंसगच्छति॥तत्रस्थित्वाचिरंरा
जन्यद्यायातिमहीतले॥राजेश्वरःश्रीमानवीतरोगोनिरामयः॥रूपसौभाग्यसंपन्नो
नित्यंविष्णुपरायणः॥पुनर्विष्णुपदंयातियत्रगत्वानशोचतीति॥इतिसुवर्णादितुलापुरु
षदानफलं॥अथकुंडमंडपादि॥तत्रसुवर्णरत्नतुलायामेवावश्यकर्त्तांततमाह्यादयः॥ ५
रत्नरत्नतत्तुलायांतुकृताकृतमित्युक्तंतत्रैव॥होमाद्यवश्यकोतुमंडपादिरहितमेवकु

र्यात्॥नतत्रमंत्राहोमोवाएवमेवप्रदीयते॥इतिमत्स्योक्तेः॥ग्रहमंत्रोद्धारजाप्यमंत्राश्च
नेत्यर्थः॥अथतुलावेदिपरिमाणंचाह॥तत्रैवतत्रादौषुनेकिशोनार्यकुंडमंडपमात्रं
कृत्वासत्पहस्तापंचहस्तांवात्रलीयांशेनचतर्थांशेनवाउच्चांवेदिंकृत्वातदुपरिपूर्वपश्चि
मयोःस्तंभद्वयंनिरवेश्यं॥हेमाद्रौमात्स्ये॥नागकागुदेव्यंदनदेवदारुश्रीपर्णीबिल्वप्रियकां
चनोत्थं॥स्तंभद्वयंहस्तयुगावखातंकृत्वादृढंपंचकरोच्छ्रितंतत्॥तदंतरंहस्तचतुष्टयं
स्यात्तथोत्तरांगंचतुरस्रमेवेति॥नागकोवृक्षविशेषोमहातारइतिप्रसिद्धः॥श्रीपर्णीमन्कतक
॥प्रियकोजीवकःआरमतेकदंबःअंजनःकांचनःकष्यपर्णोवृक्षविशेषः॥स्तंभद्वयंचतु
रस्रीकृत्यवेदिमध्येपूर्वपश्चिमभागयोर्निवेश्यं॥उत्तरांगस्तंभयोरुपरितिर्यक्काष्ठं॥५तच्च
पंचकरयोस्तंभयोर्हस्तचतुष्टयोरुपरिनिधेयंचतुरस्रं॥अथोत्तरांगंचतदंगमेवेतिपा

ठेनदीयमितितत्वंसजातीयकाष्ठमित्यर्थः॥ समानजातिश्च तुलावलंब्याहेमेनमध्येपुरु
षेणयुक्ता॥ दैर्घ्येणसाहस्तचतुष्टयंस्यात्पृथुत्वमस्याश्चदशांगुलानि॥ सुवर्णयद्वातरणाच
कार्यासलोहपात्रद्वयमंगंखलाभिः॥ युतासुवर्णेनचरत्नमालाविभूषितामाल्यविभूषणा
द्या॥ समानजातीस्तोरणःसमानजातिरित्यर्थः॥ तुलोत्तरागमध्येचादशभिरंगुलैरधस्ता
दुदग्रग्नाश्चवलंब्यापुरुषेणविष्णुनाशृंखलाविलंबितयासुवर्णनिर्मितया॥ तत्प्रतिमाव्व
द्वयन्यस्तयोर्बहिष्ठितमंगुलषट्कंविहायविज्ञेयं॥ समस्ततुलायामष्टोत्तरशतांगुल त्वि
तत्वं॥ पृथुत्वंचास्याद्दशांगुलपरिमितेनवलयाकृतिसूत्रेणसंमितं विधेयमित्यर्थः॥ सलो
हपात्रद्वयमंखलाभिर्युतेतिसुवर्णादिद्रव्यधारणार्थफलकद्वारितिलोहपात्रद्वयावलंबि ४
तमंखलाभिर्युताकार्येत्यर्थः॥ तत्रैववन्हिपुराणे॥ अश्वत्थीखादिरीवापिपालाशीवा

त्यवृक्षजा॥ चतुर्हस्तप्रमाणेनसुश्लक्ष्णाक्तदृढांनवांस्कवर्णतुलांसमांतद्वस्त्रागधांछिद्रत्र
यान्वितां॥ मोजत्रिकवयोपेतांबधांस्तत्रेसुपाज्ञिये॥ चतुरस्रातुलाकार्यापादैश्चापितयावि
धौ॥ चतुर्थपिपार्श्वेषुमानेस्याचतुरंगुलमुक्तानावतुकरकावंतयोर्विन्यसेद्बुधः॥ चतुर्हस्ताष
ट्तुलामध्येशृंखलयान्वितामिकंहस्तत्रयंकुर्यात्कंठकंचतुरंगुलमिति॥ यदाहतत्रैव॥ वि
श्वकर्माविशेषदानकल्पितंतुलादिवस्मात्तुलालक्षणमुच्यतेप्राकृतुलाप्रमाणंस्मृतमंगला
निर्दैर्घ्यैरविकलेषण्णवतीप्रमाणैः॥ प्रांतेद्वयेष्यंगुलषट्कंत्रातंतुलाष्टोत्तरमंगुलानांस्युर्विंशति
ः पंचचधातुवंधावंधेष्वधिष्ठास्तुज्ञातिनिवेशपा॥ इन्द्रःशक्तीमारुतरुद्रसूर्यस्त्वाहिश्वकर्मा
नुतरंगिरोग्नि॥ प्रजापतिर्विश्वजगद्विधातापर्जन्यशक्राश्चपितृदैवतांच॥ सौम्यश्चधर्मानिररा
जमश्वीजलेशमित्रावरुणौमरुद्गणाः॥ धनेशनागंधर्वजलेशविष्णुरेतेचतुर्विंशतिरेवदेवाः

द्वा॰चं॰का॰
९

॥अत्रसौम्योबुधःस्यात्संचपुत्रःविरूपःसएकोयस्तोव्यमानस्तुजयामहात्मा॥एता
विधेयास्तपतीयन्नयोरत्नाचिंतादैवतमूर्तयस्ताः॥षडंगुलस्याच्चतुरस्रपिंडः
प्रांतद्वयेविद्रुगरनंतनाम॥पार्श्वद्वयंतच्चतुरंगुलंस्यादेवमयातेकथितंप्रमाणं
॥मध्यांकुंडेसंकुलिकांगुलानिपंचाधिकाविंशतिरेवदैर्घ्यं॥एकांगुलस्याद्भव
तीहपिंडस्तत्राधिदेवःकिलवास्तुकःस्यात्॥एकेकरज्जुर्नवतेंगुलानित्रिंशत्सम
तिंपिंडगतांगुलाच॥तच्चेनकद्वद्वमयांगुलानित्रिंशत्तयापंचदशाधिकास्यात्
॥तद्वांगुलवद्धनुनकाष्ठपीठंपिंडेतयाद्वद्वमयोविधेयं॥अस्योर्ध्वस्यधिदेवमा
स्यात्तुलातरंनूमिपतिर्निवेश्याद्यति॥इतिहेमाद्रौमात्स्योक्तेः॥वेद्यादितुलाकृत
लक्षणंच॥अथवेदीषोडशारचक्रस्यैरवनप्रकारउक्तोमदनरत्ने॥तत्राचार्यो

९

वेद्यांमध्येत्रिहस्तव्यासंचतुरस्रंप्रसाध्यप्रागपरदक्षिणोत्तरनवरेखाभिस्तच्चतुःषष्टि
कोष्ठकंकुर्यात्तत्रकोष्ठानिप्रत्येकंनवनवांगुलानिसंपद्यंते॥ततोबहिरंत्यपंक्तिष्क
चतुर्दिक्षुमध्यकोष्ठानिचत्वारिचत्वारिमार्जयित्वातदुपर्युपांत्यपंक्तिषुपार्श्वयोस्त
त्रयंत्रयंत्यक्त्वाप्रतिदिशामध्यकोष्ठद्वयंमार्जयतेनचतुर्दिक्षुषट्कोष्ठानिचत्वारिद्वा
राणिसिध्यंतिततोमध्यस्थितषोडशकोष्ठानिमार्जयेत्॥ततोबाह्येएकैकंकोणको
ष्ठंविहायकोणकाष्ठद्वारपीठांतरालवर्तिन्यवशिष्टानिपंचपंचकोष्ठानिमार्जयेत्॥
तथाचमध्यचतुरस्रपीठपादाःसिध्यंतिततोमध्याद्बह्वारिवृत्तानिकुर्यात्॥तत्राद्ये
चत्वार्यंगुलानिव्यासःद्वितीयेष्टौ॥तृतीयेचतुर्विंशतिःचतुर्थेषड्विंशतिरितितच्च
तुरंगुलंवृत्तंकर्णिकारूपंपीनरसापूरयित्वाकर्णिकाबधिरेखाभिस्तेनरजसानिमपि

तद्बहिर्द्व्यंगुलात्मके वृत्ते पीतरक्तसितरजोभिः संपादितमूलमध्याग्राणि षोडश केसरा
णि संपाद्य तत्केसरावधि रेखां सितेनैव रजसा द्व्यंगुलोन्नतां संपाद्य चतुर्विंशांगुलात्मकेन
बहिर्वृत्ते सितेन रजसा त्र्यष्टदिक्ष्वष्टौ पत्राणि रक्तानि कुर्यात्॥ ततो दलांतरे रेखां सि
तेन रजसा विधाय दलांतराणि रक्तेन रजसा पूरयित्वा तद्बहिरेकांगुलांतरा वा बहिर्वृत्तरेखां
सितेनैव रजसा संपाद्य वृत्तद्वयांतरपरितो द्वादशाग्रतन्मध्यांचक्रैः षोडशाश्चाविनज्य
वृत्तिना गंगदाकारान् षोडश गरांश्यामपीतारुणश्वेतरजोभिः कल्पयित्वा तदंतरालं
च यथायोगं रजोभिः पूरयित्वा तद्बहिः सितपीतारुणश्यामहरिताः पंच रेखाः लिखे
त्॥ तद्बहिः पीठस्थं तत्र चतुरस्रं यथायोगं रजोभिरलंकृत्य पीठावधिरेखां सितेन रजसा १०
चतुरस्रं विरचयेत्॥ द्वारस्थेत्राणि पूर्वादितः पीतश्यामसितरजोभिः पूरयेत्॥ आग्ने

यादिकोणे कोष्ठचतुष्टये लोहितहरिज्जःश्यामधवलैः प्रपूरयेत्॥ आग्नेयादिपीठपादच
तुष्टयं पंचकोष्ठात्मकं चक्रमात्सितरक्तपीतकृष्णरजोभिः प्रपूरयेत्॥ ततः सितेन रजसां
गुलोन्नतेन बहिश्चतुरस्ररेखां कुर्यादिति मदनरत्नादयः॥ ठक्कुरमते तु चतुरस्रं चतुर्हस्तं॥
तत्र प्रत्येकं द्वादशांगुलानि नव कोष्ठानि वृत्तानि तु पंच॥ तत्राद्यवृत्ते च चत्वार्यंगुलानि
व्यासः॥ द्वितीये षट् तृतीये विंशतिः चतुर्थे चतुर्विंशतिः पंचमे तच्चतुरस्रं बहिस्त
लैर्नेष्टत्रिंशादिति पंचकोष्ठात्मकं पीठपादचतुष्टयं॥ आग्नेयादिकमेण रक्तहरितर
श्यामसितैः पूरणीयं॥ कोणकोष्ठचतुष्टयं प्रत्येकं त्रिभिस्त्रिभिस्त्रिवर्णैः इति विशेषः॥ इदं
मेव वारुणमंडलं जलाशयोत्सर्गादौ ज्ञेयं पुनस्तत्रैव॥ वज्रपाशुत्तमेनापेक्ष्याग्नेयांशा
मुच्चतां॥ आह्निकरेवद्विधेयेदंडेनै हंत्यां खड्गमातिरक्तं॥ पाशं तु वारुणे लिख्यं ध्वजं

दा॰चं॰का॰ वैवायुगेचरे॥कौबेर्यांतुप्रदानेस्याईशान्यामूर्ध्वमालिखेत्॥मूलस्यवामदेशेतु
११ चक्रपद्मंचदक्षिणे॥ततोमहावेद्युपरिपंचवर्णफलपुष्पोपशोभितं॥वितानकुंडम
ंडपे॥वद्धीध्वीयादितिइतिवेद्युपरिषोडशारचक्रकेलेखनविधिः॥अथप्रतादितुला
फलमुक्तं॥ ॥हेमाद्रौविष्णुधर्मोत्तरे॥प्रथमातुध्रुवस्योक्तातेजोरधिकरीशुभामहि
केनतुसौभाग्यंतैलेनबहुलाप्रजाः॥वस्त्राणिप्राप्नोतितुलायायाशुरं॥लवणेनतुलाच
व्यमरोगत्वंगुडेनच॥असपत्नीशर्करयासुरूपंचंदनेनतु॥अवियोगोभवेद्भर्तुस्तुल
याकुंकुमस्यच॥नसंतापोहृदिभवेत्क्षीरस्यतुलयातथा॥सर्वकामप्रदाःसर्वाःसर्वपापक्ष
यंकराः॥यःकरोतितुलाःसर्वाःसगौर्यालयमाप्नुयात्॥मंत्रेणदद्याद्विमंत्रितांतुसत्त ११
कृत्तुलामेकतमांद्विजेभ्यः॥सयातिगौर्याःसदनंसपुण्यंनशोकदौर्भाग्यमुपाश्नुते

पुमान्नत्वंतुलेसर्वभूतानामित्यादिः॥इत्यारुह्यगोदोहकालंतत्रासीस्थितयित्वाहरि
प्रियां॥अवरुह्यततोदद्यादर्घमादरयाप्रिया॥गुरुंसंपूज्यविधिवद्वस्त्रालंका
रभूषणैः॥विसर्जयेन्नमस्कृत्यभोजयेद्द्विजपुंगवान्॥शेषंद्विजेभ्योदातव्यंस्त्रीभ्यो
नेत्यस्तथैवच॥कदलीदलसंस्थांपैवपंचपिंडंहिमाद्रितं॥कर्पूरस्यतुलांपूज्यकुं
कुमेनालमेतुलां॥विधिनानेनयोदद्यात्तुलादानंविमत्सरः॥सलोकमेतिपार्वत्याः
सव्यनानोपसरोगणैः॥तत्रापिकालंसुचिरमिहलोकेनृपोभवेत्॥आत्मतुल्यांसुव
र्णवारजतंरत्नमेववा॥योददातिद्विजाग्र्येभ्यस्तस्याप्येतत्फलंभवेत्॥एतद्भूमिदा
नंजन्म॥ब्रह्महत्यादिपापाद्विमुक्तःशिवपुरंव्रजेत्॥सचतत्पापनिर्मुक्तःशोकंवि
ष्णुपुरंव्रजेत्॥तुलापुरुषमूर्तीचदीयमानंचयेनराः॥पश्यंतितेपियांतिद्यायिचा

स्युरनुमोदकाः॥ गुडंवायदिवाखंडंलवणंवापितोषितं॥ योदद्यादात्मनातुल्यंना
रीवापुरुषोपिवा॥ पुमान्नघुन्मवत्स्यात्तुनारीस्यात्पार्वतीसमा॥ सुत्नगौरुपसंपन्नो
नुजीतांतेत्रिविष्टपं॥ हिरण्यदक्षिणायुक्तंसवस्त्रंभूषणान्वितं॥ अलंकृत्वाद्विजा
ग्र्यंतंपरिधाप्यचवाससी॥ खंडादितोलितंपश्चात्ब्राह्मणेषुप्रतिपादयेत्॥ सर्व
कामसमृद्धात्मानंतकालंवसेद्दिवीति॥ इतिघृतादितुलादानफलं॥ ॥अथना
नारोगनिरासार्थंद्रव्यविशेषेणतुलादानात्फलानिगमारूढे॥ तुलापुरुषदानंतु
शृणुमत्तंजयोद्भवं॥ अथलोहंप्रदातव्यंसर्वरोगोपशांतये॥ कांस्यंचयक्ष्मणेदेयं
त्रपुरक्तोविकारके॥ अपस्मारेतुसीसंस्यात्ताम्रंकष्टेचदारुणे॥ पित्तज्वरेरक्तपित्तेचरू १२
प्यंप्रदरेमेहयोः॥ सुवर्णंसर्वरोगेषुप्रदद्यात्तत्क्षनाशनं॥ फलोद्भवंतथादद्यात्

शाहिण्यांदीर्घवारुणे॥ गौडंत्वस्मगरोगेचपौंगंस्यात्कृडमालिके॥ पौंगंपूगीफलं॥ काष्ठ
जंचाग्निमांद्येस्यात्रोगोत्पतोतुभैष्यकं॥ मधूद्भवंतथादेयंकासश्वासजलोदरे॥ घृतोद्भ
वंतथादेयंछर्दिरोगोपशांतये॥ क्षीरंपित्तविनाशायदधिस्याद्गदहारणे॥ लवणंवेप
नाशायपेहंद्रहुविनाशने॥ धान्यंचसर्वरोगस्यनाशनंमुनिभिःस्मृतंइति॥ अत्रायं
संक्षेपोदानोद्देतेपिरूप्यतुलायांसुवर्णतुलमेवच॥ पित्तलिभिःप्रदरमेहनाशश्च॥ र
लतुलायांसुवर्णफलमेव॥ ताम्रणकुष्टनाशः॥ पित्तलेक्तपित्तनाशः॥ कांस्येनयक्ष्म
नाशः॥ त्रपुणावर्णनाशः॥ सीसेनापस्मारनाशः॥ लोहेनसर्वरोगनाशः॥ घृतेनते
जोवृद्धिर्दारिद्र्यनाशश्च॥ गुडेनारोगित्वंसौभाग्यवृद्धिश्च॥ लवणेनलावण्यंसौभाग्य
श्च॥ मधुनासौभाग्यंकासश्वासजलोदरनाशश्च॥ तैलेनप्रजावाभवति॥ क्षीरेणपि

दा०चं०
१३

त्तनाशः संतापनिवृत्तिश्च ॥ दध्ना जगंदरनाशः ॥ शर्करया सापत्न्यबाधानिवृत्तिः ॥
अन्नेनारोगित्वं ॥ पिष्टेन दद्रुनाशः ॥ फलैः संग्रहणीनाशः ॥ क्रमुके गंडमालाना
शः ॥ क्रमुकं पूगीफलं ॥ कुंकुमेन सौभाग्यवृद्धिः ॥ तिलैः पापनाशः ॥ पुष्पैर्बहुरोगना
शः ॥ तांबूलेन मुखे दुर्गंधिनाशः ॥ चंदने सौंदर्यवान् ॥ गंधेन सौभाग्यं ॥ वस्त्रेण दि
व्यवस्त्रप्राप्तिः ॥ काष्ठैर्वह्निमांद्यनाशः ॥ विष्णुप्रीतिर्वा सर्वद्रव्यैरपीति ॥ इति नानारो
गनिरासद्रव्यविशेषतुला ॥ ॥ अथ पूजार्थं तद्द्रव्याधिदेवतामाह ॥ ॥ गारुडे ॥
अधिदेवं तुलोद्दिष्टं महाभैरव उच्यते ॥ कांस्ये त्वपां पतिर्ज्ञेयो वायुश्च सीसके स्मृतः ॥
ताम्रे सूर्यस्तथा प्रोक्तः पैत्तले च कुहूस्तथा ॥ रौप्ये च पितरो ज्ञेयाः सौवर्णे सर्वदेव १३
ताः ॥ फले सोमो गुडे चापस्तांबूले च विनायकः ॥ गंधर्वाः कुंकुमे चैव जाते गजेऽग्नि

स्त्यपांस्मृतः ॥ जांगले काष्ठे ॥ मधौ यक्षाः प्रयत्नेन घृते मृत्युंजयस्तथा ॥ क्षीरे तारागणा
ः सर्वे दध्नि सर्पाः प्रकीर्तिताः ॥ लवणे पार्वती देवी समुद्दिष्टाधिदैवतं ॥ पिष्टे प्रजापति
र्देवो अन्ने सर्वाश्च देवताः ॥ आत्रिर्यदग्ध्या साज्ये वा ग्रा भ्रुपात्पुण्यदे गजः ॥ नित्यं मृत्युंज
यप्राप्तिर्विधिना यत्प्रदीयते ॥ तदेव सर्वदानानां सर्वं भवतीति न संशयः ॥ तुलापुरुषदाने
न मृत्युं जयति मानवः ॥ आगमोक्तमृत्युंजयमंत्रेण पूजयित्वेत्यर्थः ॥ नाममंत्रेण वाय
थाधिकारं योज्यं ॥ इति द्रव्याधिदेवताः ॥ अथ कालविशेषः ॥ दानोद्योते विश्वामित्रः ॥
आदित्ये राहुणा ग्रस्ते सुवर्णैस्तोलयेत्तनुं ॥ सोमग्रहे तु रौप्येण यद्वा दानं तथा शृणु ॥
प्रवर्ग्यस्य मुखे जातं तस्यां तः पुत्रदेवताः ॥ सर्वपापहरायैतद्दानं प्रीयतां विधुः ॥ इ
त्युच्चार्य जलं त्यक्त्वा निक्षिपेद्द्विजसत्तमेति ॥ ॥ अथ तुलापुरुषदानविधिः ॥ हिमाद्रौ

विष्णुधर्मोत्तरे ॥ तुलादानं प्रवक्ष्यामि सर्वपापप्रणाशनं ॥ यच्छौर्याचरितं पूर्वं लक्ष्मी॥
नारायणेन तु ॥ पुण्यं दिनमथासाद्य तत्तीयायां विशेषतः ॥ गोमयेनानुलिप्तायां भूमौ
कुर्यात्षट्टं सुवृत्तं ॥ दारवंशं सुत्रवृत्तं स्यच्चतुर्हस्तप्रमाणतः ॥ कर्वैर्णतत्र बध्नीयात्स्व
र्णरूपाधटितं धटे ॥ सौवर्णं स्थापयेत्तत्र वासुदेवं चतुर्भुजं ॥ त्रिकपट्टपंचबध्नीयात्ते
त्स्थापयेत्पीठके ततः ॥ ततारोहेत्स वस्त्राल्यः गंधैः सर्वालंकारभूषितः ॥ अर्चनीष्टदेव
तां गृह्यस्तापयित्वाघृतादिति ॥ तुलापुरुषदानस्य विधिरेषप्रकीर्तितः ॥ अत्र विधि
रेषप्रकीर्तित इति वचनादेवतावत्येवेति कर्तव्यतेत्यकं नवतीति दामोदरः ॥ नान्य
दिति ॥ तुलादानमधिकृत्य लिंगपुराणे ॥ दक्षिणा च ततः तं चार्धं तदर्धं वापि दापयेत् १४
॥ गुरोरिति विशेषः ॥ ऋत्विजां चैव सर्वेषां दशनिष्कान्प्रदापयेदिति ॥ तथा ॥ यजमाने

ऽयनग्रहसंक्रमादिपुण्यकालमासाग्रपूर्वैकरेकनकाद्याचरितप्रायश्चित्तः कृत ।
नित्यक्रियो दर्भेष्वासीनो दर्भान्धारयमाणः शुचिराचम्य देशकालौ संकीर्त्य मम
मुककामनासिद्धाराश्रीपरमेश्वरप्रीत्यर्थममुकद्रव्यतुलापुरुषदानं करिष्य इति सं
कल्प्य ॥ तथा ॥ रोगनिरासार्थे तु ममामुकरोगनिरासेन मम मास्यविरोर्वाञ्छ्रमुरोग । क
निरासेनक्षिप्रारोग्यप्राप्तिसिद्धिद्वारा श्रीपरमेश्वरप्रीत्यर्थमिति ॥ तथा ॥ यद्गतु ग्रहदा
चारवयग्नात्मादितुलासुवर्णमांशं चतुर्थांशं वासुवर्णरजतादि प्रक्षिप्यते च तद
सुवर्णा तुलायाश्चतुर्थांशाष्टमांशादितुलाविशेषप्राप्तिद्वारा इत्युल्लेखः कार्यः ॥
तदंगतया गणपतिपूजनं पुण्याहवाचनमाचार्यवरणमंगदेवतापूजनं च करि
ष्य इति संकल्प्य ॥ गणेशं संपूज्य पुण्याहं स्वस्तिकद्धिश्रीः कल्याणमिति ब्राह्मणं

चात्मकंबौधायनोक्तंब्राह्मणांस्त्रिस्त्रिर्वाचयित्वाचार्यंवृत्वाआचार्यस्तुलायांगौरींवि
ष्ण्वादिंतुलांगदेवताश्चपूजयित्वारोगनिरासार्थंतुमहामृत्युंजयमंत्रेणप्रतिमायांमृ
त्युंजयंताम्रादितोलनीयद्रव्याधिदेवताश्चपूजयेदिति॥ ॥इतितुलापुरुषदानदोष
ः॥ ॥अथतुलापुरुषदानप्रयोगः॥ ॥यजमानःशुचिराचम्यप्राणानायम्यदेशका
लौसंकीर्त्यरौकैकमन्वंतरकालावच्छिन्नप्रतिलोकस्थानिवासपूर्वकार्कवर्णकिंकिणी
जालमालिरिविविमानकरणकाद्वारःपूजासहितशिवपुरगमनपूर्वकैकल्पकोटिदि
तावच्छिन्नविष्णुपुराधिकरणकनिवासकामःसुवर्णरत्नरौप्यादितुलापुरुषमहादा
नमहंकरिष्येइतिसंकल्प्य॥ब्रह्महत्यादिसकलपापक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थं
सुवर्णरत्नरौप्यतुलापुरुषमहादानंकरिष्ये॥तदंगगणपतिपूजनंपुण्याहवाच

नंमातृकापूजनंनांदीश्राद्धंआचार्यवरणादिकुर्यात्॥ताम्रादितुलायांतुसंकल्पोत्त
रंगणपतिपूजनंपूर्वोक्तपुण्याहवाचनमात्रंकृत्वाआचार्यंवृत्वायथावित्तंवस्त्रालं
कारादिभिःपूजयेत्॥ततःआचार्योगोमयेनोपलिप्तवेद्यादौसर्षपविकरणपंचग
व्यप्रोक्षणेकृत्वावेद्यांवारुणमंडलंविलिख्यतत्परिकुंडमंडपेपंचवर्णवितानेफल
पुष्पोपशोभितंसध्वजंबध्वावेद्यादौधर्मावधस्तत्रदक्षिणोदक्त्रिकांतातुलांबध्नीया
त्॥गौरीप्रीत्यर्थंतुलायांकर्पूरकृतपंचपिंडिकारूपांगौरींकुंकुमेनानुलिप्यपूजये
त्॥ततोधर्मराजसूर्यविष्णुप्रतिमास्तिस्रोमाषमात्रसुवर्णनिर्मितामुक्तारत्नादिपू
र्वकंसंपूज्यइष्टदेवतांचपंचामृतेनाभिषिच्याभ्यर्च्यविष्णुप्रतिमांतुलामध्येबध्वातत
ःपूर्वोक्तितोलनीयद्रव्याधिदेवतांद्रव्येणसंपूज्यतुलायैनमइतितुलांचतुलाप्रांत

कूटयोःविष्णुमनंतंमध्येकूटेवासुकिंफलकद्वयेभूमिंचसंपूज्यरक्तवस्त्रेणतुलांसंवेस
ततःशक्रौसत्यातुलादंडेसुवर्णनिर्मिताश्चतुर्विंशतिप्रतिमासुइंद्रकुंभस्थादेवता
आवाह्यपूजयेत।।तदित्थं।।ॐइंद्रायनमइंद्रंआवाहयामि।।एवंसर्वत्र।।ॐअग्ना
ग्नयेनमः।।अग्निनम०।।मारुतायनमः।।मारुतंआ०।।रुद्राय०।।रुद्रमा०।।ॐसू
र्यायन०।।सूर्यमा०ॐविश्वकर्मणेन०।।विश्वकर्माणमा०।।ॐगुरवेन०गुरुमा०।।ॐ
त्र्यंगिरोग्निभ्यांन०त्र्यंगिरोग्नीआ०प्रजापतयेन०प्रजापतिमा०।।ॐविश्वेभ्योदेवेभ्योन
०विश्वान्देवाना०।।ॐधात्रेनमःधातारंआ०।।ॐपर्जन्यश्रीनुभ्यांन०पर्जन्यश्रीनू०।।
ॐपितृभ्योनमःपितृनआ०।।ॐधर्माय०धर्ममा०।।ॐसौम्याय०सौम्यमा०।।ॐअ
मरराजायनमः।।अमरराजंआ०।।ॐअश्विभ्यांनमः।।अश्विनोआ०ॐजलेशाय

०जलेशमावा०ओंमित्रावरुणाभ्यां०मित्रावरुणावावा०।।ओंमरुद्गणेभ्योनमः।।म
रुद्गणान्०।।ॐधनेशायनमः।।धनेशा०।।ॐगंधर्वाय०।।गंधर्व०।।ॐजलेशाय०।।जलेश
०।।ॐविष्णवे०।।विष्णुंआ०।।इत्यावाह्यसंपूज्यततोयजमानोवस्त्रंतरपागंधमाल्या
द्यलंकृतःकुसुमांजलिंगृहीत्वातुलांत्रिःप्रदक्षिणीकृत्यप्राङ्मुखउपविश्यप्रार्थयेत्
।।ओंनमस्तेसर्वदेवानांशक्तिस्त्वंसत्यमाश्रिता।।साक्षिभूताजगद्धात्रीनिर्मिताविश्व
योनिना।।एकतःसर्वसत्यानितथानृतशतानिच।।धर्माधर्मकृतांमध्येस्थापितासि
जगद्धिते।।त्वंतुलेसर्वभूतानांप्रमाणमिहकीर्तिता।।मांतोलयंतीसंसारादुद्धरस्वनमो
स्तुते।।योसौतत्वाधिपोदेवःपुरुषःपंचविंशकः।।सएषोधिष्ठितोविलयितस्मान्त
मोनमः।।नमोनमस्तेगोविंदंतुलापुरुषसंज्ञक।।त्वंहरेतारयस्वात्मासंसारसागरा

दा॰चं॰का॰ १७ दिति॥इतिपठित्वातुलांपरिपुष्पांजलिंक्षिपेत्॥पुनःस्कंधंत्रिःप्रदक्षिणीकृत्यवाम
हस्तेधर्मराजंदक्षिणेसूर्यमंकेस्वात्मीष्टदेवतांपंचामृतालिप्तिकार्चितांचादायप्राङ्
मुखःस्वस्कंधतुलायामुत्तरफलकेआरुहेत्॥दक्षिणेनसुवर्णस्यउत्तरेणनराधिपइति
मात्स्यवचनात्॥नराधिपइत्युपलक्षणं॥ततःआचार्योदक्षिणफलकेतोलनी
यमारोपयेत्॥सुवर्णंयावत्तस्माधिकंस्यात्तुष्टिकामेनतन्न्यूनमिष्टमधिकंकार्यं॥ततो
यजमानस्तुलामध्यदंडस्थितस्यहरेर्जंघाश्वामुखंन्यस्यमंत्रंपठेत्॥ॐनमस्तेसर्व
भूतानांसाक्षिभूतेसनातनि॥पितामहेनदेवित्वंनिर्मितापरमेष्ठिना॥त्वयाधृतंज
गत्सर्वंजगत्स्थावरजंगमं॥सर्वभूतात्मभूतस्थेनमस्तेविश्वधारिणीति॥गोदोहका १७
लंतत्रस्थित्वा॥ततस्तुलावतीर्णेतोलितद्रव्येतुलसीपत्रंनिधायदेशकालौसंकीर्त्य

अमुककामइदममुकद्रव्यमात्मसमतोलितमाचार्यादिभ्योब्राह्मणेभ्यःसमा
श्रितबंधुवर्गेभ्योदीनानाथेभ्योभवद्दातुमहमुत्सृजेनममेत्युत्सृज्य॥ततःकृतस्या
मुकतुलापुरुषदानकर्मणःसांगतासिद्ध्यर्थमाचार्यायइदंसुवर्णमग्निदैवतंद
क्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिदद्यात्॥पुनःकृतस्यामुकतुलापुरुषदानक
र्मणइत्यादिसांगतासिद्ध्यर्थंनानानामगोत्रेभ्योब्राह्मणेभ्योयथाशक्तिभूयसींद
क्षिणांदातुमहमुत्सृजे॥तथाकृतस्यामुकतुलापुरुषदानकर्मणःसांगतासिद्ध्य
र्थंयथाशक्तिब्राह्मणान्यथाकालंयथोपपन्नेनान्नेनभोजयिष्येइतिसंकल्प्य॥ततः
आचार्यस्तास्ताआवाहितदेवताःसर्वार्चनपूर्वकंविसृज्याचार्यायतुवार्धपादंवा
प्रतिमवस्त्राभरणादिसर्वंतुभ्यमहंसंप्रददे॥नममइतिदत्वा॥सदस्यादिकंचेत्

दा०चं०का० त्तदर्धंदत्वातुलात्रोपंचसप्तएवयथोद्देशंदत्वाप्रमादात्कुर्वतांकर्मयस्यस्मृत्याच्यना
१८ मोक्तेयतिजपित्वाकर्मेश्वरार्पणंकुर्यात्वासुहृद्धक्तोऽनुजानीतेति॥केचित्तुअत्रतुलापू
जोत्तरमग्निंसंस्थाप्यइष्टगातादितुलास्थदेवतास्योद्दृशवद्दृशवाज्याहुतयश्चर्वाहुतय
श्चदद्यंतीति॥तुलाप्रतिग्रहप्रायश्चित्तंतुआचाचार्यश्चांद्रायणमेकंकुर्यात्प्रतिग्रहा
नुसारयैत्युक्तं॥दानोद्योतेरहस्यप्रायश्चित्तेषुहेमाद्रौमात्स्ये॥नचिरंधारयेद्गेहेसुवर्णं
तोलितंबुधः॥तिष्ठेद्यावद्गृहेयस्यातस्माद्दुःखंकरंनृणाम्॥त्रो॥घ्नपरस्वोकरणात्तु
यःप्राप्नोतिपुष्कलंइति॥सुवर्णादिसर्वद्रव्यतुलास्वेवंकैमुतिकन्यायात्॥अ
त्रत्यसुवर्णशब्दोरजतादिसर्वद्रव्यतुलोपलक्षकोबोध्यः॥मीमांसैकधुरंधरः १८
श्रुतिधरोन्यायेपिवागीश्वरःसाहित्यमृतसागरःसुजनतावल्लीरसालद्रुमः॥

यंविद्वन्मणिशेखरोनकरःश्रीसूतविश्वेश्वरंतेनाकारिघृतादितोलनविधौसत्प्रीतये
पद्धतिः॥ ॥इतिश्रीदानोद्योतेघृतादिदानप्रयोगःसमाप्तः॥ ॥अथगोसहस्रमहादानप्रयोगः
॥हेमाद्रौमात्स्ये॥गोसहस्रदानंचिकीर्षुरधिवासनदिनात्प्राक्त्रिरात्रमेकरात्रंवा
शक्तितःपयोव्रताधिवासनदिनेशुचिर्यजमानोदेशकालौसंकीर्त्य॥ममसमस्तपा
पक्षयोत्तरसिद्धचारणसेवितार्कवर्णकिंकिणीजालमालाविमानारोहणोत्तरानेक
मन्वंतरावच्छिन्नेंद्रादिसकललोकपालोकाधिकरणपुत्रपौत्रसमन्वितशिवालय
गमनैकोत्तरसंख्येयपितृमातामहकुलतारणकर्तृत्वपर्यातावच्छिन्नशिवपुरनि
वासानंतरराजराजीभवनाश्वमेधशतकर्तृत्वशिवध्यानपरत्वविष्णुसायुज्यपामनत्रयो
गस्थानकसंसारमोचनकामःश्वोगोसहस्रमहादानंप्रतिपादयिष्येइतिसंकल्प्य॥

वृ०उ०
१७
तातोपवासगुर्वादिनियोगं तंतुलापुरुषमहादानवत्कुर्यात्॥ ॥अथाचार्य एकं ल
क्षण्यं नंदिकेश्वरं वृषं सवत्सदशगोत्तरगोमरुल्लात्सवत्सधेनुदशकं च स्वर्णघंटा स्वर्णतिल
कस्वर्णपट्टकौशेयवस्त्रमाल्यहेमरत्नयुतशृंगरौप्यखुरचामरोपस्करोन्नितं सताम्रदोहनं पा
दुकोपानच्छत्राद्यनेकसोपस्करयुतं वेदीपरितः स्थापयेत्॥ अथासादितगोवृषदशकाब्
मंडपाद्बहिस्तद्यथावकाशं गोसहस्रं वस्त्रमाल्यस्वर्णशृंगरौप्यखुरादि युतं कृत्वाधिवास
येत्॥ शेषः अथासादितगोवृषदशकमध्ये च कोपरिस्थापितलवणद्रोणोपरि पूर्वोक्तं
लक्षणं कौशेयसंवीतं नानाभरणभूषितं॥ माल्येक्षुफलसंयुक्तं नंदिकेश्वरं संस्थापये
त्॥ वेद्युपरि फलपुष्पादिशोभितं पंचवर्णवितानं कूटे बध्नीयात्॥ ततः आचार्यादय १७
: स्वकुंडसंन्निधौ सर्वौषध्यादियुतकलशचतुष्टयस्थापनादियजमानाभिषेकांतं तु

लामहादानवत्कुर्युः॥ ततः शुक्लमाल्यांबरः सकुसुमांजलिना सवृषगोदशकं तामामं
त्रयेत्॥ तत्र मंत्राः॥ नमो वो विश्वमूर्तिभ्यो विश्वमातृभ्य एव च॥ लोकाधिवासिनीभ्यश्च रो
हिणीभ्यो नमो नमः॥ गवामंगेषु तिष्ठंति भुवनान्येकविंशतिः॥ ब्रह्मादयस्तथा देवा रो
ध्यः पांतु मातरः॥ गावो मे अग्रतः संतु गावो मे संतु पृष्ठतः॥ गावो मे हृदये संतु गवां म
ध्ये वसाम्यहं॥ यस्मात्त्वं वृषरूपेण धर्म एव सनातनः॥ अष्टमूर्तेरधिष्ठानमतः पाहि
सदानघेति पुष्पांजलिना संपूज्य वेदीपश्चिमे प्राङ्मुख उपविश्य पूर्ववद्देशकालौ स्मृत्वा
मम समस्तपापक्षयोत्तरसिद्धचारणसेविताऽर्कवर्णकिंकिणीजालमालिविमानारोह
णोत्तरानेकमन्वंतरावच्छिन्नेंद्रादिसकललोकपाललोकाधिकरणपुत्रपौत्रसमन्वि
तदिवावासत्रयगमनैकोत्तरसंख्येयपितृमातामहकुलतारणकतृप्तिकामतावच्छिन्नवि

दा०चं० वपुरनिवासानंतरराजराज्ञीत्वधनाश्वमेधव्रातकर्तृत्वशिवध्यानपरत्वविस्तृतसाहस्रपा
२० मंत्रयोगस्थानकसंसारमोचनकामइत्यंतेइमांवृषांइमाः सवत्सधेनुदशकसहिताः स
हस्रंगाः सांगोपांगाः अमुकामुकगोत्रामनुकवेदाध्यायकामुकशर्मभ्योगुर्वर्त्विकादि
भ्यश्चसंप्रददेनममेतिगुर्वादिहस्तेषुजलंदद्यात्॥ तेचदेवस्यत्वेतियजुषारुद्रायगामि
त्युक्त्वापुच्छेषुप्रतिगृह्यस्वस्तीत्युक्त्वायथाशाखंकामस्तुतिंकइदंकस्मादितिपठेयुः॥ ततो
यजमानः कृतस्यगोसहस्रमहादानकर्मणः सांगतासिध्यर्थंयामंतून्निवारणादिसुव
र्णंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिप्रत्येकंतोभ्योदक्षिणांदद्यात्॥ ततः कृतस्य
गोसहस्रमहादानकृत्यादि सांगतासिध्यर्थंनानानामगोत्रेभ्योब्राह्मणेभ्योयथाशक्ति २०
भूयसींदक्षिणांदातुमहमुत्सृज्येनममेति॥ तथापुनः कृतस्यइत्यादिसांगतासिध्य

र्थंयथाशक्तिब्राह्मणान्यथाकालंयथोपपन्नेनान्नेनभोजयिष्यइतिसंकल्पयेत्॥ ततः
आचार्यः पुण्याहवाचनाद्यावाहितदेवताः संपूज्यतत्तिथ्ब्राह्मणास्ततइत्यादिनाविसृ
ज्यतद्दिनेपयोव्रतमग्नात्तोयजमानेनकार्याब्रह्मचारीभवेत्॥ ततः प्रमादात्कुर्वताक
र्मयस्यस्मृत्याचनामोत्येत्यकृष्णापरमेश्वरार्पणंकुर्यादिति॥ ॥इतिदानसंज्ञेयचंद्रिकायां
गोसहस्रमहादानप्रयोगः॥ भविष्यपुराणे॥ शतंगवः सवृषभाधेनूपस्करसंयुताः॥
दत्वाचब्राह्मणेभ्यस्तुविमुक्तेनांतरात्मना॥ शिवादिसर्वलोकेषुयथेष्टंमोदतेतुसः॥ पुण्य
कालेतुविराचम्यप्राणानायाम्यदेशकालौसंकीर्त्यममसमस्तपापक्षयपूर्वकसिद्ध
चारणसेवितार्कवर्णकिंकिणीजालमालिविमानारोहणोत्तरानेकमन्वंतरावच्छिन्नं
शादिसंकलसलोकपालाधिकरणकपुत्रपौत्रसमन्वितशिवपुरादिसर्वलोकनिवा

सानंतरमंते विष्णुसायुज्यावाप्तिकामो वृषाधिकसालंकृतगोदानं करिष्ये॥ इति
संकल्प्य गणपूजनं संक्षिप्तपुण्याहवाचनमात्रं कृत्वा गोभ्यो नमः इति मंत्रेण गाः संपूज्य
॥ ब्राह्मणेभ्यो नमः इति ब्राह्मणांश्च यथाशक्ति वस्त्रालंकारादिभिः संपूज्य प्रार्थयेत्॥
तत्र मंत्राः॥ गावः सुरभयो नित्यं गावो गुग्गुलगंधिकाः॥ गावः प्रतिष्ठा भूतानां गावः
स्वस्त्ययनं महत्॥ अन्नमेव परं गावो देवानां हविरुत्तमं॥ पावनं सर्वभूतानां रक्षंति
च वहंति च॥ हविषा मंत्रपूतेन तर्पयंत्यमरानपि॥ महणां चहोत्दणा गावो होमे प्रति
ष्ठिताः॥ सर्वेषामेव भूतानां गावः शरणमुत्तमं॥ गावः पवित्रमपरं गावो मंगल
मुत्तमं॥ गावः सर्वस्य लोकस्य गावो धान्याः सनातनः॥ नमो गोभ्यः श्रीमतीभ्यः २१
सौरभेयीभ्य एव च॥ नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः॥ घृतक्षीर

प्रदा गावो घृतयोन्यो घृतोद्भवाः॥ घृतनद्यो घृतावर्तास्ता मे संतु सदा गृहे॥ इति गाः
संप्रार्थ्य वृषं प्रार्थयेत्॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक॥ अष्टमूर्तेरधि
ष्ठानमतः पाहि सनातन इति वृषं प्रार्थयेत्॥ ततः सजलतिलकुशानादाय अद्ये
त्यादि मम समस्तपापक्षयेत्यादि विष्णुसायुज्यावाप्तिकामो वृषाधिवरा तं गाः धे
नूपस्कराः सहिरण्यदक्षिणायुता रुद्रदैवतास्तन्मूल्योपकल्पितनिष्क्रयरजतमु
द्रा वा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृज्ये न मम इति तेन भगवान्परम
त्मा श्रीपरमेश्वरः प्रीयतां तत्सत् ब्रह्मार्पणमस्तु॥ तथा॥ कृतस्य सर्वस्य गोदानत
न कर्मणः सांगतासिध्यर्थं यथाशक्ति ब्राह्मणान् यथाकालं भोजयिष्ये॥ तथा॥ कृ
तस्य नानानामगोत्रेभ्यो ब्राह्मणेभ्यः यथाशक्ति भूयसीं दक्षिणां दातुमहमुत्सृज्ये॥

दा॰कं॰का॰

२२

अथवा॥ अद्येत्यादि॰ सवृषरुद्रदैवतसहिरण्यदक्षिणायुतयावत्संख्याकं कृतगोम
तमौल्योपकल्पितनिष्क्रयरजतमुद्रां वा नानानामगोत्रेभ्यो दातुमहमुत्सृजे तेन ममे
ति॥ ततो ब्राह्मणभोजनसंकल्पं कृत्वा नृत्यसींचदद्यादिति॥ ॥इति सवृषगोदानं॥ तदा
नप्रयोगः॥ ॥अथ सवृषगोदानादानप्रयोगः॥ ॥अथ सवृषदशगोदानं तत्र विष्णुपु
राणे॥ ॥दशगावः सवृषना वृषभैकादशी स्मृता॥ दत्वा तु ब्राह्मणेभ्यश्च स याति
परमां गतिं॥ शिवादिसर्वलोकेषु यथेष्टं मोदते नर इति॥ पुण्यकालेनदृ चिराचम्यप्रा
णानायम्य देशकालौ संकीर्त्य मम समस्तपापक्षयपूर्वकशिवादिसर्वलोकनिवासा
ति चिरसुसंनिध्यकामो वृषनाधिकदशगोदानं करिष्ये इति संकल्प्य गणपतिपूजनं २२
पुण्याहवाचनमात्रं कृत्वा गोभ्यो नम इति सवृषं गाः संपूज्य ब्राह्मणो यो न म इति ब्रा

ह्मणं यथाशक्ति वस्त्रालंकारादिभिः संपूज्य गावः प्रार्थयेदेतैर्मंत्रैः॥ गावो मामुपा
तिष्ठंतु हेमशृंग्यः पयोमुचः॥ सुरेभ्यः सौरभेय्यश्च सरितः सागराः स्ताथा॥ गावः प
श्यंतु मां नित्यं गावः पश्यंतु मां सदा॥ गावोस्माकं वयं तासां यतो गावस्ततो वयं॥
गावो ममाग्रतो नित्यं गावः पश्याम्यहं तिष्ठ पृष्ठतएवच॥ गावो मे सर्वतश्चैव गवां म
ध्ये वसाम्यहं॥ ॥इति गावः संप्रार्थ्य वृषभं प्रार्थयेत्॥ धर्मस्त्वं वृषरूपेण जगदानंद
दायक॥ अष्टमूर्तेरधिष्ठानमतः पाहि सनातन इति वृषंच प्रार्थयेत्॥ ततः सकु
शतिलमादाय अद्येत्यादि॰ मम समस्तपापक्षयपूर्वकशिवविरसुसंनिध्यावा
प्तिकामो वृषाधिकदशगाः॥ धेनूपस्कराः सहिरण्यदक्षिणायुता रुद्रदैवता स्त
न्मूल्योपकल्पितरजतमुद्रा वा नानानामगोत्रेभ्यो ब्राह्मणेभ्यो दातुमहमुत्सृजे नम

दा॰चं॰का॰ मेतिसंकल्पंकुर्यात्॥ ततोब्राह्मणैर्नोक्तंतनसंकल्पंकृत्वाभूयसींचदद्यात्॥ अथ
२३ वा॥ वृषाधिकधेनूपस्करसहिरण्यंदक्षिणायुतदद्यात्॥ रुद्रदेवताभ्यस्तस्मैचोपक
ल्पितरजतमुद्राः नानानामगोत्रेभ्योब्राह्मणेभ्योदातुमहमुत्सृजेतनममेत्युक्त्वाद
द्यात्॥ ब्राह्मणानोक्ततसंकल्पंकृत्वाभूयसींचदद्यादितिसंक्षेपः॥ ॥इतिसव
त्सगोदानप्रयोगः॥ ॥अथषोडशमहादानानि॥ कनकाश्वतिलानागदासी
रथमहीगृहाः॥ कन्याचकपिलाधेनुर्महादानानिवैदशेति॥ तत्रप्रथमंताव
त्सुवर्णदानंमहत्॥ दत्त्वासुवर्णस्यशतंविप्रेभ्यःश्रद्धयान्वितः॥ ब्रह्मलोकमनुप्रा
प्यब्रह्मणासहमोदते॥ गव्येनभूमिंकृत्वातुजलेनआक्लिन्नमध्येसितंतंडुलैश्च २३
॥सहेमहंकेसरभूषणाढ्यंसकर्णिकंचाष्टदलंविलिख्य॥ तस्मिन्हिरण्यंत्रातदा

नमात्रंविधायतस्योपरितंविनिवेश्येति॥ तत्रब्राह्मणंकमलासनस्थंसंपूज्यविप्रंकृत्वा
यथावित्तंवस्त्रालंकारादिभिःसंपूज्यदद्यात्॥ हेमाद्रौदानखंडे॥ देयंततोयजेत्पूर्वंत
तोविप्रंचपूजयेत्॥ तत्रमंत्रैःप्रदद्याद्धिसर्वदानेष्वयंविधिरिति॥ अद्येत्यादौतिममस
मस्तपापक्षयपूर्वकंमेरुदानसमफलावाप्तयेदेयद्रव्यतृतीयांशदक्षिणाहिरण्यसहि
तमिदंसुवर्णमग्निदैवतममुकगोत्रायामुकशर्मणेब्राह्मणायतुभ्यमहंसंप्रददेनम
मेतिदत्त्वापठेत्॥ हिरण्यगर्भगर्भस्थंहेमबीजंविभावसोः॥ अनंतपुण्यफलदमतः
शांतिंप्रयच्छमे॥ इतिकनकदानं॥ अथअश्वदानंमहाभारते॥ ॥सर्वोपकरणोपे
तंसुवानंदोषवर्जितं॥ योऽश्वंददातिविप्रायस्वर्गलोकेमहीयते॥ इतितत्र॥ ॥यावं
तिरोमाणिहयेतवंतिहिनरेश्वर॥ तावंतोवाजिदालोकान्प्राप्नुवंतीहपुष्कलानिति॥

वाजिसूर्यलोकात्॥ कौर्मेचरात्रैः पंचरात्रैरोप्यैः सुवर्णालंकृताक्रमात्॥ सदक्षिणंसव
त्सं चब्राह्मणायनिवेदयेत्॥ ब्राह्मणंपूजयित्वावस्त्रालंकारगंधपुष्पादिभिसमभ्यर्च्यद्दशात
॥अद्येत्यादि०॥ ममसमस्तपापक्षयपूर्वकाश्वरोमसममसंख्याकसूर्यलोकनिवासाव
प्तिकामोयमश्वः सर्वोपस्कररहिरण्यदक्षिणायुतोयमदैवतः गोत्रायशर्मणेतुभ्यमहं
संप्रददेनममेतिदद्यात्॥ दानमंत्रस्तु॥ उच्चैःश्रवास्त्वमश्वानांराज्ञांविजयकारक॥ सू
र्यवाहनमस्तुभ्यमतः शांतिंप्रयच्छमे॥ ॥इतिसामान्यतोश्वदानं॥ ॥दानविधिवि
शेषश्च गारुडे॥ अश्वमेधमखंयत्नकलौकर्तामुनीश्वराः॥ अश्वदानंतुतेनेह
कर्तव्यंविधिपूर्वकं॥ विधिंतस्यप्रवक्ष्यामिब्रह्मणानिर्मितंपुरा॥ श्वेतमश्वंकृत्वांता २८
तहेमकल्याणभूषितं॥ रूपैस्तुकटकैः शुद्धैः करिदंतोपशोभितं॥ वज्रदंतस्त

रैस्ताम्रैक्षौमपुच्छस्तवाससं॥ मुक्तेनपट्टकेनैकसंवृतंस्वायुधान्वितं॥ धान्यराशोपरि
स्थंतुवस्त्रैकच्छत्रपट्टक॥ एवंस्कृतेनसंवाश्वंब्राह्मणायनिवेदयेत्॥ मन्वादिपुगाद्य
पज्ञाविषुवापरागादिपुण्यकालेदानकार्यंब्राह्मणंपूजयित्वावस्त्रालंकारादिभिः संपूज्या
श्वंचसंपूज्यनिवेदयेत्॥ मार्तंडायस्तुवेगायपकाशयविमुक्तये॥ गगनोदिपायसूर्याय
त्रिवेदायनमोस्तुते॥ एवंसमुच्चरन्मंत्रकर्णेदद्यात्रिपोदकंदानवाक्यंतु॥ अद्ये
त्यादि०॥ गोत्रायशर्मणेब्राह्मणायेदंश्वेतवाश्वंसवर्णतिलकालंकारयुतंललाटमेव
यकंपूर्वोक्तालंकारैर्युक्तंगंधपुष्पार्चितंसूर्यदैवतंसकलब्रह्महत्यादिपापना
शकामोहमपरोमसमसंख्याकसूर्यलोकनिवासकामश्वसालंकृतायतुभ्यमहं
संप्रददेननममेति॥ ततोश्वप्रार्थना॥ महार्णवेसमत्पन्नउच्चैःश्रवसपुत्रकमयात्व

दानं॰का॰ विप्रमुख्यायदत्तोहयस्तुखीन्नवेत्॥ ततोविप्रप्रार्थनं॥ इयंविप्रनमस्तुभ्यंमया
तेप्रतिपादितं॥ प्रतिगृह्णीष्वविप्रेंद्रमयादत्तंसुखेतिनमिति॥ इतिदानमंत्र
२५ मुच्चार्यकर्णेसमर्पणंकृत्वाविप्रहस्तेजलंक्षिपेत्॥ ततःसुवर्णादिदक्षिणांद
द्यात्॥ विप्रोदेवस्यत्वेतिगृहीत्वायथाचारंवंकामस्तुतिंपठित्वास्वस्तीत्युक्त्वाश्व
मारुह्यगच्छेत्॥ दातापश्चादश्वपुरोगच्छेत्पदानांसप्तसप्तति॥ भास्करंमनसिध्या
त्वा॥ आलोकयस्वगृहंव्रजेत्॥ श्वेतमश्वंतुयोदद्यात्फलंदशगुणंलभेत्॥ एवंकृ
तेनमाख्यायसूर्यलोकंव्रजेन्नरइति॥ ॥इतिश्वेताश्वदानं॥ अथशिबिकायाश्चदा
नंगारुडे॥ शिबिकायाश्चमलंकृत्यसयः पर्वणिनिवेदयेत्॥ सोश्वमेधस्ययज्ञस्यफ २५
लमष्टगुणंलभेतइति॥ शिबिवधर्मेपि॥ शिबिकायाश्चदानमुक्तं॥ ॥अथतिलदा

नं॥ आदित्यपुराणे॥ वैशाख्यांपौर्णमास्यांवातिलान्क्षौद्रेणसंयुतान्॥ यःप्रयच्छेद्द्वि
जाग्रेभ्यःसर्वपापैःप्रमुच्यते॥ तथान्येष्टमासितिलांदद्यात्पौर्णमास्यांविशेषतः॥
अश्वमेधस्ययज्ञस्यफलमाप्नोतिमानवः॥ तथा॥ माघेमासितिलान्यस्तुब्राह्मणे
भ्यःप्रयच्छति॥ सर्वसत्वसमाकीर्णंनरकंनसपश्यतीति॥ ॥विष्णुधर्मोत्तरे॥ ॥ति
लागावोहिरण्यंचअन्नंकन्यावसुंधरा॥ दातव्यैतानिविधिवत्तारयंतीमहाभयात्
॥तथा॥ तिलस्नायीतिलोहोमीतिलोदकी॥ तिलभुक्तिलदानाचषट्तिलाःपापना
शनाः॥ इदंतुमाघमासपरं॥ अन्यत्रतुदानमेवच॥ कौर्मे॥ कृष्णाजिनेतिलान्कृत्वा
सुवर्णंमधुसर्पिषी॥ द्रोणैकंवाससाछन्नंत्रिधातत्रसदक्षिणं॥ ब्राह्मणायचतेद
त्वासर्वंतरतिदुष्कृतमिति॥ अद्येत्यादि॰ अमुकगोत्रायामुकशर्मणेब्राह्मणाय

दा०चं० २६

रक्तपूजितायकुलाग्निनस्थांसुवर्णमधुसर्पिषिरक्तवस्त्रच्छन्नतिलद्रोणंसोमदैव
तंसर्वपापक्षयकामस्त्वमहंसंप्रददेनममेतिकृतेनतिलद्रोणदानस्यसांगता
सिध्यर्थंइदंसुवर्णंअग्निदैवतंसदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिदद्यात्॥प्र
तिगृहीतातुदेवस्यत्वेतितत्त्वांगृह्यययाचारंखंकामस्कातिपठित्वासमापयेत्॥इति
तिलद्रोणविधिः॥ ॥अथतिलपात्रदानं॥ब्राह्मे॥ताम्रपात्रेतिलैःपूर्णंप्रस्थमात्रं
द्विजायच॥सहिरण्यंचयोदद्यात्सुसत्यंहश्रद्धयान्वितः॥सर्वपापविशुद्धात्मालभ
तेपरमांगतिं॥अद्येत्यादि०इदंतिलपूरितताम्रपात्रंसोमदैवतंसरक्तवर्णममु
कगोत्रायामुकशर्मणेब्राह्मणायाशेषपापक्षयकामस्त्वमहंसंप्रददेनममेति २६
मंत्रस्तु॥तिलस्वर्णयुतांतुभ्यंप्रददाम्याह्यघनाशनाः॥विष्णुप्रीतिकरानित्यमतः

शांतिंप्रयच्छमे॥प्रतिग्रहःपूर्ववत्॥इतिमाघ्यनित्यंतिलपात्रदानं॥अथमहातिलपा
त्रदानं॥ ॥कौर्मे॥ताम्रपात्रेतिलान्कृत्वापलैःषोडशकल्पिते॥रक्तंवर्णेनशक्त्याचात्य
र्घविप्रायप्रतिपादयेत्॥नाशयेत्रिविधंपापंवाग्मतःकायसंभवं॥तिलपूर्णंताम्र
पात्रंसहिरण्यंद्विजायवै॥प्रातर्दत्वातुविधिवत्दुःस्वप्नविनिहंतिसः॥ताम्रपात्रंवि
धिंप्रोक्तंकनिष्ठेन्तममध्यमं॥ताम्रपात्रंदशापलंजघन्यंपरिकीर्तितं॥द्विगुणंमध्य
मेप्रोक्तंत्रिगुणंचोत्तमंस्मृतं॥स्वर्णनिष्कंजघन्यंतुद्विगुणंमध्यमेक्षिपेत्॥त्रिगुणंचोत्त
मेतद्वद्रक्तवर्णंपरिकीर्तितं॥पलसंख्यातुनिष्कंयनिति॥संपादनेक्षयमित्वन्वे॥अ
न्यत्रदेशाचारतोव्यवस्था॥दानवाक्यंतुतिलपात्रदानवत्॥मंत्रस्तु॥यानिकानिचपा
पानिब्रह्महत्यासमानिच॥तिलपात्रप्रदानेनतानिनश्यंतिमेसदा॥इतिमहातिल

पात्रदानं॥ अथमातुरानृण्यत्वतिलपूर्णकांस्यपात्रदानं॥ आदित्यपुराणे॥ यत्नं सौत्रा
मणिंकर्तुंयदिशक्तिर्नविद्यते॥ महासंरस्तथा वापीकूपकर्तुंचदैर्घिकं॥ एतं ब्रूते मात्
ऋणान्मुक्तोभवतिमानवः॥ सदक्षिणं कांस्यपात्रं दत्वाचविप्रमुच्यते॥ शुद्धकांस्यपात्र
त्वस्यप्रमाणंयेचविंशतिः॥ पंचविंशतिपलानि॥ तिलनं नामत्रनिर्दिष्टं प्रस्थानां संख्या
कं॥ कवर्णमाषाः श्चत्वारः पात्रस्योपरिधारयेत॥ वस्त्रेणवेष्टयेत्पात्रं पिधायचस्र
क्चितः॥ स्नानंकृत्वानिसगायापितृदेवाश्चतर्पयेत्॥ ततोनिपूजयेद्देवंशंकरंहर
रिंएव वा॥ गोमयेनयंसंलिप्यगृहमध्यंचसर्वतः॥ तिस्वित्यद्दाद्दशारंकुंकुमेनाथ
रोचनेनः॥ ततोवृक्षिंकसंस्थापेहोमं कुर्याद्यवैंतिलैः॥ पद्मेपत्रंप्रतिष्ठाप्यपूजयेद्भ
क्तिभावतः॥ ततोब्राह्मणमाहूयवकुपुत्रंलसंमतं॥ पादैप्रक्षाल्यविधिवन्मातुः

श्राद्धंसमाचरेत॥ अथकृत्यंयथाशक्तिमाघ्यावान्नवासरे॥ ग्रहणेरविसोमान्योनं
चांतिष्ठुपुगादिक॥ तयात्यपिचयंद्दत्तंमाधातुद्दिश्यमातरं॥ तदक्षयफलंसर्वंपुराणा
हमहेश्वरः॥ जीवंतीतृषयेद्दत्त्वैर्मर्त्यैरपितुस्तर्पणैः॥ दत्वाविप्रस्यरत्नंत्या ब्रंहोमंकु
र्यात्प्रयत्नः॥ सोपस्करंसंतां बूलंदत्तमाप्यचविसर्जयेत॥ अन्येषामपिविप्राणां नोज
नानिप्रहापयेत॥ इति॥ अथास्यप्रयोगः॥ ॥माघ्यांपूर्वोक्तपुण्यकालेवा॥ यजमा
नःकृतनित्यक्रियःपर्वेतिद्वादशारंपद्मेककांस्यपात्रंप्रस्थसमतिलैः पूरितंस्थाप
यित्वाहरंहरिंवासंपूज्यतत्सुखोग्निरिदंविष्णुरितिमंत्रेयाद्दावंत्र्यंबकमहेत्यत्तरस्वातं
घृताक्ततिलैर्यवैश्चकृत्वाब्राह्मणमाहूयपुरुड.मुखउपवेश्यपादौपादप्रक्षालना
दिमातुःश्राद्धंसमाप्याचाम्यप्राणानायम्य॥ अद्येत्यादि०गोत्रायशर्मणेब्राह्म

मा०क०का०

२८

णायतत्कोपस्करयुतं मम मातुर्गर्भधारणयोष्यणामलमूत्रादिनानादुःखोद्भवाया
तृण्यत्वकामः इदं पंचविंशतिपलात्मकं कांस्यपात्रं प्रस्थसप्तकतिलैः पूरितं
मा माषचतुष्टयसुवर्णयुतवस्त्रसंवेष्टितं सर्वोपस्करयुतं तुभ्यमहं संप्रददे तेन म
मेति दद्यात्॥ मंत्रस्तु॥ कांस्यपात्रं॥ सकांस्यपात्रं मयादत्तं मातुरानृण्यकामया॥
भगवती तयेतुभ्यं यथाशक्ति तथापरं॥ दशमासांश्च उदरे जनन्यासंस्थितस्म मे॥
क्लेशितावालनेमातस्तनपाद्विजोत्तम॥ मलमूत्रादि मद्देहे पालिताया च मयाकृता
॥भवतो वचनाद्याम मम मुक्तिर्भवेद्ध्रुवात्॥ तिलसंख्याकृतं दुःखं जनन्या मम से
वितं॥ कांस्यपात्रप्रदानेन तत्कुसोत्तवाम्यहमिति॥ ततस्तत्स्थाहिरण्यं दक्षिणां दद्यात् २८
॥पुनर्मातिनिमित्तं होमं कृत्वा विसृज्य यथाशक्ति ब्राह्मणान्भोजयित्वा॥ सुहृद्युक्तो

भुंजीतेति॥ ॥इति मातुरानृण्यत्वतिलपूर्वकैककांस्यपात्रप्रयोगः॥ ॥अथ यतिलं
पूर्णकनकदानं वायवीये॥ कारकं तिलसंपूर्णं मंडले वह्निदेवते॥ शिवं वह्निवदाराध्यं
पूजयेत्करवीरकैः॥ पूजा तु रक्तचंदनेन॥ निर्यासैः सर्जरसं धूपेन धूपयेत्॥ वह्निमंडलं
त्रिकोणमंडलं॥ शिवं वह्निवदिति वह्निस्वरूपं शिवं॥ ब्रह्मांडपुराणे॥ आदर्शं वचतो
दद्याद्दीपानां च चतुष्टयं॥ वह्निरूपापतिः शंभुर्वह्निरूपा तिलाश्रयः॥ निजोरूपकृतं
पापं च स्तुपं च स्तुपं व्यपोहतु॥ इति दत्तेस्पनत्रयं तिपापान्यग्निकृतानि च॥ पाकहो
मेयुकाष्ठेषु हिंस्यते यानि वह्निना॥ अश्वावनदाहादिसंजातानि च यानि चै॥ विरुद्ध
करणोत्थानि रूपयोगोद्भवानि च॥ परदारपरद्रव्यपुत्रदर्शनजानि च॥ शावादिदर्श
नोत्थानि नेत्रदोषकृतानि च॥ य एवं कुरुते दाने शिवतत्त्वायतव्रतः॥ शिवलोके

वसोद्रूपकस्यत्रयत्र्यंशांकितः॥ ॥इतितिलपूर्णसुवर्णदानं॥ ॥अथगजदानंकौर्मे
॥ ॥दद्यात्गजंपुराणोक्तंमूल्यंपंचशतानिवा॥ वित्तानुसारात्तत्रापिकनिष्ठोत्तमम
ध्यमं॥ शतत्रयंहेमनाथदानमधममिति॥ रूप्यस्थूणाव्यंकरणंस्वर्णराजोविभू
षणं॥ सदक्षिणंवित्तशाठ्यात्दत्वाद्विजपुरंव्रजेत॥ स्थूणाः रज्जुः जारामौक्तिका
जाल्पागजालंकारः कौर्मे॥ यथालेनापपतेवायः प्रयछतिनिंदितं॥ ब्राह्मणा
यदरिद्रायस्वर्गलोकेमहीयतइति॥ ततोगजदानांगंद्विवंद्विजंगजंचसंपूज्यद
द्यात्॥ दानवाक्यंतुअद्येत्यादि॰ ममसर्वपापक्षयोत्तरसिद्धचारणसेवितार्थेवर्णा
किंकिणीजालमालिविमानारोहणोत्तरानेकमन्वंतरावछिन्नाप्सरजस्त्वस्थिरा
जत्वातद्विष्णुपुरावाप्तिकामस्त्वप्रीतिकामश्चसालंकृतायामुकगोत्रायामुक

शर्मणेब्राह्मणायेमंगजंकल्हाररज्जूस्थिरासनसहितंकांचनमालादिकीर्णंचामरगं
धपुष्पाद्यलंकृतप्रजापतिदैवतंतुभ्यमहंसंप्रददेनममेतिकरंधृत्वादद्यात्॥ करः
शुंडादंडः॥ कृतस्यतद्गजदानकर्मणः सांगतासिध्यर्थंइदंसुवर्णंअग्निदैवतंदक्षि
णात्वेनतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ ततोद्विजोगजमारुह्यदेवस्य॰ यथाशास्त्र
कास्तुतिंपठित्वाप्रतिगृह्णामिस्वस्तीतिवदेत्॥ यजमानोगजंप्रार्थयेदेतैर्मंत्रैः॥ ऐरा
वतश्चतुर्दंतोगजानांनायकः स्तुतः॥ दिग्दंतिनापूज्यतमः पापघ्नायतनः प्रभुः॥ सु
मतीतुगजत्वेनसरस्वत्यन्निषेचका॥ इंद्रस्यवाहनश्रेष्ठसर्वदैवश्चपूजिता॥ गजेंद्र
मत्तमातंगदैत्यसैन्यविनाशक॥ तवदानेनमेशांतिसर्वदस्तुमहत्सुखमिति॥ ब्राह्म
णेस्त्वथातुरत्युक्तोऽनुयसीदद्यादिति॥ ॥इतिगजदानप्रयोगः॥ ॥अथदासीदानप्र

दा०चं०का० योगः॥ वह्निपुराणे॥ स्थिरनक्षत्रसंयुक्ते सौम्ये सौम्यग्रहान्विते॥ दानकाले प्रशंसंति सं
३० तःपर्वणि वा पुनः॥ अलंकृत्य यथाशक्त्या वासोभिर्भूषणैस्तथा॥ ब्राह्मणाय प्रदात
व्या मंत्रेणानेन शक्तितः॥ पंचविंशाधिकात्मातु चत्वारिंशाब्द० त्समावधिः॥ दासी
द्विजाय दातव्या दासीदानेप्ययं विधिः॥ इत्यादि दानवाक्यं तु अद्येत्यादि गोत्राय श
र्मणे सालंकृताय सुवर्णालंकारवतीं गंधपुष्पार्चितां प्रजापतिदैवत्यां अमुष्य
सुखावासिकामस्त्रीयमहं संप्रददे न ममेति शिरं धृत्वा दद्यात्॥ द्विजप्रार्थनामं
त्रस्तु वह्निपुराणे॥ इयं दासी मया तुभ्यं सम्यग्वत्स प्रतिपादिता॥ सर्वकामकरी नि
त्याय थेष्टं तदश्नुते॥ ततः सुवर्णदक्षिणां दत्वा नमस्कुर्यात्॥ अनुगत्वा तु ३०
सीमायां द्विजं चैव विसर्जयेदिति॥ ॥इति दासीदानं॥ ॥अथ रथदानं कौर्मे॥

॥रथं चतुर्वल्लीवेदैरूढध्वजाप्रावृतं तथा॥ वित्तानुसारात्सौवर्ण्यरथोपकरणैर्युतं॥ स
दक्षिणं च विप्राय दत्वा दिवपुरं व्रजेत्॥ अश्वदंष्ट्राधान्यावृतं रथोपकरणानि युगयो
क्तौ वरत्रादीनि दक्षिणा च॥ त्रिशतमाषमितसुवर्णमुत्तमं द्विशतेन मध्यमं॥ अथ
मानशतेन कनिष्ठमिति त्रिविधमाह हेमाद्रिः॥ दानवाक्यं तु अद्येत्यादि गोत्राय शर्मणे साल
ंकृताय चतुर्वल्लीवेदैर्युक्तं सोपस्करं धान्याद्याच्छादनादियुतं विश्वकर्मदैवतं अमुष्य स्व
र्गादिसुखावाप्तिकामस्तुभ्यमहं संप्रददे न ममेति मंत्रस्तु॥ रथाय रथनाथाय नम
स्ते विश्वकर्मणे॥ विश्वरूपाय देवाय अरुणाय नमोस्तु ते॥ सुवर्णदक्षिणां दद्यात्॥ इ
ति रथदानं॥ ॥अथ गंत्रीदानं गारुडे॥ गंत्रीं तु रथसंयुक्तां यो ददाति द्विजातये॥ स
र्वकामसमृद्धात्मा स राजा जायते भुवि इति॥ गंत्रीरथविशेषः सा च तु निगजैरश्वैर्वा

षैवेयितान्यांचोपेतः दानवाक्यंतुपूर्ववत्॥ मंत्रः॥ मिमांप्रयच्छामिविश्वकर्माधिदेवता
॥ दानेनानेननागवल्भियतांमेनरः पुमानिति॥ ततः सुवर्णंदक्षिणांइतिमंत्रीसप्त
रयदानं॥ अथयत्रसंगांछिबिकादानंहेमाद्रौमात्स्ये॥ मार्गशुक्लेकादश्यांमाघफाल्गु
नयोः वैशाखेवाहिरण्मयंहरिमभ्यर्च्यरात्रौजागरंकृत्वाप्रातःकृतनित्यक्रियः अथै
त्यादि०गोत्रायशर्मणेसुपूजितायइमांशिबिकांतूक्तोपस्करांत्वांगिरीशदेवताइष्टेनो
गवाहयेतुभ्यमहंसंप्रददेनममेतिततःसुवर्णदक्षिणांदद्यात्॥ तत्रैववह्निपुराणे
॥ देवलोकेषुविपुलान्भोगान्नंतरयेमंते विष्णुसायुज्यवासिकामोविप्रस्यवर्यानं
शिबिकावाहकानांचवर्षपर्यंतमन्नंचदद्यादितिहेमाद्रिः॥ द्विजप्रार्थनामंत्रस्तु॥ शि
बिकेतिमयादत्तायथाशक्त्याविभूषिता॥ द्विजत्वंप्रतिगृह्णीष्वतांछिंतंतेनमोनचेदि

ति॥ ॥इतिशिबिकादानं॥ ॥अथमहिदानं॥ ॥कौर्मे॥ गोचर्ममात्रेभूखंडमधिकं
वासशक्तितः॥ त्रिधासदक्षिणांकृत्वाशिवपुरंव्रजेदिति॥ त्रिहेमकसुवर्णदक्षिणेत्यर्थ
ः अपिगोचर्ममात्रेणसम्यक्दत्तेनमानव॥ धौतपापोविशुद्धात्मास्वर्गलोकेमहीय
तइति॥ तथा॥ दशहस्तेनदंडेनत्रिंशद्दंडांनिवर्तनं॥ त्रिनागहीनंगोचर्ममानमाहप्रजा
पतिः तथागवांशतंवृषश्चैकोयत्रतिष्ठेदयंत्रितः॥ तद्धिगोचर्ममात्रेतुप्राकुर्षंदविदो
जनाः॥ तथाषष्टिवर्षसहस्राणिस्वर्गेवसतिभूमिदः॥ आच्छेत्ताचानुमंताचतावंति
नरकेवसेत्॥ तथाभूमियःप्रतिगृह्णातिभूमिंयश्चप्रयच्छति॥ तावुभौपुरुषौलोकेस
र्यमंडलभेदिनौ॥ तथा॥ यथाभूमिंप्रदानस्यकलांनार्हतिषोडशीं॥ दानान्यन्या
निमेदंगतिर्भूमिरानाद्ववेत्विहेति॥ दानवाक्यंतु॥ अद्येत्यादि०गोत्रायशर्मणेसा॥

लंकृतायषष्टिवर्षसहस्राणितस्वर्गेविष्णुपुरनिवासकामः सर्वपापक्षयकामोवा
सत्तांभूमिंसस्योरुवांसवृक्षफलपुष्पाद्युतांविष्णुदैवतांतुभ्यमहंसंप्रददेनममे
तिसाक्षतकुशतिलोदकंद्विजहस्तेदद्यादिति॥ब्राह्मणस्तुभूमिंप्रदक्षिणांकु
र्वन्स्वस्तिगृह्णीयात्॥देवस्यत्वेतियथाशाखंकामस्तुतिंपठित्वास्वस्तीतिवदेत्॥मां
डव्यवचनादत्रसुवर्णदक्षिणामता॥मंत्रस्तु॥अयाभूमिर्वराहेणसमुद्धृता॥
अनंतसस्यफलदाअतःशांतिंप्रयच्छमे॥यथा॥यस्यारोहंतुबीजानीवर्षाका
लेमैमहीतले॥भूमेःप्रदानात्सकलाममसंतुमनोरथाइतित्रिविधमेविश्वा
मित्रः॥ग्रामंवानगरेवापिविप्रेभ्योयःप्रयच्छति॥क्षेत्रंवासस्यसंयंतंदत्वापापै
ःप्रमुच्यतेइति॥भूमिपुराणेतुविश्वामित्रःस्वदत्तांपरदत्तांवायोहरेच्चवसुं

धरां॥षष्टिवर्षसहस्राणिविष्ठायांजायतेकृमिः॥इति॥सविष्ठायांकृमिर्भूत्वापितृ
भिःसहमज्जतीतिवाइतित्रिविधमेकंभूदानं॥॥अथगृहदानेकौर्मे॥शक्तितःसर्व
वित्तेनपूर्णंगृहमयित्रिधा॥सदक्षिणंद्विजेदत्वाब्रह्मलोकेव्रजेन्नरइति॥गारुडे॥ऐ
ष्टिकंदारुकंवापिमृन्मयंवापिशक्तितः॥सर्वोपकरणोपेतंयोदद्याद्विपुलंगृहं॥ब्रा
ह्मणायदरिद्रायचकुटुंबिने॥सर्वकामसमायुक्तोब्रह्मसायुज्यमाप्नुयादिति॥ब्र
ह्मवैवर्ते॥नगार्हस्थात्परोधर्मोनैवदानंगृहात्परं॥नानृतादधिकंपापंनपूज्योब्राह्मणा
त्परइति॥गृहनिर्माणप्रकारमाहनारदः॥स्नानागारंदिशिप्राच्यामाग्नेय्यांपचना
लयं॥याम्यांशयनगेहंचनैर्ऋत्यांशस्त्रमंदिरं॥वारुणमंदिरंवाराज्ञं॥प्रतीच्यांभोज
नागारंवायव्यांपशुमंदिरं॥भांडागारंतूत्तरस्यामैशान्यांदेवमंदिरमिति॥कुर्या

हा०चं० दितिशेषः॥ तत्र कूपे दिग्विशेषफलं देवीपुराणे॥ पूर्वमाश्रित्य कर्तव्यं कूपस्थानं ति
३३ ष्ठौ पिबा॥ न पूर्वम्प्रत्ययात्कुर्यान्मध्ये देवालयगृहादिति॥ कृतं तत्र यप्रदं लोके तथा
चास्याग्निजं भयं॥ वायव्यां वापि देवस्य तत्र यदं जायते कृतमिति॥ वाराहः पुष्टिस्या
तिं पुत्रहानिं पुरं ध्रीनाशं मृत्युं संपदं शत्रुबाधां॥ किंचित्सौख्यं दिक्क्रमपूर्वादिकुर्यात्कू
पो मध्ये गेहे मर्दहृदयं चेत्यादि॥ मात्स्ये॥ देवतापंचकं तत्र चत्वारिंशत्समावृतं॥ पू
जयित्वा स्वयं वास्तुशांतिं दद्यादित्यर्थः॥ अथ प्रसंगात्संक्षेपेण वास्तुशांतिप्र
योगः॥ ॥ कर्त्ता शुभदिने॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य॥ अस्य वास्तो
ः शुभतासिध्यर्थं वास्तुशांतिं करिष्य इति संकल्प्य॥ तदंगतया गणेशपूजां स्वस्ती ३३
वाचनं मातृकापूजां नांदीश्राद्धं आचार्यब्रह्मऋत्विग्वरणादि कृत्वा यथाविभवं

स्यालंकारादिभिः पूजयेत्॥ ततः आचार्यो यदत्र संस्थितं० अपक्रामंतु भूताना
मित्येताभ्यां० भूतप्रेतपिशाचाद्या अपक्रामंतु राक्षसाः॥ स्थानादस्माद्व्रजं त्वन्यत्स्वी
करोमि भुवं त्विमामित्यनेन सर्षपान्विकीर्य पंचगव्येन शुचीवोहव्यमिति तच्चेनए
तो त्विंद्रमित्यृचेन गृहं संप्रोक्ष्य गृहमध्ये प्राच्यामैशान्यां वा चतुरंगुलोच्चहस्तमितं च
तुरस्रं स्थंडिलं कृत्वा तस्यैशानादिकोणचतुष्टये चतुरो लोहकीलान् विघ्नांतु भूतले
नागलोकपालाश्च सर्वशः॥ अस्मिन्नाहे भवंतिष्ठंत्वायुर्बलकराः सदेति मंत्रेण नि
खनेत्॥ प्रतिकीलं मंत्रावृत्तिः॥ ततः ईशानादिक्रमेण चतुर्षु कोणेषु० अग्निभ्यो॥
प्यथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः॥ तेभ्यो बलिं प्रयच्छामि पुण्यमोदनमुत्तमं इति
मंत्रावृत्त्या माषभक्तबलिं दत्त्वा स्थंडिले कुंकुमादिना हेमरौप्यशलाकया वा प्रा

कपश्चायतः प्रागंतानुदक्संस्थाः पंक्तिगुह्योत्तराग्र्यावादिनमोंतैर्देवतानामभिर्द
शरेखाः कुर्यात्॥ ॐ शांतायैनमः १ ॐ यशोवत्यैनमः २ ॐ कांतायैनमः ३ ॐ
विशालायैनमः ४ ॐ प्राणवाहिन्यैनमः ५ ॐ सत्यैनमः ६ ॐ सुमत्यैनमः ७ ॐ
नंदायैनमः ८ ॐ सुभद्रायैनमः ९ ॐ सुरथायैनमः १० इति दशरेखाः कृत्वा तथा॥
ॐ हिरण्यायैनमः १ ॐ सुव्रतायैनमः २ ॐ लक्ष्म्यैनमः ३ ॐ विभूत्यैनमः ४ ॐ वि
मलायैनमः ५ ॐ प्रियायैनमः ६ ॐ विजयायैनमः ७ ॐ ज्वालायैनमः ८ ॐ विशो
कायैनमः ९ ॐ इडायैनमः १०॥ इति दक्षिणोत्तरायताः प्राक्संस्था दशरेखाः
कुर्यात्॥ एवमेकाशीतिपदमंडलं संपद्यते॥ तत्र मध्यस्थनवकोष्ठानि रेखामार्जने ३४
नैकीकुर्यात्॥ एतन्नवपदं ब्रह्मस्थानं॥ तस्य चतुर्दिक्षु चत्वारि पदानि॥ विदिक्षु

षट्खलाकाराणि द्वादशकोणचतुष्टयोन्नयतश्चाष्टौ विंशतिविंशत्येकपदानि॥ अ
वशिष्टानि प्रतिदिशं पंचपंचविंशतिद्विपदानि तेषु पूर्वाद्येश्चतुर्थ्यंतैर्नमोंतैर्व
क्ष्यमाणनामभिर्देवता आवाह्य स्थापयेत्॥ तत्रेशानकोणपदे वास्तोः शिरसि ॐ शि
खिनेनमः॥ शिखिनं आवाहयामि १ तद्दक्षिणैकपदे दक्षिणनेत्रे पर्जन्याय० पर्जन्यं०
२ तद्दक्षिणे ततोपि पश्चिमत इति पदद्वये दक्षिणश्रोत्रे ॐ जयंतायनमः जयंतं ३ त
द्दक्षिणपदद्वये दक्षिणांसे ॐ कुलिशायुधायनमः॥ कुलिशायुधं आवा० ४ तद्दक्षि
णपदद्वये दक्षिणबाहौ ॐ सूर्यायनमः सूर्यं० ५ तद्दक्षिणपदद्वये दक्षिणवाहवे ॐ स
त्यायनमः सत्यं आ० ६ तद्दक्षिणपदे दक्षिणकूर्परे ॐ भृशायनमः भृशं आ० ७ त
द्दक्षिणे सपंक्तिगतैकपदे दक्षिणप्रबाहौ ॐ आकाशायनमः आकाशं आ० ८

वा०चं०का० ॥आग्नेयकोणपदेदक्षिणप्रबाहवे॥ॐ वायवेनमः वायुंआ०९ एतत्पश्चिमैकपदे
३५ दक्षिणमणिबंधे ॐ पूष्णेनमः पूषणंआ०१० तत्पश्चिमेतेततोस्युत्तरतइतिपदद्व
येदक्षिणपार्श्वे ॐ वितथायनमः वितथंआ०११ तत्पश्चिमपदद्वयेदक्षिणपार्श्वे
ॐ गृहक्षतायनमः गृहक्षतंआ०१२ तत्पश्चिमपदद्वयेदक्षिणोरौ ॐ यमायनमः
यमंआ०१३ तत्पश्चिमपदद्वयेदक्षिणजानौ ॐ गंधर्वायनमः गंधर्वंआ०१४ तत्प
श्चिमपदद्वयेदक्षिणजंघायां ॐ भृंगराजायनमः भृंगराजंआवा०१५ तत्पश्चिमे
बाह्यपंक्तिगतैकपदेदक्षिणस्फिचि ॐ मृगायनमः मृगंआ०१६ नैर्ऋतिकोणप
देपादयोः ॐ पितृभ्योनमः पितॄनावा०१७ तदुत्तरैकपदेवामस्फिचि ॐ दौवा
रिकायनमः दौवारिकंआ०१८ तदुत्तरेततोपिप्रागितिपदद्वयेवामजंघायां ३५

ॐ सुग्रीवायनमः॥सुग्रीवंआ०१९ तदुत्तरपदद्वयेवामजानौ ॐ पुष्पदंतायनम
:पुष्पदंतंआ०२० तदुत्तरपद्व॰द्वयेवामोरौ ॐ जलाधिपायनमः जलाधिपं
आ०२१ तदुत्तरपदद्वयेवामपार्श्वे ॐ असुरायनमः असुरंआ०२२ तदुत्तरपदद्व
ये[illegible]पदत्रयवामजठरभागे ॐ मित्रायनमः मित्रंआवा० वामपार्श्वे ॐ शोषाय
नमः शोषंआ०२३ तदुत्तरेबाह्यपंक्तिगतैकपदेवाममणिबंधे ॐ पापायनमः पापंआ
०२४ वायव्यकोणपदेवामप्रबाहवे॥ॐ रोगायनमः रोगंआ०२५ तत्प्रागेकप
देवामप्रबाहावेव॥ॐ अहिर्बुध्न्यायनमः अहिर्बुध्न्यंआ०२६ तस्मात्कृगुत्तरतोपि
दक्षिणेवेतिपदद्वयेवामकूर्परे ॐ मुख्यायनमः मुख्यंआ०२७ तस्मात्कृपदद्वयेवा
मबाहौ ॐ भल्लाटायनमः भल्लाटंआ०२८ तस्मात्कृपदद्वयेवामबाहवेव ॐ सोमा

वा०चं०
३६

यनमः सोमंआ०२९ तत्पाकूपदद्वयेवामांसेॐ सर्पेभ्यो नमः सर्पान्आ०३० तत्पाकू
पदद्वयेवामश्रोत्रेॐ अदितेनमः अदितिंआ०३१ तत्पाक्कूबाह्यपंक्तिगतकेपदेवा
मनेत्रेॐ दितेनमः दितिंआ०३२ ततः आग्नेयकोणपदाधः कोणपदेवामहस्ते
ॐ अद्भ्योनमः अपः आ०३३ नैर्ऋत्यपदाधः कोणपदेवामहस्तेॐ सावित्र्यनमः सा
वित्रंआ०३४ वायव्यकोणाधः कोणपदेवामहस्तेॐ जयायनमः जयंआ३५ तत
ःईशानकोणपदाधः कोणपदेमेढ्रेॐ रुद्रायनमः रुद्रंआ०३६ ततमध्यगतनव
कोष्ठेब्रह्मपदसंलग्नप्राणादिपदत्रयेदक्षिणहस्तेॐ अर्यम्णेनमः अर्यमणंआ
०३७ तद्दक्षिणैकपदेदक्षिणहस्तेॐ सवित्रेनमः सवितारंआ०३८ ततश्चिमब्रह्मसं
लग्नपदत्रयेजठरदक्षिणनागेॐ विवस्वतेनमः विवस्वंतंआ०३९ ततश्चिमैक ३६

परेपृष्ठवृषणयोः ॐ विबुधाधिपायनमः विबुधाधिपंआ०४० तदुत्तरब्रह्मसंलग्नपद
त्रयवामजठरनागेॐ मित्रायनमः मित्रंआ०४१ तदुत्तरैकपदेवामहस्तेॐ राजयक्ष्म
णेनमः राजयक्ष्माणंआ०४२॥ तत्पाकूपदत्रयेवामहस्तेॐ पृथ्वीधरायनमः पृ
थ्वीधरंआ०४३ तत्पागेकपदेउरसिॐ आपवत्सायनमः आपवत्संआ४४ ततोम
ध्यमेनवपदेहृन्नाभ्योः ॐ ब्रह्मणेनमः ब्रह्माणंआ०४५ तदुत्तरेवास्तोष्पतेवसिष्ठोवास्तो
ष्पतिस्त्रिष्टुप्॥ वृषवास्तुप्रतिष्ठापनेविनियोगः॥ ॐ वास्तोष्पतेप्रतिजानीह्य०इति
सुवर्णादिप्रतिमाम्अस्युत्तारणपूर्वकंसं०४६ वास्तोष्पातिंमंडलाद्बहिरीशानादिकोण
चतुष्टयेषुॐ चरक्यैनमः चरकींआ०४७ ॐ विदार्यैनमः विदारींआ०४८ ॐ पूतनायैन
मः पूतनांआ०४९ ॐ पापराक्षस्यैनमः पापराक्षसींआ०५० ततः पूर्वादिचतुर्दिक्षु

दा०चं० ॐ स्कंदाय नमः स्कंदं आ० ५१ ॐ अर्यम्णे नमः अर्यमणं आ० ५२ ॐ जंभकाय नमः जं
३१ भकं आ० ५३ ॐ पिलिपिच्छाय नमः पिलिपिच्छं आ० ५४ ततः पूर्वादिदिक्षु ॐ इंद्राय
नमः ५५ ॐ अग्नये नमः ५६ ॐ यमाय नमः ५७ ॐ निर्ऋतये नमः ५८ ॐ वरुणाय नम
ः ५९ ॐ वायवे नमः ६० ॐ कुबेराय नमः ६१ ॐ ईशानाय नमः ६२ इत्यावाह्य वास्तुदे
पीठदेवताभ्यो नमः इति संपूज्य मंडलादीशान्यां कलशं संस्थाप्य तत्र वरुणाय नमः इति
वरुणं संपूज्य प्रार्थयेत्॥ यथा मेरुगिरेः शृंगं देवानामालयः सदा॥ तथा ब्रह्मादिदे
वानां गृहे मम स्थिरो भव॥ इति संप्रार्थ्य॥ ततः स्वतंत्रकुंडे स्थंडिले वाग्निं स्थापनादि च हुष्यंते
दुंबरादिसमित्तिलाज्यैर्वास्तुमंडलदेवताभ्यो नाममंत्रैर्वास्तुमंत्रेण कृत्वा स्विष्ट ३१
कृतादि पूर्णाहुत्यंतं कुर्यात्॥ ततो मंडलदेवताभ्य एभिः निरामिषपायसबलिं नम

इत्यादि बलीन्दत्वा कृणुष्व पाज इति सूक्तादिना मंडलं त्रिः सूत्रेणावेष्टयित्वा कलशोद
केन यजमानमभिषिंच्य पुनः संपूज्य यथाशक्ति दक्षिणां दत्वा ब्राह्मणान्भोजयेदिति के
चित्॥ नारदातिलके तु होमो नोक्तः तिलादिद्रव्याणां विकल्प इति मयूखकाराः॥ इदा
नीं तु नवग्रहसंकलितप्रयोगं कुर्वंति सांप्रदायिकाः॥ तद्यथा॥ यथा मेरुगिरेः शृंग
मिति प्रार्थनांतरं वास्तुमंडलनैरृत्यां पश्चिमायां वा कुंडे स्थंडिले वा वरदनामकमग्निं
प्रतिष्ठाप्याग्नेरीशान्यां गृहकलशं संस्थाप्य तत्र वरुणं संपूज्य देवदानवसंवाद इत्यादि
ः संप्रार्थ्यान्वादध्यात्॥ अस्मिन्वास्तुशांतिकर्मण्यन्वाधानकं अस्मिन्नित्यादि चक्षु
ष्यंतमुक्त्वा॥ अत्र प्रधानं आदित्यं० सोमं० अंगारकं० बुधं० गुरुं० शुक्रं० शनैश्चरं०
राहुं० केतुं० एताः प्रधानदेवताः प्रत्येकं अष्टोत्तरशत अष्टाविंशति अष्टसंख्याका

द्वा॰ चं॰ ३८

मिः॥ वा अर्कादिसमिद्भिर्वा आज्याहुतिभिः तथा॥ ईश्वरं॰ उमां॰ स्कंदं॰ विष्णुं॰ ब्रह्माणं॰ इ
न्द्रं॰ यमं॰ कालं॰ चित्रगुप्तं॥ अग्निं॰ अपः॰ भूमिं॰ नारायणं॰ इंद्रं॰ इंद्राणीं॰ प्रजा
पतिं॰ सर्पान्॰ ब्राह्मणं॰ विनायकं॰ दुर्गां॰ वायुं॰ आकाशं॰ अश्विनौ॰ वास्तोष्प
तिं॰ क्षेत्रपालं॰ इंद्रं॰ अग्निं॰ यमं॰ निर्ऋतिं॰ वरुणं॰ वायुं॰ कुबेरं॰ ईशानं॥ एताः॥
प्रधानदेवतान्येन तत्तत्समिद्भिर्वाज्याहुतिभिः तथा॥ शिखिनं॰ पर्जन्यं॰ जयंतं॰
कुलिशायुधं॰ सूर्यं॰ सत्यं॰ भृशं॰ आकाशं॥ वायुं॰ पूषणं॰ वितथं॰ ग्रहक्षतं॰ य
मं॰ गंधर्वं॰ भृंगराजं॰ मृगं॰ पितॄन्॰ दौवारिकं॰ सुग्रीवं॰ पुष्पदंतं॰ जलेशं॰ असुरं॰ शो कृतं.
षापं. षं॰ रोगं॰ अहिं॰ मुख्यं॰ भल्लाटं॰ सोमं॰ सर्पान्॰ दितिं॰ अदितिं॰ आपं॰ सावित्र ३८
॰ जयं॰ रुद्रं॰ अर्यमणं॰ सवितारं॰ विवस्वंतं॰ विबुधाधिपं॰ मित्रं॰ राजयक्ष्माणं॥

॰ पृथ्वीधरं॰ आपवत्सं॰ ब्रह्माणं॰ चरकीं॰ विदारीं॰ पूतनां पापराक्षसीं॥ स्कंदं॰ अर्य
मणं॰ जृंभकं॰ पिलिपिच्छं॥ एताः प्रधानदेवताः प्रतिद्रव्यमष्टोत्तरशताष्टाविंशतिर
ष्टसंख्याकाभिर्वायवद्धताक्तातिलसमिदाज्यपायसाहुतिभिः वास्तोष्पतिमेते
रेवद्रव्यैः अष्टोत्तरसंख्यया वास्तोष्पतिं चतुर्वारं वरुणं वास्तोष्पतिं पंच पंचवारं पं
चभिर्बिल्वफलैः तो॥ द्विजैर्वा पक्षे॥ शेषेण स्विष्टकृतमित्यादि आज्यभागांते यजमा
नं उपस्थितं हवनीयद्रव्यान्वाधाने कृतं देवताभ्यः॥ न मम इत्युक्त्वा त्यजेत्॰ आचार्या
दयः ग्रहेभ्यो होमं कृत्वा यवतिलसमिदाज्यपायसैः॰ शिख्यादि पिलिपिच्छांताभ्य
स्तु पंचाशद्देवताभ्यो नाममंत्रैः प्रत्येकमष्टाविंशत्यष्टसंख्याकाभिराहुतिभि
र्हुत्वा वास्तोष्पतिमेतैरेव द्रव्यैर्विधिवद्धितसंख्यया हुत्वा अथवा यत्नाद्वा वास्तोष्पतद्

हो॰चं॰का॰ तिचतसृभिःप्रत्यृचंऋगंतेस्वाहाकारंयजंजपेत्॥ नात्रस्वाहाकारांतेहोमः यवादि
होमेतुवास्तोष्पतइतिचत्वारोमंत्राः एकैकेनमंत्रेणसप्तविंशतिसप्तविंश
३५ तिराहुतयइत्यस्मातं॥ ततएतैश्चतुर्भिर्वास्तोष्पतिध्रुवास्थूणानित्यकयाच
एवंपंचभिःपंचबिल्वफलानितद्धीनानिवाहुतयः ततआचार्यःस्विष्टकृ
दादिप्रायश्चित्तादिहोमांतेयजमानोलोकपालेभ्योगृहयीवदेवताभ्यश्चबलिं
दत्वापूर्णाहुतिंकृत्वाशिख्यादिपंचत्वारिंशद्देवताभ्यः शिखिनेएषपायसब
लिर्नमइत्यादियुक्तिपूर्वकंसर्वेभ्योपिबलिंदद्यात्।शिख्यादिप्रीतयेकांचनंद्विजे
भ्योब्रह्मप्रीतयेधेनुंचदद्यात्॥ ततोगृहककर्त्रीवास्तुकलशोदकेनऋत्विजै ३५
श्चोक्तसृग्भिःअभिषिक्तोयजमानोऋत्विग्भ्योदक्षिणांदत्वावाद्यादितूर्यघो

षपूर्वकंआचार्यऋत्विग्भ्यःसकुटुंबोयजमानःरक्षोघ्नपावमानमंत्रैर्गृहंत्रिःस
च्यावेष्टयित्वासमंत्राव्रीहियवमतीभिरद्भिर्हिरण्यमवधायशंतातीयेनशान्त
हुंत्राग्रीतिपंचदशर्चाऋग्भिरितिनारायणवृत्तिःशंतातीयेनईळेद्यावापृथिवी
तिपंचविंशतिऋग्भिःसमुच्चयेनवेत्यन्ये॥ तेनतच्चार्थंकानचोत्तरं॥ त्रिःप्रद
क्षिणंपरिव्रजन्सोत्सव्यविच्छिन्नांक्षीरधारांचपरितोदत्वावास्तुपीठमध्यनव
पदेसुरूपांपृथिवींध्यात्वापृथिव्यैनमइतिसंपूज्य॥ सर्वदेवमयंवास्तुंसर्वदे
वमयंपरमितिपठित्वातद्गृहस्याग्नेयकोणेयजमानपदेनजानुमात्रंगर्तंकृत्वा
मध्येगोमयेनोपलिप्यसुत्रंचंदनंपुष्पाक्षतैःअलंकृत्यसप्तधान्यबीजानिद
ध्योदनंचक्षिप्त्वातवजलपूर्णकलशंमधुक्षेत्रकपुष्पयुतंगंधाद्यर्चितमादायजा

नुस्याममवनींगत्वातज्जलेगर्ते ॐ नमोवरुणायतिमंत्रेणजलंक्षिपेत्॥जलेप्रद
क्षिणावर्तेपुष्पेचोर्ध्वमुखेशुभे॥ततोपक्वमृत्पेटिकायांरत्नाद्यादिसप्तधान्यबी
जानिदध्योदनंशेवालपुष्पाणिचक्षिप्त्वातूर्यघोषेणस्थापितरूपवास्तुप्रतिमामा
नीयपेटिकायांसंस्थाप्यपेटिकांपिधायपठेत्॥पूजितोसिमयावास्तोहोमाद्यैरर्च
नैःशुभैः॥प्रसीदपाहिविश्वेशदेहिमेगृहजंसुखं॥वास्तुमूर्तेनमस्तेस्तुभूशय्या
भिरतःप्रभो॥मद्गृहंधनधान्यादिसमृद्धंकुरुसर्वदा॥ततोमृत्पेटिकांगर्तेसंस्थाप्य
॥सकृतेक्षसागरांपृथ्वीयथावहसिमूर्धनि॥तथामांवहकल्याणसंपत्संततिभि
ःसहेति॥इतिसंप्रार्थ्यतयैवमृदागर्तंपूरयेत्॥मृदाधिक्येत्वधिकंफलं॥साम्ये ४०
समं॥न्यूनत्वेन्यूनं॥गर्तोपरिगोमयेनोपलिप्यगंधपुष्पाक्षतादिक्षिपेत्॥तत

ःआचार्यब्रह्मऋत्विजश्चसंपूज्यतेभ्योदक्षिणांदत्वागृहपीठदेवतावास्तुपीठदे
वताश्चसंपूज्य॥उत्तिष्ठ०॥अम्यारमि०॥यांतुदेवगणाइतिविसृज्यगृहपीठवास्तु
पीठाद्याचार्यायदद्यात्॥ततःआचार्यःप्रणीताविमोकादिस्विष्टकृत्समाप्याग्निं
विसर्जयेत्॥ततोयजमानोब्रह्मविरष्टुदेशेनशतंवाक्रमाद्वाब्राह्मणान्भोजयि
ष्ये॥इतिसंकल्प्यविप्रान्संपूज्यतेभ्यआसनंदत्वाप्रसादात्कुर्वंताकर्मेति॥यस्यस्मृत्ये
तुस्क्ताकर्मेश्वरार्पणंकृत्वाब्राह्मणान्भोजयित्वातेभ्यःस्त्रीवंवास्तुत्रिरुक्त्वाशिवं
वास्त्वितिविप्रास्त्रिर्ब्रूयुः॥ततोयथासुखंगृहप्रवेशकोभुंजीतेति॥एवंविधानाप्र
तिसंवत्सरंवास्तुपूजनंकार्यं॥तेनगृहसंबंधिदुःखंप्राप्नुयादित्युक्तंदानविवे
के॥॥महादेवतनूजेनश्रीदिवाकरसूरिणाविरचितेवास्तुशांतेस्तुपद्धतौ

द्रौ॰चं॰का॰ तिर्बुधतोषदा॥ इतियोराणंवास्तुशांतिप्रयोगः समाप्तिमगमत्॥ ॥इदानींसूत्रो
६१ क्तवास्तुशांतिरभिधीयते॥ साचद्विजातीनांपूर्वोक्तयासमुच्चीयते॥ पूर्वोक्तायां
त्वशक्तौस्वस्वगृह्योक्तैवकर्तव्या॥ तथापिसिद्धेः॥ बह्वृच्यवास्वगृह्योक्तयस्यक
र्मप्रकीर्तितं॥ तस्यतावतिशास्त्रार्थेकृतेसर्वः कृतोभवेदितिवचनात्॥ येषां
गृह्येनास्तितेषांशूद्राणांचपूर्वोक्तैव॥ तस्याः सर्वत्रसाधारण्येनविधानात्॥ अ
तश्चनशूद्रमात्रविषयं॥ तस्मात्गृह्योक्तापूर्वयासमुच्चीयतेसांप्रदायिकैः
॥ ॥अथाश्वलायनगृह्योक्तावास्तुशांतिप्रयोगः॥ ॥तद्यथा॥ काष्ठादिनिर्मित
संपन्नधान्यादिसर्वोपस्करायुतंशोभनेमुहूर्तेब्राह्मणैः सहतूर्यघोषेणगृहंप्र ६१
विश्यागारमध्येप्राङ्मुखउपविश्यदर्भेषुदर्भान्धारयमाणः आचम्यपत्न्यासह

न
प्राणानायम्यदेशकालौसंकीर्त्यममास्यवास्तोः श्रुततासिध्यर्थंवास्तुशांतिंकरिष्ये
इतिसंकल्प्य॥ तदंगत्वेनगणपतिपूजनंपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंच
कृत्वापूर्वोक्तवास्तुपीठदेवतास्थापनार्चनहोमबलिदानविसर्जनागृहवेष्टनाभि
षिंचनब्राह्मणभोजनसंकल्पांतंकृत्वाआश्वलायनगृह्योक्तांवास्तुशांतिं
कुर्यात्॥ शुचौदेशेचतस्रः शिलाः संस्थाप्यतासुदूर्वानिधायतत्रमणिका
सहितंकुंडंसंस्थापयेदेतैर्मंत्रैः॥ पृथिव्यामधिसंभवेतिअश्वंगरोवावदीति
त्रेधाबद्धोवरत्रया॥ इरामुहप्रशंसत्यनिरामपबाधतामितिवा॥ ततोमणि
केजलमासिंचेदनेनमंत्रेण॥ ॐ एतुराजावरुणोरेवतीभिरस्मिंस्थानेतिष्ठ
तुमोदमानः॥ इरांवहंतोघृतमुक्षमाणामित्रेणसाकंसहसंविशंत्विति॥

शां०च०
४२
ततः तज्जलंपात्रांतरमादायतस्मिंदूर्वाशमीशाखामुदुंबरीशाखांवाव्रीहियवान्कूर्चं
मूलंदक्षिणंचक्षिप्त्वादूर्वाग्निःशाखाभ्यांचसर्वगृहंप्रागादितःप्रदक्षिणंपरिव्रजन्नभ्यु
क्षेत्तिसकृतेन।।वानइंद्राग्नीतिपंचदशर्चस्यसूक्तस्यवसिष्ठोविश्वेदेवास्त्रिष्टु
प्।गृहप्रोक्षणेविनियोगः।।सकृत्सूक्तपाठः।। ।।इतिनारायणवृत्त्यनुरोधा
त्।। ।।वस्तुतस्तुशंतातीयेनेति।।इमेद्यावितिवर्गपंचकेरित्युक्ते।।एवंसंतिसमु
च्चयेनकोपिविरोधः।।तद्विद्यायां।।इच्छेद्यावेतिपंचविंशर्चस्यसूक्तस्यास्यसुतआ
श्विनमोद्यौःपादौलिंगोक्तदेवताजगत्योंत्यात्रिष्टुप्।गृहप्रोक्षणेविनियोगः।।ॐ
इच्छेद्यावा०२५।।अत्रापिसकृद्देवसूक्तपाठः।।ततःप्रागादिकेतस्मिन्नविच्छिन्ना ४२
मुदकधारांदद्यादनेनापोहिष्ठेतितृचेन।।आपोहिष्ठेतितृचेनअंबरीषःसिं

धुद्वीपऋषिरापोगायत्री।।गृहासमंताधारायांविनियोगः।।ॐआपोहिष्ठा०अत्रापिस
कृद्देवपाठः।।ततोवास्तुपीठंनैरृत्यांपश्चिमायांवाकुंडेस्थंडिलेवागृह्याग्निंवरदना
मकंप्रतिष्ठाप्यचत्वारिशृंगेतिध्यात्वातस्मिन्वास्तोष्पतिस्थालीपाकेअन्वाधानं।।अ
स्मिंनन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वाअत्रप्रधानंवास्तोष्पतिंचतु
र्वारंचरुणाशेषेणस्विष्टकृतमित्यादिसद्योयक्ष्येइत्युक्त्वान्वाधायइध्माबर्हिषिसं
नह्यपरिसमूहनादिपूर्णपात्रनिधानांतंकृत्वावास्तोष्पतयेचतुःकृत्वःतूष्णींनिरु
प्यतत्संस्थायातथैवप्रोक्षणावघाताद्याज्यभागांतंकृत्वाअवदानधर्मेणचरुमवदाय
वास्तोष्पतइतिचतसृणांवसिष्ठोवास्तोष्पतिस्त्रिष्टुप्।अंत्यागायत्री।।वास्तोष्प
तिप्रधानचरुहोमेविनियोगः।।ॐवास्तोष्पते०अरुगंतेस्वाहाकारंपवनजुकु

यात्॥स्वाहाकारांतेहोमः॥एतद्येतुप्रत्यृचंकृत्वास्त्रुकैः॥एवंसर्वत्र॥पुनश्चरुमवदा
यॐवास्तोष्पतेप्रतरणो॰वास्तोष्पतयइदं॥ॐवास्तोष्पतेशग्मयासं॰वास्तोष्प
तयइदं॥ॐअमीवहावास्तो॰वास्तोष्पतयइदं॰त्यागंसर्वत्रत्यजेत्॥ततःस्विष्ट
कृदादिहोमशेषंसमाप्यशिष्टेनचरुणान्नेनस्वादुव्यंजनपायसादियुतेनचतंब्रा
ह्मणात्ततदर्धंतदर्धंब्राह्मणान्भोजयेत्॥होमात्पूर्वंत्यागत्वागोनकार्यः॥ततःशि
वंवास्तुशिवंवास्तुशिवंवास्त्विति ब्राह्मणान्ब्रूयात्॥तेःशिवंवास्तुशिवंवास्तुशिवं
वास्त्विति त्रिःप्रत्यूचुः सुहृद्युतोभुंजीतेति॥विश्रामार्थगृहसज्जीकरणेपीष्यते॥वा
स्तोष्पतिस्थालीपाकःसाधारणत्वंगतिवत्॥इत्याश्वलायनगृह्योक्तवास्तुशां
तिप्रयोगः॥ ॥अथगृहदानप्रयोगः॥ ॥यजमानःकृतनित्यक्रियःपुण्यकाले

गृहमध्येदक्षिणभागेचंदनेनाष्टदलंपद्मंविलिख्यतदुपरिप्रस्थमात्रंतिलान्निक्षिप्य
तदुपरिशय्यांसोपस्करांस्थापयित्वाशय्योपरिसौवर्णमयंगृहोपेयावक्ष्यमाणमंत्रैर्गृ
हंप्रवेशयेत्॥तेचमंत्राः॥एतद्धिनारायणदिव्यरूपंसर्वामरैर्वंदितपादपद्मं॥प्रा
नाप्रमानंदमुचामधीशलक्ष्मीयुतस्त्वंचगृहंगृहाण॥१॥नमःकौस्तुभनाथायहि
रण्यकवचायच॥क्षीरोदार्णवसत्वायजगद्धात्रेनमोस्तुते॥२॥नमोहिरण्यगर्भवि
श्वगर्भायवैनमः॥ध्रुवंवरस्यजगतोगृहभर्तायवैनमः॥३॥भूलोकप्रमुखालोका
स्तवदेहेव्यवस्थिताः॥नंदंतिपावकवनेतस्मिन्नस्यवनेगृहे॥४॥त्वत्प्रसादेनदेवेश
पुत्रपौत्रान्वितोगृहे॥पंचयज्ञक्रियायुक्तोवासोस्तुचंद्रतारकमिति॥५॥ततस्तेपूर्व
स्थापितशय्यामुदङ्मुखसवत्सपत्नीकंब्राह्मणमुपवेश्यपयपाविप्तवंवस्त्रालंकारा

दिग्भिः संपूज्यस्वयमासनेञ्चाग्रतःसुखोदर्कैर्ध्यासीनोदर्भान्धारयमथाः पत्न्यासहप्रा
ङ्णतायम्मदेशेकालौसंकीर्त्यममसमस्तपापक्षयपूर्वककल्पकोटिशतावच्छि
न्नब्रह्मलोकमहीयमानकामः शिलाकाष्टपक्केष्टकादिनिर्मितंयथोपपत्तिसं
पादितंकांस्यपात्रादिभाजनसर्वधान्यलवणाद्यघृततैलगुडशर्करागोमहिषीवा
लिवर्ददासीमंचतूलिकाद्वयवितानादर्शताम्बूलायतनैर्लवणवेगादिवर्षपर्याप्तं
सर्वोपकरणान्वितंसदीपिकाप्रघोषविम्बकमन्दिरंतत्राकदैवतंवाइदंगृहंअमु
कगोत्रायअमुकशर्मणेवाध्यायिनेसपत्नीकायामुकशर्मणेसालंकृतायसुपूजि
तायलक्ष्मीनारायणप्रीतिमासहितंतुभ्यमहंसंप्रददेनममेतिदत्वापठेत्॥मं
त्रोतुइदंगृहंगृहाणत्वंसर्वोपस्करसंयुतं॥तवविप्रप्रसादेनममसंतुमनोरथा

गृहंममविशून्यर्थंगृहाणत्वंद्विजोत्तम॥प्रीयतांमेजगद्योनिर्विष्णुरूपीजनार्दनः॥ततः
प्रतिपठेत्॥ततःसुवर्णसहस्रमारभ्यएकसुवर्णपर्यंतंयथाशक्त्यावित्तशाठ्यवि
वर्जितांदक्षिणांदद्यात्॥ततःपादुकोपानहछत्रचामरादिकंदत्वासंपन्नंगृहोप
स्कारभूषणादित्युक्त्वासुवर्णसुसंपन्नंसंपूर्णमेवास्त्वितिप्रतिवचनंदद्यात्॥ततो
ब्राह्मणान्संपूज्यभूयसींदक्षिणांदत्वाशिषोगृह्णीयात्॥प्रमादाद्यस्यस्मृत्येत्यु
क्त्वाकर्मेश्वरार्पणंकुर्यादिति॥गृहदानफलमुक्तंमात्स्ये॥यएवंसर्वसंपन्नंपक्केष्ट
विनिवेदयेत्॥कल्पकोटिशतंयावद्ब्रह्मलोकेमहीयते॥शैलजंदारुजंवापियोदद्या
द्विधिपूर्वकं॥विरोतक्षीरार्णवेरम्येनारायणसमीपतः॥मन्त्रयंवापियोदद्याद्गृह
सोपस्करान्वितं॥पुरंदरेषुलोकपालानांप्रतिमत्वेसदनेदिति॥अत्रप्रविश्यसंस्था

स्वयंवा प्रतिगृह्णीयादित्युक्तेः॥ प्रविश्य गृहद्वारदेहलीं प्रविश्य देहल्यां प्रतिग्रहः कर्त
व्यः॥ तथैव संस्पृश्य स्थूणां द्वारदेहलीं वा संस्पृश्य प्रतिगृह्णीयादिति संप्रदायिका
॥ ॥इति गृहदानप्रयोगः॥ ॥अथ मठदानं॥ ॥स्कांदे कृत्वा मठं प्रयत्नेन शयना
सनसंयुतं॥ वेदिकातृणादि पुण्यकाले द्विजे यतिभ्यो निवेदयेत्॥ सर्वान्कामा
नवाप्नोति निष्कामो मोक्षमाप्नुयादिति॥ ॥इति मठदानं॥ ॥अथ धर्मशालादा
नं॥ ॥मार्कंडेयपुराणे॥ कुर्यादाश्रयगृहं पथिकानां हितावहं॥ निजगेहैकदेशं वा
साधूनां यो निवेदयेत्॥ प्रतिश्रयो धर्मशाला॥ तथा॥ अनंतं पुण्यमुद्दिष्टं प
थिकानां हितावहं॥ निजगेहैकदेशं वा साधूनां यो निवेदयेत्॥ प्रतिश्रयो धर्म
शाला॥ तथ्यात्तस्य स्वर्गापवर्गदं॥ सर्वकामसमृद्धोऽसौ देववद्दिवि मोदते इति न

विष्ण्ये॥ प्रतिश्रयेषु विस्तीर्णिकारितेत्यज्ञलेधने॥ दीनानाथजनार्थाय वदकिं न कृ
तेन्न वेदिति॥ इति प्रसंगात् प्रतिश्रयदानगतानं धर्मे॥ ॥अथ कन्यादानं॥ हेमा
द्रौ॥ सहस्रमेव धेनूनां शतं चानडुहां समं॥ दशानडुत्समं यानं दशयानसमो ह
यः॥ दशवाजिसमा कन्या भूमिदानं च तत्समं॥ तस्मात्सर्वेषु दानेषु कन्यादानं
विशिष्यते इति॥ वह्निपुराणे॥ ॥श्रुत्वा कन्याप्रदानं च पितरः सपितामहः॥ वि
मुक्ताः सर्वपापेभ्यो ब्रह्मलोकं व्रजंति ते॥ इति देवलश्च॥ तिस्रः कन्या यथान्यायं
पालयित्वा निवेद्य च॥ न पिता नरकं याति नारी वा स्त्रीप्रसूयिनीति॥ वसिष्ठ॥
हारकल्पितिगौरीयां सप्तजन्मानुगं फलं॥ धर्मेण विधिना दातुमसगोत्रेण
युज्यते इति॥ स्वस्वगृह्योक्तः प्रयोगः॥ वरगोत्रं समुच्चार्य प्रपितामहपूर्वकं॥ नामसंकी

दा०चं०का० ४६

तयैहिहानकन्यायाश्चैवमेवहि॥ तिष्ठेदुदङ्मुखोदाता तिष्ठेत्पूर्वमुखोवरः॥ मधु
पर्कार्चितायैनोतस्मैदद्यात्सदक्षिणां॥ उदकंपात्रंतदादायमंत्रेणानेनदा
पयेत॥ तिष्ठेदितिस्त्र्यनुपविष्टइत्यर्थः॥ गौरींकन्यामिमामित्यादि॥ पुत्रपौत्र
प्रवर्धिनीमित्यंतंप्रयोगेवक्ष्यामः॥ भूमिंगावश्वदासीचवासांसिचस्वशक्ति
तः॥ महिष्योवाजिनश्चैवदद्यात्स्वर्णमणीनपीति॥ ततःस्वगृह्यविधिनाहो
मार्द्यंसर्वकर्मकारयेत॥ यथाचारंविधेयानिमांगल्यसुमनांसिचेति॥ ॥अ
थकन्यादानप्रयोगः॥ ॥तत्रादौयथाचारंवमधुपर्केणासंपूज्यवरंप्राङ्मुखंव
धूंचप्रत्यङ्मुखींउपवेश्यपित्रादिदातावधूवरदक्षिणतःस्वदक्षिणस्थप ४६
त्नीसहितउदङ्मुखोदर्भेष्वासीनोदर्भान्धारयमाणोदेशकालौसंकीर्त्य

ममसमस्तपितॄणांनिरतिशयसानंदब्रह्मलोकावाप्त्यादिकन्यादानकल्पोक्तफला
वाप्तयेऽनेनवरेणास्यांकन्यायामुत्पादयिष्यमाणसंतत्याद्वादशावरान्द्वादशा
परान्पुरुषांश्चपवित्रीकर्तुमात्मनश्चलक्ष्मीनारायणप्रीतयेब्राह्मविवाहवि
धिनाकन्यादानमहंकरिष्यइतिसकुशाक्षतजलेनसंकल्प्यसपत्नीकउत्थायोदङ्मु
खएवकन्यांसंप्रगृह्यपठेत॥ कन्यांकनकसंपन्नांकनकाभरणैर्युतां॥ दास्यामिवि
ष्णवेतुभ्यंब्रह्मलोकजिगीषया॥ विश्वंभरःसर्वभूताःसाक्षिण्यःसर्वदेवताः॥ इमां
कन्यांप्रदास्यामिपितॄणांतारणायच॥ इतिमंत्रौपठित्वा॥ स्वदक्षिणस्थभार्यादत्त
पूर्वकल्पितजलधारामविच्छिन्नांनवकांस्यपात्रोपरिधृतकन्यांजल्युपरिस्थव
रांजलिदक्षिणहस्तेक्षिपन्वदेत॥ कन्यातारयतु॥ पुण्यंवर्धतां॥ शिवाआपःसं

द्वा०चं०
४५

तु॥सौमनस्यमस्तु॥अक्षतंचारिष्टंचास्तु॥दीर्घमायुः श्रेयःशांतिः पुष्टिस्तुष्टिश्चा
स्तु॥यच्छ्रेयस्तदस्तु॥यत्पापंतत्प्रतिहतमस्तु॥पुण्याहंभवंतो ब्रुवंतु॥स्वस्तिंभवंतो
ब्रुवंतु॥ऋद्धिंभवंतोब्रुवंतु॥श्रीरस्त्वितिभवंतोब्रुवंतु॥अमुकप्रवरोपेताम्मु
कगोत्रोत्पन्नोमुकशर्माहंममसमस्तेत्यादि०श्रीलक्ष्मीनारायणप्रीतयेइत्यंतं
पूर्वोक्तंउक्त्वाअमुकप्रवरोपेतायामुकगोत्रायामुकप्रपौत्रायामुकपौत्रायामु
कपुत्रायामुकशर्मणेश्रीधररूपिणेकन्यार्थिनेवरायअमुकामुकप्रवरोपेता
मुकगोत्रामुकप्रपौत्रीममुकपौत्रीममुकपुत्रीममुकनाम्नींकन्यांश्रीस्व
रूपिणींवरार्थिनींयथाशक्त्यलंकृतांप्रजापतिदैवत्यांधर्मप्रजासहत्वकर्मभ्य
स्तुभ्यमहंसंप्रददेकन्यांप्रतिगृह्णातुभवानितिवरहस्तेसकुशाक्षतजलंदि ४५

येत्॥प्रजापतिःप्रीयतामितिमनसास्मरेत्॥नममेतिवदेदितिकेचित्॥त
तोदाता॥गौरींकन्यामिमांविप्र०॥गोत्राय०॥कन्येममा०॥कन्येमेपूर्व०॥मम
वंशः०॥तुभ्यंविप्र०॥प्रवर्द्धिनीमितिधर्मेचार्थेचकामेचनातिचरितव्यात्वयेयं
॥नातिचरामीतिवरः॥एवमेवममसमस्तेत्यादि०नातिचरामीत्यंतंकन्यादान
त्रिवारंकार्यमितिशौनकः॥ततोवरःदेवस्य०त्वांप्रतिगृह्णामिॐस्वस्तीत्युक्त्वा
कन्यायादक्षिणांसमक्षिमस्तकइदंकरमाक्षदादितिपथान्नरवंकामस्तुतिंपठि
त्वापृथिवीप्रतिगृह्णात्वितिजपित्वागृहाणाअमातर्गतिश्रौतस्मार्तकर्मानुष्ठान
सिद्धयेधर्मप्रजासहत्वकर्मसिध्यर्थंचकन्यांप्रतिगृह्णामीतिवदेत्॥ततोदातादे
शकालौसंकीर्त्यकृतस्यकन्यादानकर्मणःसांगतासिध्यर्थंइदंसुवर्णंअग्नि

दा॰च॰ ५८

दैवतंदक्षिणात्वेनतुभ्यमहंसंप्रददेनममेतिवरहस्तेदद्यात्॥ ॐ स्वस्तीतिवरः॥ ततो
दातारएवमेवजलपात्रेणोजनतान्नानिगोमहिष्यश्वगजदासीदासगृहवाहना
लंकारादियथावित्तंवेसंकल्पपूर्वकंवरायदद्यात्॥ ततोब्राह्मणभोजनंसंकल्प्यं
भूयसींदक्षिणासंकल्पंचयथाशक्त्याकृत्वायस्यस्मृत्या॰ प्रमादात्कुर्वतांकर्मेत्यस्मा
कर्मेश्वरार्पणंकुर्यात्॥ अन्यदपियथाचारंसर्वंकार्यं॥ विस्तरस्तुप्रयोगरत्नादौज्ञेय
ः॥ कन्यागृहेभोजननिषेधोमदनरत्नेवह्निपुराणे॥ अप्रजायांतुकन्यायांनाश्नुनी
तकदाचन॥ दौहित्रस्यमुखंदृष्ट्वाकिमर्थमनुशोचतीति॥ ॥ अथकपिलादानं
॥ साचदशधोक्तावाराहे॥ सुवर्णकपिलापूर्वाद्वितीयागौरपिंगला॥ तृतीयाचैव ५८
रक्ताक्षीचतुर्थीगुडपिंगला॥ पंचमीबहुवर्णास्यात्षष्ठीचश्वेतपिंगला॥ सप्तमी

श्वेतपिंगाक्षीअष्टमीकृष्णपिंगला॥ नवमीपाटलाप्रोक्तादशमीपुच्छपिंगला॥
एतादशविधाख्याताःकपिलास्तेमहामुने॥ सर्वास्ताश्चमहाभागास्तारयंतीनसंश
यइती॥ आदित्यपुराणे॥ सहस्रंयोगवांदद्यात्कपिलांत्वेकएवहि॥ सममेवपुरा
प्राहब्रह्माब्रह्मविदांवरइति॥ तथा॥ रुक्मशृंगींरौप्यखुरींसहस्राकांस्यदोहिनींस
वत्साकपिलांदत्वावंशानसप्तसमुद्धरेत्॥ यावंतीचास्यरोमाणिसवत्सायाभवंति
हि॥ सुरभीलोकमासाद्यरमतेतावतःसमाइतिमहाभारते॥ समानवत्सांकपि
लांधेनुंदद्यात्पयस्विनीं॥ सुव्रतावस्त्रसंवीतांब्रह्मलोकेमहीयतेइति॥ ॥ अथक
पिलादानप्रयोगः॥ ॥ पुण्यकालेकृतनित्यक्रियोऽद्येत्यादि॰ममगोसहस्रदान
समफलावाप्तिसवत्सकपिलारोमपरिमितसंवत्सरपर्यंतकामधेनुलोकनिवा

सकामइमांकपिलांसुवर्णशृंगीं रौप्यखुरांताम्रपृष्ठीं कांस्योदोहां घंटाभरणां श्वेतव
स्त्रयुगछन्नांचंदनतस्रग्विभूषितां सोपस्करां रुद्रदैवत्यां अमुकगोत्रायामुकशर्म
णे सुपूजितायब्राह्मणायतुभ्यमहंसंप्रददे नममेतिदद्यात्।। मंत्रस्तुमात्स्ये।। कपि
लेसर्वदेवानांपूजनीयासिरोहिणी।। तीर्थदेवमयीयस्मादतःशांतिंप्रयच्छमेइति
।।मंत्रांतेप्रदक्षिणांकुर्यात् ततःसुवर्णदक्षिणांदद्यात्।।उक्तोपस्कारकपिलादा
नफलंमात्स्ये।।वस्त्रवत्नुर्गुणंदत्वादक्षिणांचचतुर्गुणां।।एतैरलंकृताधेनुंघंटाभ
रणभूषितां।।कपिलांविप्रमुख्यायदत्वामोक्षमवाप्नुयात्।।तथा।।द्विगुणोपस्क
रोपेतामहतीकपिलास्मृता।।उपस्कारःसुवर्णशृंगवस्त्रदोहनपात्राद्याः।।सा
मान्यगोदानेवक्ष्यमाणतः।।दातासाविप्रमुख्यायस्वर्गमोक्षफलप्रदा।।समस्त

स्मकृतात्पापान्मुच्यतेदक्षसंयुताः।।यान्यान्प्रार्थयतेकामांस्तांस्तान्प्राप्नोतिमा
नवइति।। ।।महाकपिलादानप्रयोगस्तु।। ।।अद्येत्यादि॰ममसप्तजन्मकृतपा
पनाशपूर्वकंपुत्रपौत्रादिभुक्तस्वर्गमोक्षकामोविष्णुप्रीतिकामोवायथाकाम
फलमुद्दिश्यगोत्रायशर्मणेसालंकृतायइमांमहाकपिलांद्विगुणोपस्कारोपेतां
रुद्रदैवतांतुभ्यमहंसंप्रददेनमम्येतिदद्यात्।।ततःसुवर्णदक्षिणांदत्वाक्षमाप
येत्।।मंत्रस्तुपूर्वमेवोक्तः।।इतिमहाकपिलादानप्रयोगः।। ।।इतिदशमहादाना
नि।। ।।अथदशधेनुदानानि।। ।।यास्तुपापविनाशिन्यःकथितादशधेनवः।।ता
सांस्वरूपंवक्ष्यामिनामानिचनराधिप।।प्रथमागुडधेनुःस्याद्घृतधेनुस्तथापरा
।।तिलधेनुस्तृतीयातुचतुर्थीजलधेनुका।।क्षीरधेनुस्तुविख्यातामधुधेनुस्तथा

परा॥सप्तमीत्वर्करा धेनुर्दधिधेनुस्तथाष्टमी॥रसधेनुस्तु नवमी दशमी स्यात्स्वरूपा
तः॥कुंभ्यान्यथाता दिधेनूनां इतरासां तु राजयः॥सुवर्णधेनुमप्यत्र केचिदिच्छंति मानव
ः॥नवनीतिलतैले न तथान्ये महर्षयः॥रसधेनुस्थाने सुवर्णधेनुस्तिलधेनुर्वा योज
येत्॥एतद्विधाने पिमत्स्ये॥कृष्णाजिनं चतुर्हस्तं प्राग्ग्रीवं विन्यसेद्भुवि॥गोमयेनो
पलिप्तायां दर्भानास्तीर्य सर्वतः॥तथैव गवाजिनं तद्वद्वत्सस्य परिकल्पयेत्॥लघुक
ष्णाजिनं॥प्राङ्मुखीं कल्पयेद्धेनुमुदक्पादां सवत्सकां॥प्राङ्मुखीं प्राक्शिर सां सव
त्सां तु त्तरस्तां गोरिक्षितवत्ससहितां॥उत्तमा गुडधेनुः स्यात्सदा भारचतुष्टयां॥वत्सं भा
रेणकुर्वीत भाराभ्यां मध्यमा स्मृता॥अर्धभारेण वत्सः स्यात्कनिष्ठा भारकेण तु॥
चतुर्थांशेन वत्सः स्याद्गृहवित्तानुसारतः॥तुलाफलशतं प्राकुर्भारः स्याद्विंशति

स्तुलेति॥भारः फलसहस्रात्मको भवतीत्युक्तं परिभाषायां॥धेनुवत्सौ घृतस्यैतौ
सितसूक्ष्मांबरावृतौ॥शुक्तिकर्णाविक्षुपादौ शुचिमुक्ताफलेक्षणौ॥सितसूत्रशिरालौ
तौ रसितकंबलकंबलौ॥ताम्रगुडकपृष्ठौ तौ सितचामररोमकौ॥ककुत्स्थदेशे गडु
कः॥विद्रुमभ्रूयुगोपेतौ नवनीतस्तनान्वितौ॥क्षौमपुच्छौ कांस्यदोहौ इंद्रनीलक
नासुकौ॥सुवर्णशृंगाभरणौ राजतखुरसंयुतौ॥नानाफलमयैर्दंतैर्घ्राणागंधकांडकौ
॥गंधकरंडकः कर्पूरादिपात्रविशेषः॥एवं रचित्वा धूपदीपादिभिरर्चयेत्॥वस्त्रभु
क्तादीनि भारतो मानाधिक्ये फलाधिक्यं॥ ॥अथास्य प्रयोगः॥यजमानः कृतनित्य
क्रियः पुण्यकालेषु चिरञ्जीव्यादि॰मम समस्तपापक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं
गुडधेन्वादिदानं करिष्ये इति संकल्प्य विप्रं वस्त्राभरणादिभिः संपूज्य प्रदक्षिणा

कृत्यसर्वपापक्षयकामनइमाममुकधेनुंगोत्रायशर्मणेब्राह्मणायसंपूजिताय
तुभ्यमहंसंप्रददेनममेतितद्धस्तेसकुशतिलजलंगोपुच्छंदद्यात्॥ विप्रस्तुदे
स्वस्तीतिप्रतिगृह्यस्वस्तीत्युक्त्वा यथावाशंवकामस्तुतिंपठेत्॥ ततःसुवर्णंद
क्षिणांदद्यात्॥ प्रार्थनामंत्रस्तु॥ यालक्ष्मीःसर्वभूतानांयाचदेवेष्ववस्थिता॥
धेनुरूपेणसादेवीवांछितंमेप्रयच्छतु॥ देहस्थायाचरुद्राणिशंकरस्यसदाप्रि
या॥ धेनुरूपेणसादेवीममपापंव्यपोहतु॥ विष्णोर्वक्षसियालक्ष्मीःस्वाहायी
चविभावसोः॥ चंद्रार्कशक्रशक्तिर्याधेनुरूपपक्रमाश्रये॥ चतुर्मुखस्ययाल
क्ष्मीर्यालक्ष्मीधनदस्यच॥ यालक्ष्मीर्लोकपालानांसाधेनुर्वरदास्तुमे॥ स्वधात्वंपि ५१
तृमुख्यानांस्वाहायज्ञभुजस्तथा॥ सर्वपापहराधेनुस्तस्माछांतिंप्रयछमेइति।

एवमामंत्र्यतांधेनुंब्राह्मणायनिवेदयेत्॥ एतदेवविधानंसर्वधेनूनां॥ प्रत्यक्षधेनु
व्यतिरिक्तानामित्यर्थः॥ नक्रस्चनायास्तत्रानुपयोगात्॥ ततोन्यसीदक्षिणांद
त्वाब्राह्मणान्भोजयेदिति॥ एतदेवविधानंस्यात्तएवोपस्काराःस्मृताः॥ अयने
षुयैयैव्ययेपुण्येव्यतीपातेतथापुनः॥ गुडधेन्वादयःसर्वेउपरागादिपर्वसु॥ य
थाश्रद्धंप्रदातव्याभुक्तिमुक्तिफलप्रदं॥ ॥अत्रद्रोणपरिमाणतिलधेनुरुक्ताक
ल्पतरौ॥ तत्प्रकारांतरं॥ विष्णुधर्मोत्तरे॥ अनुलिप्तेमहीपृष्ठेवस्त्राजिनकुशाव
ते॥ धेनुंतिलमयींकृत्वासर्वरत्नैरलंकृतां॥ धेनुंद्रोणेनकुर्वीततस्याढकेनतुवत्स
कं॥ स्वर्णशृंगीरौप्यखुरीगंधघ्राणवतीतथा॥ कुर्याच्छर्कराजिह्वांगुडास्यामा
विकंबलां॥ इक्षुपादांताम्रपृष्ठीशुचिमुक्ताफलेक्षणां॥ प्रशस्तपत्रश्रवणांफलदं

दा०चं० तमयीमुत्तां॥स्वादाम्नपुच्छांकुर्वश्तनवतीतस्तनान्वितां॥सितवस्त्रयुगछंन्नांघं
५२ टाभरणभूषितां॥ईदृक्संस्थानसंपन्नांकृत्वाश्रद्धासमन्वितः॥कांस्योपदोह
नांदद्यात्केशवःप्रीयतामिति॥इतिकर्त्तव्यतामंत्रास्तगुडधेनूक्ताएव॥॥
प्रार्थनामंत्रस्तुवह्निपुराणे॥तिलाश्चपितृदैवत्यानिर्मिताश्चेहगोसवे॥ब्राह्म
णायमयाधेनुर्दत्ताप्राणातुकेशव॥इतिमंत्रोत्तरमुक्तं॥प्रतिमातिलधेन्वादीनां
विक्रयाद्युक्तंहेमाद्रौब्राह्मवैवर्त्ते॥॥दनकमलाकरेतुदेवत्वंप्रतिमानांप्रकीर्तितं
॥धेनूनामपिधेनुत्वंशुल्कंदानयोगतः॥दातुर्वैदानकमलेधेनवःपरिकीर्ति
ताः॥विप्रस्यव्ययकालेतुद्रव्यंतदितिनिश्चयः॥दानसंबंधिविप्रेणद्रव्यमागच्छतो
गृहं॥क्रमसर्वविदुषान्येनविक्रेयंस्वेच्छयाविना॥कुटुंबभरणंकार्यंधर्मकार्यंचस ५२

र्वदाः॥अन्यथानरकंयातित्येवमाहपितामहइति॥॥इतितिलधेनुदानं॥॥अथ
घृतधेनुदानं॥॥विष्णुधर्मे॥तिलानांवैतथादद्यात्घृतधेनुंप्रयत्नतः॥वासुदेवं
जगन्नाथंघृतक्षीरनिषेचनं॥संपूज्यपूर्ववत्पुष्पैर्गंधधूपादिभिर्नरैरिति॥॥त
त्रैवविधानमाह॥॥गव्यस्यसर्पिषःकुंभंपुष्पमालादिभूषितं॥कांस्यापिधान
संयुक्तंसितवस्त्रयुगेनच॥हिरण्यंसहितंतद्रत्नाणिविद्रुममौक्तिकैः॥अत्रप
लसहस्रपरिमाणःकुंभः॥॥द्वादशपलाधिकपंचशतपलाधिकोवा॥इक्षुय
ष्टिमयाःपादाःखुरान्रौप्यमयांस्तथा॥सौवर्णेचाक्षिणीकुर्यात्शृंगेचागरुकाष्ठ
के॥सप्तधान्यमयेपार्श्वेपत्रोर्णेनचकंबले॥पत्रोर्णधौतकौशेयं॥कर्पूरघ्रा
णं॥फलमयावस्तनात्॥शार्करयाजिह्वा॥गुडक्षीरमयंमुखं॥क्षौमपुच्छं॥रो

माणिसितसर्षपैः॥ताम्रपृष्ठीं॥एतादृशीं कृत्वा॥विधिनासंपूज्य तथाब्राह्मणायेय
यावित्तंचवस्त्रालंकारादिभिः संपूज्य दद्याद्विधिवत्तु भार्गव॥मंत्रस्तु स्कांदे॥घृ
तेगावः प्रसूयंते घृतं चाप्यं प्रतिष्ठितं॥घृतमग्निश्च देवाश्च घृतं मे संप्रदीयतामि
ति॥ ॥दानफलमपितत्रैव॥घृतक्षीरवहा नद्यो यत्र पायसकर्दमाः॥तेषु लोकेषु
सर्वेषु सुपुण्येषूपजायत॥सकामानां मयेव्युष्टिः कथिता नृपसत्तम॥ ॥व्युष्टि
ःफलं॥विष्णुलोकं नरा यांति निष्कामा धेनुदानतइति॥दक्षिणा तु हिरण्यमेवेति
हेमाद्रिः॥सुवर्णप्रभृतिस्त्वत्र ज्ञाप्या चेत्युक्तं मदनरत्ने॥ ॥इति घृतधेनुदानं॥ ॥अथ
जलधेनुदानं॥स्कांदे॥जलकुंभं नरव्याघ्र सुवर्णरजतान्वितं॥सुवर्णशृंगरजतखु
रान्वितमिति॥रत्नगर्भं च मत्रोषस्तु ग्राम्यैर्धान्यैः समन्वितं॥सितवस्त्रयुगच्छन्नं

दूर्वापल्लवशोभितं॥कुष्ठमांसीमुरोशीरबालकामलकैर्युतं॥प्रियंगुपत्रसहितं
सितवस्त्रोपवीतिनं॥सच्छत्रं सउपानत्कं दर्भविष्टरसंस्थितं॥चतुर्भिः संवृतं न्यूय
तिलपात्रैश्चतुर्दिशं॥स्थगितं दधिपात्रेण घृतधृतं क्षौद्रवत्ता मुखे॥ ॥तिलपात्राणि
ताम्रमयानि॥दधिपात्रं कांस्यमयं॥उपोषितो वास्तुदेवं जलेशायनमभ्यर्च्य संकल्प्य
जलधेनुं विप्रं च वस्त्रालंकारादिभिः संपूज्य सवत्सां जलधेनुं गुडधेनुवद्द्यात्॥
तौ ते याश्च लक्ष्मीरित्यादिपूर्वोक्तमंत्रैः॥इति प्रार्थयेत्॥ ॥इति जलधेनुदानं॥ ॥अ
थ क्षीरधेनुदानं॥स्कांदे॥क्षीरधेनुं प्रवक्ष्यामि तां निबोध नराधिप॥अनुलिप्ते म
हीपृष्ठे गोमयेन नराधिप॥गोचर्ममात्रमानेन कुशानास्तीर्य सर्वतः॥तस्योपरि
महाराज न्यसेत्कृष्णाजिनं ततः॥तत्र गोमयेन कुंडलीकां कृत्वा क्षीरकुंभं तत्र सं

छाद्यचतुर्थांशेनवत्सकं॥ शृंगाणिचंदनागरुकाणि॥ घ्राणंस्तत्पत्रश्रवणांतिल
पात्रोत्सरिन्यस्तौ॥ मुखंगुडमयंदेहेमेवा॥ जिह्वाशर्करयाफलैर्दंता: मुक्ताफलैस्त
णाइक्षुपादा॥ दर्भरोमासितकंबलाएतद्वृंशीसवत्सांसमर्च्यद्विजंवस्त्रालंका
रादिभि:संपूज्यअद्येत्यादिंगोत्रीयशर्मणेसालंकृतायइमांक्षीरधेनुंपूर्वोक्तवत्सां
श्रीकृष्णसोपस्करयुतांसमस्तपापक्षयकामस्तुभ्यमहंसंप्रददेनममेतिवदेत्॥
देवस्यत्वास्वत्तीत्कस्कायपात्राखंकामस्कृतिंपठेत्॥ ततोयालक्ष्मीरित्यादिमंत्रै
:प्रार्थयेत्॥ ॥इतिक्षीरधेनुदानं॥ ॥अथमधुधेनुदानं॥ ॥स्कांदे॥ मधुधेनुधे
प्रेवक्ष्यामिसर्वपापप्रणाशनीं॥ अनुलिप्तेमहीपृष्ठेकृष्णाजिनकुशोत्तरे॥
धेनुंमधुमयींकृत्वासंपूर्णंघटपूरितां॥ तद्वच्चतुर्थभागेनसवत्सांपरिकल्पये ५४

त्॥ धेनुंद्विजंचपूर्ववदाभ्यर्च्य॥ अद्येत्यादि०गोत्रायशर्मणेसालंकृतायसौव
र्णमुखीमगरुचंदनशृंगीवास्त्रपृष्ठीस्तत्पुच्छांइक्षुपादांसितकंबलकंबलां
गुडमुखींशर्कराजिह्वांमौक्तिकनेत्रांफलदंतांदर्भरोमांघ्राणस्तत्पत्रश्रवणां
नवनीतस्तनींसप्तधान्योपेतांततश्चत्वारिपात्राणिचतुर्दिक्षुविन्यसेत्॥ व
स्त्रयुग्मेनाछाद्यघंटाभरणभूषितांकांस्यदोहिनीसुपूजितांपुच्छदेशोपवि
ष्टायमधुवाताऋतायतइतिमंत्रमुक्त्वाइमांमधुधेनुंसर्वपापक्षयकामस्तुभ्य
महंसंप्रददेनममेति॥ तत:सुवर्णदक्षिणांदत्वायालक्ष्मीरित्यादिपूर्वोक्तमं
त्रै:प्रार्थयेत्॥ ॥इतिमधुधेनुदानं॥ ॥अथशर्कराधेनुदानं॥ ॥स्कांदे॥
तद्वच्छर्कराधेनुंश्रृणुराजन्यथार्थत:॥ अनुलिप्तेमहीपृष्ठेकृष्णाजिनकु

दा॰चं॰का
५५

मोत्तरं ॥ भारचतुष्टयपरिमितां ॥ तच्चतुर्थांशेन वत्सः ॥ ॥ भारद्वयेनाष्टमांशो वा इ
ति स्वशक्त्या वा कार्या ॥ सर्वधान्यानि चतुर्दिक्षु संस्थाप्य ॥ अग्नेत्यादि॰ गोत्रा
पत्रामणेः सालंकृताय इमां शर्कराधेनुं सुवर्णशृंगीं मौक्तिकनयनां गुडेन मु
खीं पिष्टमयीं जिह्वां कंबलपट्टसूत्रेण वेष्टितां कंठाभरणभूषितां इक्षुपादां
रौप्यखुरां नवनीतस्तनीं प्रवालपर्णश्रवणां सितचामरभूषितां पंचरत्नस
मायुक्तां दर्भरोमां कांस्योपदोहां गंधपुष्पाद्यर्चितां समस्तपापक्षयकामस्तु
भ्यमहं तां संप्रददे ॥ न ममेति सुवर्णदक्षिणां दद्यात् ॥ ततो या लक्ष्मीरित्यादिमं
त्रैः संप्रार्थ्य तूष्णीं दद्यात् ॥ विप्रमुखं वनेत्येदिति ॥ पंचरत्नानि त्वपरार्के ॥ ॥ ५५
कनकं हीरकं नीलं पद्मरागं च मौक्तिकं ॥ पंचरत्नमिदं प्रोक्तमृषिभिः पूर्वद

र्शिभिरिति ॥ इति शर्कराधेनुदानं ॥ ॥ अथ दधिधेनुदानं ॥ ॥ स्कांदे ॥ तत्र भू
लेपने कुशाकृष्णाजिने अस्तीर्य सप्तधान्योपरि दधिकुंभं संस्थाप्य चतुर्थांशेन व
त्सं कृत्वा गोत्रायेत्यार्मणे सालंकृताय सौवर्णमुखीं प्रवालपत्रश्रवणां मुक्ताफले
क्षणां चंदनागरुशृंगीं मुखे विशेषगंधेनैर्युक्तां शर्करया कृतजिह्वां श्रीखंडेन
कृतघ्राणां फल ॥ नयदंतां सितकंबलपृष्ठां नागरंघ्ररोमां सूत्रमयपुच्छां रौप्यमुखीं
वा नवनीतस्तनीं इक्षुपादां सर्वाभरणभूषितां वस्त्रयुग्मेनाच्छादितां गंधपुष्पा
द्यर्चितां इमां दधिधेनुं सर्वपापक्षयकामो दधिक्राव्णा इति मंत्रं पठित्वा तुभ्यमहं
संप्रददे न ममेति ॥ गुडधेनुक्रमेण वा दद्यात् ॥ ततः सुवर्णदक्षिणां दत्वा या ल
क्ष्मीरित्यादिमंत्रैः प्रार्थयेत् इति ॥ ॥ इति दधिधेनुदानं ॥ ॥ रसैष्वेयं धेनुदानं

॥स्कांदे॥ रसधेनुं महाराज कथयामि समासतः॥ अनुलिप्ते महीपृष्ठे कृष्णाजि
नकुशोत्तरे॥ इक्षुरसस्य घटं पूरयित्वा तच्चतुर्थांशेन वत्सं संपाद्य अद्येत्यादि
॰गौत्रायव्राम्रयो सालंकृतायइ भोः रसधेनुं सुवर्णशृंगां ताम्रपृष्ठां रौप्यखुरां बुल
पुच्छां इक्षुपादां पुष्पकंबलां ताम्रपृष्ठां पुष्परोमां व्रीहियुतां चतुर्दिक्षु दीपसमा
युक्तां सर्वगंधविभूषितां पूर्वादिदिक्षु तिलपात्रचतुष्टयावृतां सुपूजितां सर्वपा
पक्षयपूर्वकं कविंशाकुलो॥ धुरणकामस्त्वमहं संप्रददे न ममेति सुवर्णदक्षि
णां दद्यात्॥ मंत्रास्तु गुडधेनूक्त एव॥ शेषोपकार श्च॥ एवमुच्चरयित्वा पिदीयते
वेद्विजन्मने॥ दश पूर्वपरांश्चैव आत्मानं चैकविंशतिरिति॥ ॥इति रसधेनुदानं
॥॥अथ अस्यैव स्वरूपतो गोदानं॥ ॥अंगिराः॥ गोरेकस्यैव दातव्या श्रोत्रियाय कु

टुंबिने॥ सा हि तारयते पूर्वान् सप्त सप्त च सप्त चेति॥ देवलः॥ कृष्णां वा लक्षणयावतीं युव
तीं वत्ससंयुतां॥ बहुदुग्धवतीं स्निग्धां धेनुं दद्याद्विचक्षणे॥ ॥अथ गोदानप्रयोगः॥॥
॥॥कृतनित्यक्रियः पुण्यकालेऽद्येत्यादि॰ यथाशक्ति यथाज्ञानि गोदानमहं करिष्ये
इति संकल्प्य॥ तद्यथा॥ शृंगमूले ब्रह्मविष्णुभ्यां नमः॥ ब्रह्मविष्णू पूजयामि॰ शृंगाग्रे॰
सर्वतीर्थेभ्यो नमः सर्वतीर्थान्॰ शिरोमध्ये शिवाय॰ शिवं पू॰ ललाटे देव्यै॰ देवीं पू॰
नासिके षण्मुखाय नमः षण्मुखं पू॰ नासिकापुटयोः कंबलाश्वतराभ्यां॰ कंबला
श्वतरौ नागौ पू॰ कर्णयोः अश्विभ्यां नमः अश्विनौ पू॰ चक्षुषोः शशिभास्कराभ्यां॰
शशिभास्करौ पू॰ दंतेषु वायवे नमः वायुं पूज॰ जिह्वायां वरुणाय॰ वरुणं पू॰ हुंका
रे सरस्वत्यै॰ सरस्वतीं पूज॰ गंडयोः पक्षमासाभ्यां॰ पक्षमासौ पू॰ ओष्ठयोः संध्यास्तं

०त्रनेसंध्येपू०ग्रीवायामिंद्राय०इंद्रंपू०कुक्षिदेशेरुद्रेभ्यो०रुद्रांसिपू०उरसिसाध्ये
भ्यो०साध्यान्पू०पादेषुधर्माय०धर्मंपू०जंघासुचाधर्माय०ईंश्वधर्मंपू०खुरमध्ये
गंधर्वेभ्योनमः गंधर्वान्पू०खुरमध्येपन्नगेभ्यो०पन्नगान्पू०।खुराणांपश्चिमा
ग्रेष्वप्सरोभ्यो०अप्सरसःपू०पृष्टेएकादशरुद्रेभ्यो०एकादशरुद्रानपू०सर्वसंधि
षुकैवसुभ्यो०वसून्पू०श्रोणितटेपितृभ्यो०पितृन्पू०लांगूलेसोमाय०सोमंपू
०गुदेष्वादित्यरश्मिभ्यो०आदित्यरश्मिन्पू०गोमूत्रेगंगायै०गंगांपू०गोमयेय
मुनायैनमः यमुनांपू०क्षीरेसरस्वत्यै०सरस्वतींपू०दधनिनर्मदायै०नर्मदांपू०घृ
तेअग्नये०अग्निंपू०रोमसुअष्टाविंशतिदेवकोटिभ्योनमः।।अष्टाविंशतिदेव ५७
कोटीःपू०उदरेपृथिव्यैनमः।।पृथिवींपू०पयोधरेषुसमुद्रेभ्योनमःचतुःसमु

द्रान्पू०।। ।।देवताःअंगेषुसंपूज्य।। ।।अद्येत्यादि०गोत्रायनशर्मणेसुपूजिताय
पृथ्वीदानसमफलकामःसर्वपापक्षयकामोविष्णुप्रीतिकामोवाइमांप्रत्यक्ष
धेनुंसुवर्णशृंगींरौप्यखुरींताम्रपृष्ठींघंटाग्रीवायांमुक्तालांगूलांकांस्यदोहनींसि
तवस्त्रद्वयोपेतांसर्वाभरणभूषितांसोपस्कारांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममे
तितिलपात्रेघृताक्तंगोपुच्छंकृत्वाविप्रहस्तेसतिलकुशोदकंदद्यात्।।मंत्रस्तु।।य
ज्ञसाधनभूतायाविश्वस्याद्यौघनाशिनी।।विश्वरूपधरोदेवःप्रीयतामनयागवा
।।ततोदानप्रतिष्ठासिध्यर्थंसुवर्णदक्षिणांदत्वाप्रार्थयेत्।।नमोगोभ्यःश्रीमती
भ्यःसौरभेयीभ्यएवच।।नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः।गावोममा
ग्रतःसंतुगावोमेसंतुपृष्ठतः।।गावोमेहृदयेसंतुगवांमध्येवसाम्यहं।।इतिप्र

त्वा॥ धेनुं द्विजं च प्रदक्षिणीकृत्य किंचिदनुव्रजेदिति॥ ॥इति गोदानप्रयोगः॥ ॥
श्वेतवर्णादिगोदानफलमुक्तं पाद्मे॥ श्वेता सुखप्रदा प्रोक्ता चंद्रलोकप्रदायिनी॥
कृष्णा स्वर्गप्रदात्री या गौरी स्यात्कुलवर्द्धिनी॥ रक्तरूपप्रदा प्रोक्ता पीता दारिद्र्यना
शिनी॥ पुत्रप्रदा कृष्णसारा नीलो धर्मविवर्द्धिनी॥ कपिला सर्वपापघ्नी नानवर्णा च
मोक्षदेति॥ अथ समानवर्णगोवत्सदानफलं॥ ॥महाभारते॥ रोहिणीं तुल्यव
र्णां तु सवत्सां च पयस्विनीं॥ प्रदत्वा वस्त्रसंवीतां सूर्यलोके महीयते॥ समानवत्सां
धवलां धेनुं॥ सुव्रतां वस्त्रसंवीतां चंद्रलोके महीयते॥ समानवत्सां कृष्णां धेनुं॥
सुव्रतां वस्त्रसंवीतां अग्निलोके महीयते॥ वातरेणुसवर्णां तु सवत्सां कांस्यदोहनीं॥ ५८
॥ प्रदद्याद्वस्त्रसंवीतां वायुलोके महीयते॥ समानवत्सां धुम्रां तु धेनुं दद्यात्पय

स्विनीं॥ धूम्रवस्त्रसमायुक्तां यमलोके महीयते॥ अग्नेः समानवर्णां तु सवत्सां कां
स्यदोहिनीं॥ प्रदाय वस्त्रसंवीतां वारुणां लोकमश्नुते॥ हिरण्यवर्णां पिंगाक्षीं सव
त्सां कांस्यदोहिनीं॥ प्रदद्याद्वस्त्रसंवीतां कौबेरं लोकमाप्नुयात्॥ पलालधूम्रव
र्णां तु सवत्सां कांस्यदोहिनीं॥ प्रदद्याद्वस्त्रसंवीतां पितृलोके महियते॥ सवत्सां
पीवरीं दत्वा द्विति कंठमलंकृतां॥ विश्वदेवसमं संबाधं स्थानं श्रेष्ठं प्रपद्यते॥ समा
नवत्सां गौरीं धेनुं॥ सवत्सां कांस्यदोहां तु वसूनां लोकमाप्नुयात्॥ वत्सोपप
न्नां नीलांगीं सर्वरत्नसमन्वितां॥ गंधर्वाप्सरसो लोका दत्वा प्राप्नोति मानवः॥ इति
॥ विसंकल्प्य तु तत्फलं संकीर्त्य दद्यात्॥ ॥इति समानवर्णगोवत्सफलद
नं॥ ॥अथ कृष्णा धेनुदानं॥ मात्स्ये॥ अद्येत्यादि०संकल्पादि पूर्ववत्॥ मंत्रस्तु

॥कृष्णधेनोनमस्तुभ्यंब्रह्मविष्णुशिवात्मके॥त्रिजन्माजन्मार्जितपापानिधू
वेदानाशुनाशयेति॥अथहेमशृंगीदानं॥मात्स्ये॥दत्वासौवर्णिकेशृंगेखुराःप
चपलान्विताः॥पंचाशत्पलिकंकांस्यंमौक्तं ताम्रंचापितथैवच॥वस्त्रंचत्रि
गुणंधेन्वादक्षिणांचचतुर्गुणमिति॥एवंविधिवद्धातुःफलमुक्तंनेदृशुरायो
विधिनातुयदादत्वापात्रेधेनुःसदक्षिणा॥दातातारयतेजंतत्कुलानांमयु
तंशतमिति॥मोहाख्यारते॥प्रासादायत्रसौवर्णाःशय्यारत्नोज्वलास्तथा॥व
राप्सरसोयत्रतत्रगच्छतिगोप्रदाः॥तथा॥यावंतिरोमाणितथैवधेन्वास्ता
वंतिवर्षाणिमहीयतेसः॥स्वर्गाच्युतश्चापिततोत्रलोकेकुलेसमुत्पन्नस्मति
गोमतांसः॥तथा॥सालंकृतांसवत्सांचधेनुंसंपूज्यभक्तितः॥सरत्नपूर्णां

पृथिवीतेनदाव्यानसंशयइति॥इतिहेमशृंगीदानं॥इतिस्वरूपतोगोदाननि
रूपणं॥अथकार्पासधेनुदानं॥मात्स्ये॥अतःपरंप्रवक्ष्यामिधेनुंकार्पासकीं
नृप॥सर्वविघ्नस्यगुप्त्यर्थंब्रह्मणाःस्वात्मकंकृतं॥साचकार्पासभारेणश्रेष्ठा
धेनुःप्रकीर्तिता॥मध्यमाचतदर्धेनतदर्धेनकनीयसी॥पूर्ववद्वस्त्रधान्यंचचि
रंधंयच्चतथैवच॥वत्सकंतुर्यभागादानमात्रेणिधीयते॥कुर्वीतपूर्ववद्वत्संवस्त्रधौ
पधान्याद्युपस्कृतंमिति॥ततोवाराहोक्ततिलधेनुदानवत्क्रियांकृत्वा॥अद्येत्या
दि॥संकल्प्यादादितआरभ्यदानंतंकृत्वाप्रार्थयेत्॥मंत्रस्तु॥हेमकुंदेंदुसदृशे
क्षीरार्णवसमुद्भवे॥सोमप्रियेसुधन्याख्येसौरनेत्रेनमोस्तुते॥दत्तेयमिंद्रा
यायमानायकायामृतायच॥अत्रिगोत्रप्रजातायसोमराजायवैनमः॥यस्त्वे

वेपरयात्तस्माब्राह्मणायप्रयच्छति॥सयातिचंद्रलोकंतुसोमेनसहमोदते॥इति
कार्पासधेनुदानं॥अथलवणधेनुदानं॥तद्विष्णौ॥तत्रयुधिष्ठिरंप्रतिकृष्णः॥
शृणुराजन्प्रवक्ष्यामिलवणस्येहकल्पनं॥गोमयेनानुलिप्तेतुगर्त्तसंस्तरसं
स्थितं॥आविकंचर्मविन्यस्यपूर्वाग्रान्विमुखंस्थितं॥वस्त्रेणाछादितंकृत्वाधे
नुंकुर्वीततबुद्धिमान्॥आढकेनैवकुर्वीततवत्सुविन्नोपकल्पितं॥गांविप्रचय
यावित्तंवंवस्त्रालंकारादिभिः संपूज्यअथेत्यादि॰गोत्रायनाम्नेयेसुपूजितायद्रा
मालवणधेनुंफलस्तनींसिंधुत्वाक्षिश्रृंगींसक्तुपिंडकपोलांयवास्यांकंबलपट्टस
त्रग्रैवेयकांताम्रपृष्ठींगुडापानांकंबलवालांगूलांमधुयोनिकांसर्वान्नरया
न्नूषितांसर्वपापक्षयकामोविष्णुप्रीतिकामोवातुभ्यमहंसंप्रददेनममेतिपु ६०

च्छनायदियुतः प्रदक्षिणीकृत्यदद्यात्॥शेषंमधुधेनुदानवत्॥मंत्रस्तु॥लव
णेवैरसाःसर्वेतिष्ठंतिसर्वदेवताः॥सर्वदेवमयेदेविलवणाख्येनमोस्तुतइति
॥पुराणांतरेषुषोडशद्रोणमितांचतुर्थांशेनवत्सइत्युक्तं॥इतिलवणधेनुदानं॥
॥अथसुवर्णधेनुदानं॥वह्निपुराणे॥सुवर्णधेनुचाप्यत्रसुवर्णांश्चचतुर्दश॥सु
निर्णिक्तसुवर्णैश्चसप्तभिर्मध्यमास्मृता॥चतुर्भिश्चकनीयास्याच्चतुर्थांशेन
वत्सकः॥गुडधेनुविधानेनदत्तासर्वफलप्रदा॥अत्रविशेषः॥रौप्येणवत्सक
इतिकेचित्॥तथान्यत्रेत्यादि॰प्रवालशृंगीघृतपात्रस्तनीपद्मरोमाकर्पूरागरु
नासिकांमिष्टान्नरसवासितांताम्रखुरांरवशृंगीतरंत्रकुक्षिलक्ष्मललाटस्थांनारीकेरश्रवणां
गुडजानुकांपंचगव्यापानवीकांस्यपृष्ठांपट्टसूत्रलांगुलांसप्तधान्यसमायुक्तां

दा०चं०
६१

फलपुष्पोपेतांछत्रोपानत्समन्वितां सुवर्णधेनुंरुद्रदैवत्यांसहस्राश्वमेधफलावा
प्तिकामः कुलसहस्रस्यस्वर्गेनिवासकामश्चगोत्रायत्रार्णयोसुपूजितायतुभ्य
महंसंप्रददेनममइति ॥ मंत्रस्तु ॥ सुवर्णधेनुंविप्रायप्रतिपद्येद्दत्रीनरः ॥ हि
रण्यरेतापुरुषः पुराणः कृष्णपिंगलः ॥ तस्यहेमच्छविस्त्वष्टाविश्वात्माप्रीयतांम
मेति ॥ अनेनैवतुमंत्रेणधेनुदानंप्रकीर्तितं ॥ अश्वमेधसहस्राणिफलमाप्नो
त्यसंशयं ॥ कुलानांचसहस्रस्यस्वर्गेनयतिगोप्रदइति ॥ ॥ इतिसुवर्णधेनुदा
नं ॥ ॥ अथवंध्यात्वहरंसुवर्णधेनुदानं ॥ वायुपुराणे ॥ चतुर्विधाचयावंध्यात्वे
हूत्सवियोजनात् ॥ वक्ष्येतस्याः प्रतीकारंतत्स्वरूपंनिबोधमे ॥ वंध्यातुचतुर्वि
धोक्ता ॥ वंध्याकाकवंध्यास्त्रीप्रसूतामृतप्रजाइति ॥ काकवंध्यातुकाकवदेका ६१

पत्या ॥ शेषास्पष्टाएव ॥ धेनुरूपमेवमाह ॥ हेमाद्रौकर्मविपाके ॥ हिरण्येनयथा
शक्त्यासवत्सांकारयेद्दृढां ॥ धेनुंपलेनवत्संचपादेनगुरुरब्रवीत् ॥ यथाशक्त्येति ॥
पलेनवातदर्धेनतदर्धार्धेनवापुनरिति ॥ कर्मविपाकेरूपपरिमाणप्रकारेण ॥
धेनुंरौप्यखुरांरत्नपुच्छेनियोज्यघंटयमुनयोरपिंगाक्षेबध्वारत्नमयतिलकंललाटे
बध्नीयात् ॥ तद्दक्षिणस्यचर्मपायसनैवेद्यंदत्वामोदकान्अपूपान्गुडलवणजीर
कसुवर्णदक्षिणाकंचुकंचनवेवेणुमयशूर्पेनिधायएकंवायनकंधेनवे ॥ अन्य
गृहपतिपुत्रवनीत्योब्राह्मणस्त्रीन्स्यः षड्ष्टौवादद्यात् ॥ ततोवेदपारगमलोलु
पंब्राह्मणंरूपाग्रस्तंदरिद्रंकुटुंबिनमाहूयदत्त्वायथावित्तंवस्त्राद्यलंकारादिभिः
संपूज्यततोधेनुं ॥ सोमोधेनुमितिमंत्रेणसवत्सांचसंपूज्यअग्निमुपसमाधाय

शा॰चं॰ ६२ समिदाज्यचरुद्रव्यैः सेमो धेनुमितिमंत्रेण प्रत्येकमष्टोत्तरशतसंख्यया हुत्वा ॥
स्वयमुदङ्मुखः प्राङ्मुखायोपविष्टाय गोपुच्छं ॥ तद्धस्ते दत्वा दद्यात् ॥ अभ्यर्घे
त्वा द्वि॰ गोत्राय शर्मणे सुपूजितायद्यमांसाद्युक्तां सुवर्णधेनुं सवत्सां रौप्य
खुरां रत्नपुच्छां घंटायुतकंठां रत्नतिलकां वायनोपेतां वस्त्रयुगछन्नां मुक्ताखं
गृह्णां ममजीवत्सुसंतानप्रतिबंधकीभूतसकलदुरितनिरासपूर्वकं आयु
ष्मत्सुपुत्रावाप्तिकामो वंध्यत्वहरामिमां सुवर्णधेनुं यथाशक्तिसोपस्कारां रुद्र
देवतां तुभ्यमहं संप्रददे न ममेति कुशतिलोदकं दद्यात् ॥ मंत्रस्तु वायवीये
॥ धेनुर्यांगिरसः सत्रे वसिष्ठे सुरभिस्तथा ॥ दुहिता च तथा भानोर्यग्रेश्वरुण्य ६२
स्य च ॥ याश्च गावः प्रवर्तंते वनेषूपवनेषु च ॥ दीयांतु ता मम सदा पुत्रपौत्रप्र

वर्धनाः प्रयच्छंतु तथा राज्यमविच्छेदं तु संततेः ततो देवस्यता॰ स्वस्तीत्युक्त्वा यथा
शक्तिकामस्तुतिं पठेत् ॥ ततः सुवर्णदक्षिणां दत्वा प्रार्थयेत् ॥ मंत्रस्तु ॥ वंध्यात्व
कांकवंध्यात्वं कन्याप्रसवएव च ॥ तथैवमृतवंध्यात्वं दोषं मम चतुर्विधं ॥ दानेना
नेन हरतु या सा कामदुघा मम ॥ इति गां प्रार्थयित्वा ॥ प्रदक्षिणीकृत्य विसृज्य भूयसीं दक्षि
णां दत्वा यथाशक्ति ब्राह्मणान्भोजयित्वा जीवत्सुसंतानाशिरस्क इति ताः संप्रार्थ्य ॥
जीवत्सुसंतानावाप्तिरस्त्विति ते ब्रूयुः ॥ ततः सुहृद्युतो भुंजीतेति ॥ इति वंध्यात्वह
रं सुवर्णधेनुदानं ॥ अथ पयस्विनीदानं ॥ मात्स्ये ॥ रुक्मशृंगीं रौप्यखुरीं मुक्ता ॥
लांगूलान्विभूषितां ॥ कांस्योपदोहनीं राजन्सवत्सां द्विजपुंगवे ॥ प्रसूयमानां यो दद्या
द्धेनुं द्रविणसंयुतां ॥ यावद्वत्सो योनिगतो यावद्गर्भं न मुंचति ॥ तावद्गौः पृथिवी ज्ञे

दा॰न॰च॰
६३

याम्नशैलवनकानना॥ देवलः॥ अलंकृत्योक्तविधिना सुवर्णत्रिफलान्विता॥ देया
चद्विफला मध्या पलैकादक्षिणाधमा॥ वराहे तु सुवर्णस्य सहस्रं तदर्धार्धं मुख्यमुक्तं॥
सुवर्णसहस्रेण तदर्धेनापि वा पुनः तस्याप्यर्धशतं चापि पंचाशन्नतोर्धकं॥ तथा
शक्त्यापि दातव्यवित्तशाठ्यविवर्जितेति॥ हेमाद्रौ॥ उभयमुखीं स्वर्णनिष्केण दत्ता
सद्यः शुध्येत्पातकेभ्यस्समर्त्य इति॥ सुवर्णनिष्कदक्षिणायुतेनापि हरिद्रेण दद्या हि
त्ययः॥ अत्र निष्कचत्वारिंशन्माषको ग्राह्यः अन्यत्रापि विंशतिमाषको वा॥ अ
थ दानप्रयोगः॥ ॥ शुचिरद्येत्यादि॰ उभयतोमुखीदानं कर्तुं गोब्राह्मणपूजां करिष्ये
॥इति संकल्प्य॥ द्विजं कुटुंबिनं दरिद्रं वेदपारगमुज्ज्वलं कृत्वा यथावित्तं वस्त्रालं ६३
कारादिभिः संपूज्य तथा गामपि संपूज्य ॐ त्वं मही नवनिं विश्वधेनामिति रुक्॥ इ

ति गामनुमंत्र्य प्रदक्षिणीकृत्य अद्येत्यादि॰ गोत्रायशर्मणेऽमुकशाखाध्यायिने इमां
धेनुं सपस्करां उभयतोमुखीं ससमुद्रसशैलवनकाननोपेतपृथ्वीदानफलावाप्तये धे
नुवत्सरोमसंख्ययुगदेवलोकमहित्वपितृपितामहप्रपितामहकुलत्रातनरकोत्ता
रणपूर्वकघृतक्षीरवहबकुकुल्याकदधिपायसकर्दमहेमाधिकरेणाकसितकामो
ब्रह्मलोकावाप्तिकामो रुद्रदैवत्यां इमां तुभ्यमहं संप्रददे न मम॥ मेति सघृततिलपूर्ण
कांस्यपात्रयुतं गोपुच्छं तद्धस्ते सकुशजलं दत्वा प्रार्थयेत्॥ मंत्रस्तु॥ इमां गृहाणोभ
यमुखीं नवात्रातामभास्तुवे॥ ममवंशाविशुद्धेभ्यः सदा स्वस्तिकरो भवेति॥ विप्रो दे
वस्त्वेति प्रतिगृह्य स्वस्तीत्युक्त्वा यथाशाखं कामस्तु विंपठेत्॥ ततः सुवर्णमारभ्य
पंचविंशतिचतुर्द्विसुवर्णमितां दक्षिणां दद्यात्॥ ततो नन्यूनामिति॥ ततो विप्र

दान०च०
६४

स्तु॥ ॐ इरावतीधेनुमतीहितिऋक्॥ स्योनापृथिवीतिऋक्॥ इतिमंत्रद्वयंपठित्वा
वदेत्॥ प्रतिगृह्णामिमांधेनुंकुटुंबायेविशेषतः॥ स्वस्तिर्भवतुमेनित्यंरुद्रमातर्न
र्नमोस्तुते॥ इतिनत्वागृहीतायांदक्षिणेनपाणिनावत्समाकृष्यगच्छेत्॥ गर्त्तेनतु
संतुष्टेषामवेदमितिमंत्रेणगर्त्तमाकृष्येत्॥ निष्कासितेसतिसर्वंतरमाह॥ त
तोयजमानःप्राणानायम्यअद्येत्यादि०कृतस्योक्तयमुक्त्वीदानकर्मणःसांगता
सिध्यर्थंदेवादितर्पणंहोमंचकरिष्येइतिसंकल्प्यस्थंडिलेग्निंप्रतिष्ठाप्यान्वा
धानं॥ अस्मिन्नन्वाहितेग्नावित्यादिचक्षुषीआज्येनेत्यंतमुक्त्वात्रप्रधाने॥ पृथि
वीत्रिः॥ गौरीसकृत्आज्येनप्रजापतिंचतुरश्चीत्यावत्याज्येनशेषेणस्विष्टकृतमि ६४
त्यादिसद्योयक्ष्येइत्यंतमुक्त्वासमिद्द्वयमादायेध्माबर्हिषीसंनह्यपरिसमूहना

दिवे०जुषध्वं॥ देवांस्तर्पयामि १ ॐ उशंतस्त्वानिधी० अग्निष्वात्तपितृंस्तर्पयामि २ ॐ इमंमे
गंगेयमुने० सरस्वतीस्त० [illegible] सुषोमया॥ सरितस्तर्पयामि ३ ॐ अद्रिभिः [illegible]
सुतोमतिभिः०दिवेदिवे॥ पर्वतांस्तर्पयामि ४ ॐ वनस्पतेशतव०सोत्तमाय॥ वन
स्पतींस्त०५ समुद्रज्येष्ठाः०मामवंतु॥ ऋक्समुद्रांस्तर्पयामि ६ ॐ अहिरिवभोगैः
०तुविश्वतः॥ नागांस्तर्प०७ मधुवाताऋतायते०षधीः ॐ षधीस्तर्प०८ इत्यष्टौतिस्तर्प
यित्वा॥ चतस्रआज्याहुतीर्जुहुयात्॥ ॐ द्यावापृथिवी०गंतंस्वाहापृथिव्याइदं
॥ ओम्महीद्यौःपृथि०स्वाहापृथिव्याइदं २ ॐ मनवःपृथ्वीबहुले०दधातेपेसुजगे
सु०अन्वास्वाहापृथिव्याइदं॥ ३॥ ओम्गौरीर्मिमाय०मन्स्वाहागौर्याइदं०४ इति
चतस्रआज्याहुतीर्हुत्वाततःसमस्तव्याहृतिभिःचतुरश्चीत्याहुतीर्हुत्वा॥ प्रजाप

तयइदंनमसेतिसृजेत्॥ततःस्विष्टकृतादिहोमशेषंसमाप्य॥नृपसीदक्षिणांदत्वा॥
गामनुव्रज्यगोमतींविद्यांजपेत्॥महाभारते॥गावोमामुपतिष्ठंतुहेमशृंग्यः॥
पयोमुचः॥सुरभ्यःसौरभेयश्चसरितःसागरास्तथा॥गावःपश्यंत्वहंनित्यंगावः॥
पश्यंतुमांसदा॥गावोस्माकंवयंतासांयतोगावस्ततोवयं॥२॥घृतक्षीरप्रदागावोघृत
योन्योघृतावहाः॥घृतनद्योघृतावर्तास्तामेसंतुसदागृहे॥३॥घृतंमेहृदयेनित्यंघृतंता
भ्येवसंमतं॥स्याप्रतिष्ठितं॥घृतंमेसर्वतश्चैवघृतमध्येवसाम्यहं॥४॥गावोमेग्रत
ःसंतुगावोमेसंतुपृष्ठतः॥गावोमेहृदयेसंतुगवांमध्येवसाम्यहं॥५॥गावःसुरभयो
नित्यंगावोगुग्गुलसंनिभाः॥गावःप्रतिष्ठाभूतानांगावःस्वस्त्ययनंमहत्॥६॥अ
न्नमेवपरंगावोदेवानांहविरुत्तमं॥पावनंसर्वभूतानांरक्षंतिचवहंतिच॥७॥हवि

षामंत्रपूतेनतर्पयंत्यमरान्दिवि॥ऋषीणामपिहोतॄणांगावोहोमेप्रतिष्ठिताः॥८॥स
र्वेषामेवभूतानांगावःशरणमुत्तमं॥गावःपवित्रंपरमंगावोमंगलमुत्तमं॥
९॥गावःसर्वस्यलोकस्यगावोधन्याःसनातनाः॥नमोगोभ्यःश्रीमतीभ्यःसौरभेयीभ्य
एवच॥१०॥नमोब्रह्मसुताभ्यश्चपवित्राभ्योनमोनमः॥पुनःप्रदक्षिणंकृत्वाधेनुंद्विज
वर्यंचतद्इति॥११॥इतिजपित्वानमस्कृत्यविसृज्यपायसादिनासम्यक्द्वादशब्राह्मणा
न्भोजयित्वातेभ्योदक्षिणांदत्वास्वस्त्ययनंवाचयित्वासुहृद्युक्तोभुंजीतेति॥इत्युभय
तोमुखीदानप्रयोगः॥ ॥अथप्रसंगादुभयतोमुखीप्रतिग्रहप्रायश्चित्तं॥ ॥तत्रोभ
यतोमुखीप्रतिग्रहदोषपरिहारार्थंकृच्छ्त्रयप्रायश्चित्तंतथाप्रत्याम्नायेनकरिष्यइ
तिसंकल्प्यकृच्छ्त्रयंप्रायश्चित्तंकुर्यादित्युक्तंदानोद्योतेअत्रपरस्मैतोरहस्यप्रायश्चि

शा॰चं॰प्र॰
६६

त्त्रेयराक्रस्य॥ ॥इत्युभयतोमुखीप्रतिग्रहप्रायश्चित्तं॥ इत्युभयतोमुखीगोदानंप्रनिरूप
णं॥ ॥अथदशदानानि॥ ॥मदनरत्नेज्ञानतुकपर्यः उक्तोत्यादीनिदानानिदद्याद्या
न्नतस्मात्॥ गोभूतिलहिरण्याज्यवासोधान्यगुडानिच॥ रौप्यंलवणमित्याहुर्दशदा
नान्यनुक्रमात्॥ इति॥ एतानिदशदानानिनराणांमृत्युजन्मनोः॥ कुर्यादित्युदयो
यंचप्रेतेपिद्विपरत्रचेतिहेमाद्रिः तत्रादौगोदानं॥ दानविधिस्तुपूर्वोक्तएव॥ ममस
मस्तपापक्षयार्थंइमांगांधेनूपस्करांरुद्रदैवत्यांसुवर्णदक्षिणायुक्तांगोत्रायशर्मणे॥
सुपूजितायतुभ्यमहंसंप्रददे॥ नममेतिदद्यात्॥ मंत्रस्तु॥ यज्ञसाधनसंभूताविश्व
स्याघौघनाशिनि॥ विश्वरूपधरोदेवःप्रीयतामनयागवा॥ गवामंगेष्वपिप्रार्थये ६६
त॥ इतिगोदानं॥ ॥अथभूदानंमात्स्ये॥ निवर्तनप्रमितांभूर्देया॥ दशहस्तेनदंडेन॥

त्रिंशद्दंडानिवर्तनमितिस्मरणात्गदानान्यन्यानिसर्वाणिकनकादीनियानिच॥
तानिभूमिप्रदानस्यकलांनार्हंतिषोडशीमिति॥ अद्येत्यादि॰ गोत्रायशर्मणेसुपू
जितायषष्टिवर्षसहस्रपरिमितस्वर्गेशिवपुरनिवासकामः सर्वपापक्षयकाम
इमांभूमिंबहुसस्यप्रदांविष्णुदैवत्यांतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ मंत्रस्तु
॥ सर्वेषामाश्रयाभूमिर्वराहेणसमुद्धृता॥ अनंतसस्यफलदा अतःशांतिप्र॰य
स्मारोहंतिबीजानिकालेचैवमहीतले॥ त्वत्प्रदानाच्चसकलाममसंतुमनोरथाइ
ति॥ ॥इतिभूमिदानं॥ ॥अथतिलदानं॥ तिलास्तुद्रोणत्रयमितादेया॥ म
णपंचकपरिमितावेति॥ अद्येत्यादि॰ गोत्रायशर्मणेइमेतिलाः सोमदैवता
विष्णुदेवतावासर्वपापक्षयकामस्तुभ्यमहंसंप्रददेनममेतिमंत्रस्तु॥ महर्षे

हा॰ चंद्री॰ ६७

गोत्रसंभूताः कस्यपस्य तिलाः स्मृताः॥ तस्मादेषां प्रदानेन मम पापं व्यपोहतु॥ इति
तिलदानं॥ ॥अथ हिरण्यदानं॥ ॥तत्र निष्कत्रयमितं सुवर्णकं निष्टं॥ द्वादशमा
षको निष्कः॥ अद्येत्यादि॰ गोत्रायशर्मणे इदं हिरण्यं अग्निदैवतं समस्तपापक्षयका
मस्त्स्यमहं संप्रददे न मम इति॥ मंत्रः॥ हिरण्यगर्भस्थ॰ इति हिरण्यदानं॥ ॥अथा
ज्यदानं॥ ॥घृतं तु प्रस्थमितं दद्यात्॥ विंशतिशारे कमिदं तु भवति॥ अद्येत्यादि॰ ।
गोत्रयशर्मणे इदमाज्यं विष्णुदैवतं समस्तपापक्षयकामस्त्स्य महं संप्रददे न म
मेति मंत्रस्तु कामधेनुः समुद्भूतं सर्वक्रतुक संस्थितं॥ देवानामाज्यमाहारमतः
शांतिं प्रयच्छमे॥ इत्याज्यदानं॥ अथ वस्त्रदानं॥ सूक्ष्मवस्त्रद्वयं बहु मूल्यं अष्टौ
हस्तमितं वा नतसूतं तु दद्यात्॥ अद्येत्यादि॰ गोत्रायशर्मणे समस्तपापक्षयकाम

स्त्ये बार्हस्पत्यदैवते वाससी तुभ्यमहं संप्रददे न मम इति मंत्रस्तु शीतवातोष्णसंत्राणं।
लज्जाया रक्षणं परं॥ देहालंकारणं वस्त्रमतः शांतिं प्रयच्छमे॥ इति वस्त्रदानं॰ अथ धा
न्यदानं॥ सार्धखारिद्वयं व्रीहयो देयाः॥ तत्र सार्धशतद्वयमणपरिमितं मणा षट्कं
चेति॥ अद्येत्यादि॰ गोत्रायशर्मणे इदं व्रीहिमुकस्य प्रजापति दैवतं समस्तपापक्षयपू
र्वकैहिकामुष्मिकसकलशिवफलावाप्तिकामस्त्स्य महं संप्रददे न मम इति मंत्रस्तु
॥सर्वस्व समस्तपापक्षयपूर्वकैहिकामुष्मिर्वदेवमयं धान्यं सर्वोत्पत्तिकरं महत्॥
प्राणिनां जीवनोपायमतः शांतिं प्रयच्छमे॥ इति धान्यदानं॥ ॥अथ गुडदानं॥ ॥
गुडपलषष्टिमितं दद्यात्॥ अद्येत्यादि॰ मम समस्तपापक्षयपूर्वकं गृहे लक्ष्मी।
स्थैर्यत्वं सिद्धिकामो गोत्रायशर्मणे सुपूजितायागुडोरसवर्यः सोमदैवतः सदृशि

दा०चं०प्री०
६८

णस्तुभ्यमहं संप्रददे न मम मेति॥ मंत्रस्तु॥ गुडो मिक्षुरसोद्भूतं मंत्राणां प्रणवं यथा॥ दा
नेनानेन मे तस्मात् पार्वती जन्मग्री। स्थिरा गृहे॥ ॥इति गुडदानं॥ ॥अथ रजतदानं॥
पलत्रयमितं तरौप्यं दद्यात्॥ अद्येत्यादि॰ र्थं मम समस्तपापक्षयपूर्वकशिवविष्णु
पितृप्रीतिकामो गोत्रायशर्मणे सुपूजिताय इदं रजतं विष्णुदैवतं सदक्षिणं तुभ्या
महं संप्रददे न मम मेति दद्यात्॥ मंत्रस्तु॥ प्रीतिर्यत्र पितॄणां च विष्णुशंकरयोः स्व
दा॥ शिवनेत्रोद्भवं रौप्यमतः शांतिं प्रयच्छ मे॥ इति रजतदानं॥ ॥अथ लवणदा
नं॥ ॥लवणं सार्धखारिकं दद्यात्॥ अद्येत्यादि॰ र्थं मम समस्तपापक्षयपूर्वकशिव
प्रीतिकामो गोत्रायशर्मणे सुपूजिताय इदं लवणं सर्वरसोत्कृष्टं सोमदैवतं सद ६८
क्षिणं तुभ्यमहं संप्रददे न मम मेति मंत्रस्तु॥ यस्मादन्नरसाः सर्वे नोत्कृष्टा लवणं वि

ना॥ शंभोः प्रीतिकरं यस्मादतः शांतिं प्रयच्छ मे॥ इति दशदानानि॥ ॥अथ पंचधेनु
दानानि॥ तत्रादौ पापापनोदधेनुदानं ब्राह्मणो दानोपस्कारस्तु गोदानोक्त एव सर्व
त्र॥ अद्येत्यादि॰ र्थं ममात्मनो वाक्कायकर्मजनितराजन्ममोपार्जितसमस्तपापापनोद
कामो गोत्रायशर्मणे सुपूजिताय इमां कृष्णां पापापनोदधेनुं यथाशक्ति सोपस्कारा
रुद्रदैवत्यां तुभ्यमहं संप्रददे न मम मेति मंत्रस्तु॥ आजन्मोपार्जितं पापं मनोवाका
यकर्मजिः॥ तत्सर्वं नाशमायातु पापधेनुप्रदानतः॥ ततः स्वर्णदक्षिणां दद्यात्॥ ॥
इति पापापनोदधेनुदानं॥ ॥अथ ऋणापनोदधेनुदानं॥ ॥ब्राह्मो अद्येत्यादि॰ र्थं
ममाजन्मोपार्जितैहिकामुष्मिकसमस्तऋणपातकछेदकामो गोत्रायशर्मणे सुपू
जिताय इमां समस्तऋणापनोदकधेनुं यथाशक्ति सोपस्कारां रुद्रदैवत्यां तुभ्यमहं

दा॰चं॰द्री॰
६८

संप्रददेनममोतिमंत्रस्तु॥एकाह्निकामुष्मिकंयत्स्याज्जन्मोपार्जितंरुर्गा॥तत्सर्वंना॥
शमायांतुरूणधेनुप्रदानतइति॥ततःसुवर्णदक्षिणांदद्यात्॥इतिरुणापनोदधेनुदा
नं॥ ॥अथप्रायश्चित्तधेनुदानं॥ ॥ब्राह्मे॥अद्येत्यादि॰ यन्मयाजन्मप्रभृतिअद्ययाव
दाचरितसमस्तपातकस्यकृतप्रायश्चित्तस्यामरणांतपापापनोदकामोगोत्रायसौम
णेसुपूजितायप्रायश्चित्तत्वेनइमांकपिलांधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांतुभ्य
महंसंप्रददेनममेतिमंत्रस्तु॥प्रायश्चित्तेसमुत्पन्नेनिष्कृतिर्नकृताक्वचित्॥तस्य
पापस्यशुध्यर्थंधेनुमेनांददामिते॥ततःस्कवरुण्यंपर्णदक्षिणांदद्यात्॥ ॥इतिप्राय
श्चित्तंधेनुदानं॥ ॥अथवैतरणीदानं॥ ॥ब्रह्मवैवर्ते॥यासावैतरणीनामयम ६८
द्वारेमहानदी॥शतयोजनविस्तीर्णापृथुत्वेसामहासरित्॥अगाधानंतरूपाचदृष्ट

मानाभयप्रदा॥यत्तंतितत्रैवमर्त्याःक्रंदमानाःसुदारुणी॥उष्णेवषतिनीतेच॥
मारुतेवातिवात्सरं॥दातारंतारयेद्यस्मात्तस्माद्वैतरणीस्मृतेति॥दानकालेपित
त्रैव॥मदनरत्ने॥अयनेविषुवेव्यतीपातेदिनक्षये॥अन्येषुपुण्यकालेषुदी
यतेदानमादरात्॥पाटलामथवाकृष्णांदद्याद्वैतरणींतुगां॥स्वर्णशृंगींरौप्यखुरां
कांस्यपात्रोपदोहदानां॥कृष्णवस्त्रयुगच्छन्नांसप्तधान्यसमन्वितां॥कार्पासद्रोण
शिखरेआसीनांहेमीयमप्रतिमांलोहदंडयुतांमहिषारूढांपात्रस्थांहेकृत्वाइ
क्षुदंडमयमुडुपपट्टसूत्रेणबध्वातदुपेधेनुंकृत्वाछत्रोपानत्समायुक्तांवैतरणीं॥
गांमृत्तिकालेवादद्यात्॥तद्यथा॥यमप्रतिमांगांविप्रंचयथाविभवंवस्त्रालंका
रादिभिःसंपूज्य॥अद्येत्यादि॰ यममयमद्वारस्थितवैतरण्यारत्नकृत्तारणार्थंगो

दा०चंद्रा० त्रायवार्मणेसुपूजितायइमांकृष्णांगांसर्ववत्सांयमप्रतिमासहितांकृष्णवस्त्रयुगच्छा
७० न्नांसप्तधान्ययुतांरक्तमाल्याद्यलंकृतांस्वर्णशृंगांताम्रोपस्करोपेतांकार्पासद्रोणशिरां
सच्छत्रोपानत्कांरुद्रदैवत्यांतुभ्यमहंसंप्रददेनममेतिसतिलजलघृतगोपुच्छंद्विजह
स्तेदद्यात्॥मंत्रस्तु॥यमद्वारेयथाघोरावैतरणीनदी॥तांततुंकामोदत्तात्तेकृष्णांवै
तरणींतुगामिति॥ततःसुवर्णदक्षिणांदापयेत्॥विष्णुरूपद्विजश्रेष्ठभूदेवपंक्ति
पावन॥ततुंवैतरणीमेनांदत्तांकृष्णांतुगामिमां॥ततोगोपुच्छंस्वकरेधृत्वानुव्रजेत्स
प्रपदानि॥धेनुप्रार्थनामंत्रस्तु॥धेनुकेत्वंप्रतीक्षस्वयमद्वारेमहापथे॥उत्तितीर्षुर
हंदेविवैतरण्यैनमोस्तुते॥इतिप्रणम्यभूयसींदक्षिणांदद्यात्इति॥कृष्णायाअभावे ७०
ऽन्यवर्णामपिदेया॥गोरभावेद्रव्यंदेयं॥पित्रादेरशक्तौपुत्रादिर्दद्यात्॥तत्राप्याद्य

मंत्रेणउत्तितीर्षुरयमित्यंपठेत्॥इतिवैतरणीदानं॥ ॥अथउत्क्रांतधेनुदानं॥ब्राह्मे
॥उत्क्रांतिवैतरण्योश्चदशदानानिचैवहि॥प्रेतेपिकृत्वातंप्रेतंत्वावधर्मेणदाहयेत्॥
तद्यथा॥योमुमूर्षुःपुरुषस्वयंचेतनवेलायांश्रोत्रियंवेदपारगंब्राह्मणमाहूय॥अ
द्येत्यादि०र्थमममसुखेनप्राणोत्क्रमणप्रतिबंधकोत्कटनिष्कृत्यनुकृतिनिष्कृतिजनितसक
लपापक्षयद्वारासुखेनप्राणोत्क्रमणसिध्यर्थंइमांउत्क्रांतिसंज्ञकांधेनुंयथाशक्तिसोप
स्करांरुद्रदैवत्यांगोत्रायत्रार्मणेसुपूजितायतुभ्यमहंसंप्रददेनममेति॥मंत्रस्तु॥
अस्तुउत्क्रांतौप्रकृतस्यसुखोत्क्रमणसिद्धये॥तुभ्यंसंप्रददेनाम्नाधेनुमुत्क्रांतिसंज्ञका
मिति॥ततःसुवर्णदक्षिणांदद्यात्॥गोरभावेतुतत्स्वरूपभूतंगोमूल्यंवादद्यात्॥
पित्रादेरशक्तौतुपुत्रादिर्देया॥तत्समेतिपदस्थानेपित्रादेरितिवदेत्॥ ॥इति

दा०चं०का० उत्क्रांतधेनुदानं॥ इयमेवमोक्षधेनुरितिकेचित्॥ मोक्षदोवासुदेवाख्योवेदशास्त्रे
७१ षुगीयते॥ तत्प्रीतयेद्विजाग्र्यायमोक्षधेनुंददाम्यहं॥ इत्युक्त्वा॥ अद्येत्यादि०र्थम
मसमस्तपापक्षयपूर्वकसंसारमोक्षावाप्तिकामः श्रीपापापहमहाविष्णुप्री
तिकामश्चइमांमोक्षधेनुंयथाशक्तिसोपस्करांरुद्रदैवत्यांगोत्रायशर्मणेसुपू
जितायतुभ्यमहंसंप्रददेनममेतिमंत्रेण॥ मोक्षंदेहिहृषीकेशमोक्षंदेहिजना
र्दन॥ मोक्षधेनुप्रदानेनममोक्षोस्तुवेगतरिति॥ ततः स्वर्णदक्षिणां
दद्यात्॥ मोक्षंधेनुरश्वावेतुपूर्वोक्तमनुसंधेयं॥ ॥इतिमोक्षधेनुदानं॥ ॥अथ
महिषीदानं॥ ॥महिषीदानमाहात्म्यंकथयामियुधिष्ठिर॥ पुण्यंपवित्रमायु ७१
ष्यंसर्वकामप्रदंतथा॥ दानकालेपितत्रैव॥ चंद्रसूर्यग्रहेकार्तिक्यांअयनासि

तचतुर्दश्यांसंक्रांतौसर्वारिष्टनाशायचित्तप्रशांतयेदेया॥ प्रथमप्रसूतांदोषवर्जि
तांदद्यात्॥ तत्रादौयमरूपायैमहिष्यैनमइतिनत्वाप्रार्थयेत्॥ माहिषीब्राह्मसता
चलक्ष्मीरूपेणसंस्थिता॥ प्रार्थितासिमयादेवियमभोगंनिवारयेदिति॥ तथा॥ माहि
षीयमरूपात्वंविश्वामित्रविनिर्मिते॥ पूजिताहरमेपापंसर्वदानफलप्रदे॥ इंद्रस्या
त्रारसोद्देवीमहिषीरूपविष्णुना॥ सर्वरोगप्रदेदेविदीर्घशृंगीनमोस्तुतेइति॥ अद्ये
त्यादि०र्थमनंदीर्घायुष्यैकाहिकामुष्मिकयशयाजित्वपितृतारणात्मभुक्तविंशति
धेनुदानसमफलावाप्तिसर्वदोषनाशफलपुत्रपौत्रबहुत्वसूर्यलोकनिवासमहारा
ज्यावाप्तिकामश्चगोत्रायशर्मणेसुपूजितायइमांमहिषींसालंकृतांरत्नमाल्यवस्त्रा
वृतांस्वर्णशृंगींरौप्यखुरांयमदैवत्यांतुभ्यमहंसंप्रददेनममेतिसवत्सातिकुलजलंद्र

दा०चंडी०
५२

स्तेदद्यात्॥ विप्रोदेवस्यत्वेतिपठन्पृष्टिदेत्तांस्पृष्ट्वास्वस्तीतिप्रतिगृह्य यथाशक्तिंकाम।
स्कृतिंयगेत्॥ दातातु॥ इंद्रादिलोकपालोकपालानांयाराज्यमहिषीशुभा॥ महि
षीशुभा॥ महिषीदानमाहात्म्यात्सास्तुमेसर्वकामदा॥ धर्मराजस्यसाहाय्येयस्या
ःपुत्रःप्रतिष्ठितः॥ महिषासुरस्यजननीयासास्तुवरदाममेति॥ इतिदत्वाप्रदक्षि
णाकृत्यब्राह्मणेतांपयस्विनीमिति॥ दक्षिणातु॥ दद्यापंचत्रिरेकोवास्कवर्णाः॥
स्मृतिनिष्कृष्टेज्ञेयेः॥ ततोन्यूयसींदक्षिणांदत्वाकर्मेश्वरार्पणंकुर्यात्॥ हेमाद्रौ
नविष्णुपुराणे॥ अनेनविधिनादत्वामहिषींद्विजपुंगवेसर्वान्कामानवाप्नोतिइ
हलोकेपरत्रच॥ ब्राह्मणःसर्वकामंस्कृत्रियोजकाम्यया॥ धनकामस्तुवैश्यो ५२
वसुद्रोतिलषितामियात्॥ महिषीदानमप्येवंदेवज्ञेयं॥ ॥इतिमहिषीदानं॥

अथमेषीदानं॥ ॥तद्विष्ये॥ शृणुपार्थिपरंदानंसर्वकंत्मषनाशनं॥ यद्दत्वाविविधंपा
पंसद्योविलयमिच्छति॥ अयनेविषुवेग्रहणहूयेदुःस्वप्नदर्शनेविनचिंतानुरेकाश्वेती
र्थगृहेवाकार्यं॥ ततःकरंब्राह्मणंविलुगौरीगायत्रीश्रीसहितांयथाशक्तिरक्तवर्णप्रतिमा
ःकृत्वाद्याचासहानंगलोकपालानसहांश्चकृत्वासंपूज्यतत्यश्चिमतःस्वगृह्योक्तेना
ग्निप्रतिष्ठाप्यस्थापितदेवतामंत्रैस्तिलाज्यैरष्टोत्तरशताष्टाविंशतिरष्टाष्टसंख्या
काहुतीर्वाकृत्वा॥ ततोमेषींद्विजंचवस्त्रालंकारादिभिर्यथाविभवंसंपूज्यअद्येत्या
दि०र्थममसर्वपापक्षदुःस्वप्नसूचितारिष्टविनाशपुत्रपौत्रधनकीर्तिर्यशाकामः
इमांमेषींरक्तवर्णांतिलकाद्यंकितांकौशेयपरिधानांसप्तधान्यसमायुक्तांसोयस्क
रांसन्मुखस्थापितस्नवर्णांब्राह्मविष्णुद्रोवादिप्रतिमायुक्तांउक्तोपस्करांगोत्रायशर्मा

र्मणेसुपूजितायइमांमेषींतुभ्यमहंसंप्रददेनममेतिदत्वासुवर्णांदक्षिणांदद्यात्॥ मं
त्रस्तु॥ वाड्मनःकायजेयेनित्यंयत्किंचिन्ममदुष्कृतं॥ तत्सर्वंविलयंयातुतद्दानापसे
वितमिति॥ प्रतिमास्थापनंतिलकुंभेमेषीप्रत्यक्षासुवर्णनिर्मितांवा॥ विप्रोदेवस्यते
तिश्रृंगेप्रतिगृह्ययथांगारवंकामस्तुतिंपठेत्॥ प्रतिगृहीतविप्रसंतापयांमुखावलोक
नंचवर्जयेत्॥ भविष्यपुराणे॥ दातेनकारयेतांतुरुक्मवर्णस्यप्रयत्नतः॥ यथाशक्त्याथ
वाकुर्याद्वित्तशाठ्यंनकारयेदिति॥ इतिमेषीदानं॥ ॥अथअजादानं॥ ॥सुमंतुः॥ अ
जापालोमहिपालोअजादानेर्दिवंगतः॥ अयनेविषुवेचैवयुगादौग्रहयोषुच॥ अमा
वास्यामजादानंपोर्णमास्यांचत्रास्पति॥ विधिंतस्यप्रवक्ष्यामिविम्राग्निचेयनिर्मितां
॥अयनेविषुवेचैवयुगांविप्रंचेयथाविभवंवस्त्रालंकारादिभिः संपूज्यअघेत्माहि

र्घममसर्वपापक्षयकामः रोहिकामुष्मिकशुभफलप्रीतिकामोवागोत्रायशर्मणे इमांअ
जांसतथाम्नोपरिस्थितांवस्त्रमाल्योपशोभितांवज्रनेत्रीं हेमश्रृंगींताम्रपृष्ठीं रौप्यपादं
सरोहनपात्रांसपुत्रांत्वाष्ट्रदेवतांतुभ्यमहंसंप्रददेनममेतिकुशोतिलोदकंत्वादद्यात्॥
मंत्रवासेत्वजमरस्यायज्ञसंपत्करेशुभे॥ सप्तांवेदेहिमेपापंजन्मांतरकृतेः कृतमिं
तितथा॥ त्वंपूर्वंब्रह्मणासृष्टापवित्रंचैवतापरं॥ त्वयसूतौस्थितायज्ञान्तेस्माछं
तिंप्रयच्छमेदेवस्यत्वेतिमंत्रेणप्रतिगृह्यततःरुक्मवर्णदक्षिणांदद्यात्॥ ॥इत्यजादानं
॥ ॥अथमंदाग्नित्वहरमेषदानं॥ ॥बौधायनः॥ अग्नेमाघनवेघस्ययक्तेताग्ने
विनाशकः॥ वस्तमितस्वनीकारंयथोक्तंब्राह्मणपुरा॥ पश्चार्धेनतदर्धेनतदर्धेना
पिवापुरैनः॥ राजतंकारयेत्सौम्यंअग्नेर्वाहनमुत्तमं॥ सौवर्णाश्चखुराःकार्याःश्वे

शां॰चं॰दी॰
७४

तद्वस्त्रेणवेष्टयेत्ततःश्वेतपुष्पंश्वेतगंधंमधूत्कटंधूपंदद्यात्॥द्रोणद्वयंतंडुलरा
शौस्थितंपूजयेत्॥मेषादाग्नेयांदिशिसमिदाज्यतिलैर्होमःकार्यः॥ ॥अथास्यप्र
योगः॥ ॥पुण्यकालेऽद्यत्यादि॰ममपूर्वकर्मविपाकोत्थत्रेताग्निनाशजनि
ताग्निमांद्यत्वनिरासद्वाराजठराग्निप्रबलत्वसिध्यायुरारोग्यतासिध्यर्थंमेषदानंका
रिष्यइतिसंकल्प्य॥मेषप्रतिमांमेषंवाप्रत्यक्षंसंस्थाप्यआग्नेयांस्वगृह्योक्तविधिना
ग्निंप्रतिष्ठाप्यान्वाधायत्रिरग्निंक्रमेणसमिदाज्यघृताक्ततिलाष्टोत्तरशताष्टाविंशति
रष्टाष्टसंख्ययावाजुहुयात्॥एतैर्मंत्रैः॥समिदाज्यघृताक्ततिलाहुतिभिः॥ॐअ
ग्निर्मूर्धा॰ अग्नयद्दं॰१ ॐअग्नेनय॰२ ॐअग्निनाग्निःसं॰३ इतित्रिभिर्मंत्रैःविवक्षि
तसंख्ययासमिदाज्यतिलैर्हुत्वास्विष्टकृदिप्रणीताविमोकांतंकृत्वाकुंभोदकेःयज ७४

मानमभिषिंचेदेभिर्मंत्रैः॥बोधायनः॥आपोहिष्ठेतितृचेनहिरण्यवर्णेतितृचेनच॥पवमा
नानुवाकेनमार्जयेद्द्विगिर्णंततः॥शंनोवातानुवाकेनशांतिंचापिप्रकल्पयेत्॥तस्मै
धुनावतेरोगीप्राङ्मुखायत्युदङ्मुखः॥सदक्षिणंपूजितायदद्याद्दानमनुत्तममिति
॥गोत्रायनामर्थोक्तपूजितायइमंसोपस्करंमेषंप्रत्यक्षंराजतंवा॰रुप्यंरैवतसंक
ल्पोक्तफलकामस्तुभ्यमहंसंप्रददेनममेतिदत्वाप्रार्थयेत्॥बोधायनः॥देवानां
योमुखंहव्यवाहनःसर्वपूजितः॥तस्यत्वंवाहनंपूज्यंदेवेन्द्रैर्महर्षिभिः॥अग्निमां
द्यंपूर्वकर्मविपाकोत्थंतपन्मम॥तत्सर्वंनाशयेत्क्षिप्रंजठराग्निंप्रवर्धयेदिति॥विप्र
स्तुभ्यगेदेवस्यत्वेतिप्रतिगृह्य[illegible]कामस्तुतिंपठेत्॥ततःस्ववर्णादक्षिणांदत्वा
यथाशक्तित्रयसीब्राह्मणान्भोजयित्वास्वसुहृद्युक्तोभुंजीतेति॥इतिमंदाग्नित्व

हरं मेषदानं ॥ ॥ अथ दश अचलदानानि ॥ मात्स्ये ॥ ॥ प्रथमो धान्यशैलः स्याद्द्वितीयो लव
णाचलः ॥ गुडाचलः तृतीयः स्याच्चतुर्थो हेमपर्वतः ॥ तिलशैलः पंचमः स्यात्षष्ठः का
र्पासपर्वतः ॥ सप्तमो घृतशैलः स्यादष्टमो रत्नपर्वतः ॥ नवमो राजतः शैलो दशमः ।
शर्कराचल इति ॥ कालं मात्स्ये ॥ अयने विषुवे चैव व्यतीपाते दिनक्षये ॥ शुक्लपक्षे तृती
यायामुपरागे तिथिक्षये ॥ विवाहोत्सवयज्ञेषु द्वादश्यामथवा पुनः ॥ शुक्लायां पंचद
श्यां वा पुण्यर्क्षे वा विधानतः ॥ धान्यशैलादयो देया यथाशास्त्रं विधानतः ॥ तीर्थे वायत
ने वापि गोष्ठे वा भवनांगणे ॥ तत्र चतुरस्रं द्वादशहस्तं मंडपं उदक्प्रवं प्राक्प्रवं वा प्रा
च्यामुदीच्यां वा एकमेव द्वारं न चत्वारि ॥ तोरणमप्येकमेव मंडपं गोमयेनोपलिप्य कु ९५
शानास्तीर्य तन्मध्ये पर्वतं कुर्यात् ॥ पर्वते निष्कैक्षैर्युतं ॥ धान्यद्रोणसहस्रेणोत्तमो

त्तमो गिरिः ॥ पंचशतिको मध्यमः ॥ त्रिभिः शतैः ॥ कनिष्ठः स्यान्मेरुर्व्रीहिचयो महान्
॥ मध्ये तदुपरि मंदारपारिजातककल्पवृक्षादयो हेममयास्त्रयः ॥ मध्ये कल्पतरुर्मंदा
रपारिजातौ दक्षिणोत्तरयोः ॥ पूर्वमयोः हरिचंदनसंतानौ मुक्ताफलवज्रगोमेदगरु
त्मतनीलरत्नवैडूर्य ॥ एतानि मुक्ताफला पूर्वादिदिगवस्थितरत्नं गचतस्फनिवे
शपानि ॥ मंदारश्च श्रीखंडगडैरन्वितः प्रवालवाविन्तः ॥ शुक्तिशिलातलततलखात् ॥
शर्कराचल इति हरिचंदने तिनारावनपकौ ॥ तत्र पूर्वादि दिक्षु ब्रह्मविष्णुरुद्रसूर्यप्रतिमा
ः पश्चिमसंघा मुनिसंघाश्च हैमाः प्रागादिदिक्चतुष्टये क्रमेण पूर्वोक्तमुक्ताफलादिनि
र्मितैः रौप्यशृंगचतुष्कं तदुपरि दिगष्टके रौप्यमिंद्रादिलोकपालप्रतिमाष्टकसमंता ।
क्षीरखंडैर्लतानां स्थाने प्रवालशिलाशुक्तीः प्रागादिषु मेघानां श्वेतपीतकर्बूररक्तव ।

स्त्राणिवंशातमिक्षुतल्लरूप्यगतंगंधपुष्पनानाफलानिचपरितःस्थोरौप्यपंचवर्णवि
तानकंचोपरिविधीयात्॥ततोयवैर्मेरोःषोडशांशेनप्राच्यांमंदारंतदुपरितरूपं
गणत्रयंकदंबंचसौवर्णकदंबमूलेहेमःकामदेवमरुणोदसरस्थानेदुग्धपूर्णरौ
प्यपात्रेरौप्यंचैत्ररथाख्यवनंगंधपुष्पफलवस्त्राणिचस्थापयेत्॥याम्यांमेरुषोडशां
शेनगोधूममयंगंधमादनं॥तदुपरिसौवर्णजंबूकवृक्षंतन्मूलेसौवर्णमुदङ्मुखधनदं
मानससरस्थानेसघृतंरौप्यपात्रंरौप्यंगंधर्वाख्यवनंनानापक्कफलवस्त्रमाल्यानिच
स्थापयेत्॥पश्चिमेमेरुषोडशांशात्तिलमयंविपुलंपर्वतंतदुपरिसौवर्णपिप्पलंत
न्मूलेप्राङ्मुखींसौवर्णहंसप्रतिमांसितोदसरस्थानेदधिपूर्णरौप्यपात्रेरौप्यंवैभ्रा
जवनंवस्त्रफलमाल्यानिचस्थापयेत्॥उत्तरेमेरुषोडशांशामितमाषैःपार्श्वं

पर्वतंतदुपरिसौवर्णवटंतन्मूलेदक्षिणामुखींसवत्सांसुवर्णधेनुंभद्रस्थानेमधुपूर्ण
रौप्यपात्रेरौप्यंसवित्रंवनंवस्त्रफलमाल्यानिचस्थापयेत्॥ ॥एवंवक्ष्यमाणेपर्वते
ष्वपिमेरुद्रव्यचतुर्थांशेनलवणादिद्रव्येणप्रागादिषुनिष्कंपर्वतान्ज्ञेयाः॥अत्राचा
र्यस्त्वेकः॥ऋत्विजश्चत्वारः॥प्राच्यामेकमेवकुंडमितितत्रैवजुहुयुः॥अथयजमान
ःकृतनित्यक्रियः॥पुण्यकालेअद्येत्यादि०र्थअप्सरोगंधर्वयुतविमानकरणकस्वर्गलो
कगमनसायमन्वंतरकालेदेवलोकनिवासोत्तरमृत्युलोकराजराजत्वकामईश्वरप्रीति
कामोवाथोधान्यपर्वतदानंकरिष्यइतिसंकल्प्य॥आचार्यमृत्विजश्चवृत्वामधुपर्का
दिनासंपूज्यमंडपपूजनाद्याचार्यविनियोगांत्तंकुर्यात्॥ततआचार्योग्निनवग्रहस्थापना
दिकुंडसमीपस्थितकलशस्थापनांतंकुर्यात्॥ ॥अथऋत्विजप्राक्कुंडेयहविहा

त्रिंशद्देवताभ्यः तन्नमंत्रैर्घृताक्ततिलैः पृथग्यवधान्यां मिलितान्यां कुर्युश्चेति त्रिभि
ःसाधनैः प्रत्येकमष्टवारं कृत्वा दशलोकपालेभ्यो ष्टवसुभ्य एकादशरुद्रेभ्यो द्वादशा
दित्येभ्यश्च प्रत्येकमष्टाष्टसंख्यया समिद्भिर्वाज्याहुतिभिर्वा कुर्युः ततः पुरुषसूक्तेन ब्र
ह्मविष्णुरुद्रेभ्यः समित्तिलैर्वा सूर्यकामदेवधनदहंसकामधेनुभ्यस्तिलैर्घृतेन वाष्टा
ष्टाष्टसंख्यातं जुहुयुः॥ तत्र चतुःपंचाशद्देवताभ्यस्तिलैर्घृतेनचेति॥ ततो यजमानो मे
रुमेवरूपं प्रपूजयेत्॥ तत्र मंत्रः॥ त्वं सर्वदेवगणधामनिधे विरिराजमस्म हृहे षमरपर्वत
नाशयाशु॥ क्षेमं विधत्स्व कुरु शांतिमनुत्तमां नः संपूजितः परमभक्तिमता मयाय॥ त्व
मेव भगवानीशो ब्रह्मा विष्णुर्दिवाकरः॥ मूर्तामूर्तं परं बीजमतः पाहि सनातन॥ यस्मा ५५
त्वं लोकपालानां विश्वमूर्तेश्च मंदिरं॥ रुद्रादित्यवसूनां च ततः शांतिं प्रयच्छ मे॥ यस्मा

दमूर्त्यममरैर्नारीभिश्च शिखरस्तव॥ तस्मान्मामुद्धराशेषदुःखसंसारसागरात्॥ मं
दरस्यतु॥ यस्माच्चैत्ररथेन त्वं भद्राश्वप्रमुखेन च॥ शोभसे मंदराक्षिप्रमेवं तुष्टि
करो भव॥ गंधमादनस्यतु॥ यस्माच्चूडामणिर्जंबूद्वीपे त्वं गंधमादन॥ गंधर्व
वनशोभावानतः कीर्तिर्दृढास्तु मे॥ सुपार्श्वस्यतु॥ उत्तरैः कुरुभिर्यस्मात्सा
वित्रेण वनेन च॥ सुपार्श्वशोभसे नित्यमतः श्रीरक्षयास्तु मे॥ ततः सर्वेषां जा
गरणे कृते प्रातः कृत्वा कृतनित्यक्रियः कुंडसमीपस्थकलशजलेन सपरिवारं य
जमानमभिषिंचेयुः ततो यजमानो गृहीतकुसुमः मेरुं प्रदक्षिणीकृत्योपतिष्ठे
त्॥ अन्नं ब्रह्म रसः प्रोक्तामन्ने प्राणाः प्रतिष्ठिताः॥ अन्नाद्भवंति भूतानि जगदं
ते॥ अन्नं नमेवयतो लक्ष्मीरन्नमेव जनार्दन॥ धान्यपर्वतरूपेण पाहि तस्मान्नमो

नम॥ इतिफलच्छायपुष्पाञ्जलिं प्रक्षिप्य नमस्कृत्य प्राङ्मुखोपविष्टायोदङ्मुखोस्थो गु
र्वादिभिः क्रमेण गिरिं दद्यात्॥ अद्येत्यादि॰ गोत्राय शर्मणे सालंकृताय गुरवे अप्सरो
गंधर्वयुत विमानकरणक स्वर्गलोक गमनानंतरं सप्तमन्वंतरशतावधि समये
देवलोकनिवासोत्तरभूर्लोकराजराजत्वप्राप्तिकाम इमं धान्यमयमेतं सुवर्णमंद
रादिवृक्षपंचक सौवर्णब्रह्मविष्णुरुद्रार्कादिप्रतिमायुक्तं मुक्ताहीरकादिभूषित
रौप्यमयशृंगचतुष्कशोभितरूप्यमयेंद्रादिदशलोकपालप्रतिमायुतं रौप्यमय।
वितयान्वितं इक्षुवंशनिर्मितकंदरं दिक्चतुष्टयस्थापितरौप्यपात्रस्थितघृताद्यस्त्र
वर्णं दिक्चतुष्टयस्थापितकर्पूररंकवस्त्राबुदधवं नानाफलमाल्यवितानाद्युपक ७८
रणसहितं तुभ्यमहं संप्रददे॥ नममेति गुरुहस्ते दद्यात्॥ स च ॐ स्वस्ति देवस्य।

त्वेति प्रतिगृह्य यथाचारं कामसूक्तं पठेत्॥ यजमानः कृतैतद्धान्यमयमेरुपर्वत।
दानकर्मणः सांगतासिध्यर्थं इमां गां दक्षिणात्वेन तुभ्यं॰ नममेति दद्यात्॥ चतु
र्विंशतिधेनुपक्षे गुर्वेष्टौ गुरवे चतस्रश्चतस्र ऋत्विग्भ्यः॰ दशपक्षे गुरवे षट्॥ ऋत्वि
ग्भ्यः एकैका एकधेनुपक्षे तु गुरवे एकमेव कपिला॥ ऋत्विग्भ्यः सुवर्णं दद्यात्॥॥
इति मदनरत्नादयः॥ ॥एवं पूर्वस्थितमंदरादिविष्कंभसप्रतिमं सोपस्करं गोत्राय
शर्मणे ऋत्विजे तुभ्यमहं संप्रददे नममेति दद्यात्॥ एवमेव दक्षिणस्थं गोधूममयं
गंधमादनपर्वतं यथा पश्चिमस्थतिलमयविपुलाख्यपर्वतं तथा उत्तरदिक्स्थ
माषमयं सुपार्श्वनामपर्वतं ऋत्विग्भ्यो दद्यात्॥ लवणाचलादिदानप्रयोगे बु
धान्यपदस्थाने लवणादिपदं प्रक्षेपं॥ ततत्फलानि तु तत्र वक्ष्यामः॥ ततो ग्रह

दा०चं०टी०
५८

वेद्यांयजमानोदेवताःसंपूज्यावाहिताश्चदेवताश्चसंपूज्यनमस्कुर्यात्॥गुरुस्तादेव
ताविसर्जयेत्॥ततोयजमानोमंडपंगृहपीठप्रतिमोपस्करादिसर्वंगुरवेप्रतिपा
द्यतूयसीदद्यात्॥प्रमादात्कुर्वतांकर्मयस्यस्मृत्येतिकर्मेश्वरार्पणंकृत्वाब्राह्मणा
न्भोजयित्वाशिषोगृहीत्वास्वयंसुहृद्युक्तोभुंजीतेति॥ ॥इतिधान्यमेरुपर्वतसाधा
रणदानप्रयोगः॥ ॥अथलवणाचलदानं॥ ॥पाद्मे॥उत्तमःषोडशद्रोणःकर्तव्यो
लवणाचलः॥मध्यमःस्यात्तदर्धेनचतुर्भिरधमःस्मृतः॥वित्तहीनोयथाशक्त्याद्रो
णादूर्ध्वंतुकारयेत्॥चतुर्थांशेनविष्कंभपर्वतान्कारयेत्पृथक्॥अथन्यायः॥सव
विष्कंभपर्वतेष्वत्रयद्दतिमदनःविधानंतुपूर्ववत्॥हेमतरून्लोकपालान्का ५८
मदेवादिचादिनापिपूर्ववत्॥तथैवसंपूज्यप्रार्थयेत्॥मंत्रस्तु॥सौभाग्यरससं

भूतोयतोयंलवणोरसः॥तदात्मकत्वेनचमांपाहिपापंनमोनमः॥यस्मादन्नरसा
:सर्वेनोत्कृष्टालवणंविना॥प्रियंचशिवयोर्नित्यंतस्माच्छांतिंप्रयच्छमे॥विष्णुदेहसमु
द्भूतंयस्मादारोग्यवर्धनं॥तस्मात्पर्वतरूपेणपाहिसंसारसागरात्॥अद्येत्यादि०
नेकल्पपर्यंतंउमालोकप्राप्त्यर्थमनंतरंपरमगतिप्राप्तिकामईश्वरप्रीतिकामो
वालवणाचलदानंकरिष्यइतिसंकल्प्यअथमेवविशेषोन्यत्सर्वंपूर्ववत्॥इतिल
वणाचलदानं॥ ॥अथगुडाचलदानं॥ ॥पाद्मे॥अथातःसंप्रवक्ष्यामिगुडप
र्वतमुत्तमं॥यत्प्रदानान्नरःस्वर्गंप्राप्नोतिसुरपूजितं॥उत्तमोदशभिर्भारैर्मध्यमः
पंचभिर्मतः॥त्रिभिर्भारैःकनिष्ठःस्यात्तदर्धेनाल्पवित्तवान्॥तुल्यास्त्रियोपस्करात
न्नारस्माद्धरोतिस्मुत्तल्पमरः॥विधिस्तुपूर्ववत्॥प्रार्थनामंत्रस्तु॥यथादेवेषु

विश्वात्मा प्रवरश्च जनार्दनः ॥ सामवेदस्तु वेदानां महादेवस्तु योगिनां ॥ प्रणवः
सर्वमंत्राणां नारीणां पार्वती यथा ॥ तथा रसानां प्रवरः सदैवेक्षुरसो मतः ॥
मम तस्मात्परां लक्ष्मीं ददस्व गुड सर्वदेति ॥ यस्मात्सौभाग्यदायिन्या भ्राता त्वं
गुड पर्वत ॥ नवास श्चापि पर्वत्यास्तस्मान्यापाहि सर्वदेति ॥ दानवाक्यं तु ॥ ॥ अ
द्येत्यादि ० र्थं मम सकलपापक्षयोत्तरं गंधर्वपूज्यमानत्वपूर्वककल्पशतविधि
गौरीलोकप्राप्त्यनंतरं संपंनापराजितायुरारोग्यापूर्वकसप्तद्वीपाधिपतित्वकाम
ईश्वरप्रीतिकामो वेति संकल्प्य दाने च विशेषो मत्सूर्वं पूर्ववदिति ॥ ॥ इति गुडाचल
दानं ॥ ॥ अथ स्वर्णाचलदानं ॥ ॥ पाद्ये ॥ उत्तमः पलसाहस्रो मध्यमः पंचति
शतैः ॥ तदर्धेनाधमस्तद्वत् स्वल्पवित्तोपि शक्तितः ॥ अल्पवित्तः पालादूर्ध्वं कुर्यात् ॥

धान्यपर्वतवद्विधानं ॥ पर्वतं संपूज्य प्रार्थयेत् ॥ मंत्रास्तु ॥ नमस्ते ब्रह्मगर्भाय ब्रह्मबी
जाय वै नमः ॥ यस्मादनंतः फलदास्तस्मात्पाहि शिलोच्चय ॥ यस्मादग्नेरपत्यं त्वं यस्मा
त्तेजो जगत्पतिः ॥ हेमपर्वतरूपेण तस्मात्पाहि सदा ममेति ॥ दानवाक्यं तु ॥ अद्येत्या
दि ० र्थं मम सकलपापक्षयोत्तरं कल्पावधि ब्रह्मानंदकारकब्रह्मलोकभोगानंत
रं परमपदप्राप्तिकाम इति संकल्प्य दानावाक्ये च विशेषः ॥ अत्र सर्वं गुर्वादिभ्य एव
देयं तदर्धं तद्व्यविषयं ॥ बहूनां वा पुंसां तुल्यापुरुषदानवत्यर्थं चतुर्थांशो वा गुरवे दत्वान्य
द्विजेभ्यो वदेयामिति हेमाद्रिः ॥ ॥ इति स्वर्णाचलदानं ॥ ॥ अथ तिलाचल
दानं ॥ ॥ पाद्ये ॥ उत्तमो दशभिर्द्रोणैः पंचभिर्मध्यमो भवेत् ॥ त्रिभिः कनिष्ठो राजेंद्र
तिलशैलः प्रकीर्तित इति ॥ वृक्षविष्कंभादि तु ॥ सर्वं पूर्ववत् ॥ मंत्रास्तु ॥ यस्मा

न्मछयनेविष्णोर्देहस्वेदसमुद्भवाः॥तिलाःकुशाश्चमाषाश्चतस्माछंनोभवेदिह
॥हव्यकव्येषुयस्माच्चतिलैरेवेनिरक्षणं॥नवकुद्वारवोलेंइतितिलाचलननोक्तते॥
दानवाक्यंतु॥ ॥अद्येत्यादि०थंममसकलपापक्षयदीर्घायुष्यपुत्रपौत्रसमन्वि
तानंतरपितृदेवगंधर्वपूर्वकपूज्यमानत्वपूर्वकब्रह्मलोकगमनानंतरसप्तद्वीप्यवेश
वपदप्राप्तिकामइतिसंकल्प्यंचविशेषोन्यत्सर्वपूर्ववत्॥ ॥इतितिलाचलदा
नं॥ ॥अथषष्ठोंयेयव्रतेतिलपर्वतदानं॥स्कांदे॥पूर्वाह्णेसंगवेस्नातुःशुचिर्निर्मल
समाहितः॥सर्वपापविशुध्यर्थंनियमस्थोभवेन्नरः॥नियममंत्रास्तु॥त्रिदेवस
व्रतदेवाःकरिष्येभुक्तिमुक्तिदं॥भवंतुसंनिधेमेद्यत्रयेदेवास्त्रयोनयइति॥त
थाब्रह्माविष्णुमहेशानांसौवर्णस्मलसंख्यया॥प्रतिमास्तुप्रकर्तव्यास्तदर्धेनवि

ज्ञेत्तम॥सांग्रंद्रोणत्रयंशांतोद्रोणांतिलपर्वतः॥कर्तव्यःपर्वतोविष्णुब्रह्मणोःपूर्वसं
ख्यया॥शय्यात्रयततःकुर्यादुपस्कारसमन्वितं॥संपूज्यविप्रवर्येभ्योदद्यात्स्वेच्छितमवा
प्नुयादिति॥ ॥अथास्यदानप्रयोगः॥ ॥यजमानःकृतनित्यक्रियःपुण्यकालेतीर्था
दौस्नात्वाचम्याद्येत्यादि०थंममेप्सितफलावाप्तिमेरुदानेसमफलावाप्तयेचार्धोदये
तिलपर्वतदानंकरिष्येइतिसंकल्प्य॥वेदपारगान्ब्राह्मणान्वृत्वाययाविभवंवस्त्राद्यै
कारादिभिःसंपूज्यततःतिलपर्वतेब्रह्मादीनांप्रतिमास्वर्णमयाःसंस्थाप्यषोडशोपय
चारैःसंपूज्यब्रह्मादीनांअंगपूजांकुर्यात्॥तद्यथा॥नमोविश्वसृजेतुभ्यंसत्यायपरा
मात्मने॥देवायदेवपतयेयज्ञानांपतयेनमः॥ॐब्रह्मणेनमः॥पादौपूजयामि॥इ
त्याक्षतगंधपुष्पाणिचप्रकल्पयेत्॥ॐहिरण्यगर्भायनमः॥ऊरूपू०॥ॐपरमात्मनेन०

दा०चं०का० जानू० ॐ वेधसे० जंघे पू० ॐ पद्मोद्भवाय० गुह्यं ॐ हंसाय० कटिं पू० ॐ स्नातानंदाय० व
क्षं० ॐ सावित्रिपतये० बाहू पू० ॐ ऋग्वेदाय० पूर्ववक्त्रं पू० ॐ यजुर्वेदाय० दक्षिणवक्त्रं
८२ पू० ॐ सामवेदाय० पश्चिमवक्त्रं पू० ॐ अथर्ववेदाय० उत्तरवक्त्रं पूज० ॐ चतुर्वक्त्राय०
वक्त्रं पू० ॐ हंसाय० नेत्राणि पू० ॐ कमलासनाय० ॥ शिरसि पूजया० ॐ लोकेशाय
०सर्वांगपूजया० ततो लोकपालान्परितस्तन्मंत्रैः पूजा० ततो विष्णुवांगपूजा ॥ हिर
ण्यगर्भपुरुषप्रधानाव्यक्तरूपधृक् ॥ प्रसीदस्व मुखेनांतपूजां गृहाण मत्कृतां ॥ इति
संप्रार्थ्य पूजयेत् ॥ ॐ अनंताय० ॥ पादौ पू० ॐ विश्वरूपाय० ऊरू० ॐ मुकुंदाय० जा
नु पू० ॐ गोविंदाय० जंघे पू० ॐ प्रद्युम्नाय० गुह्यं पू० ॐ यज्ञनाथाय० नाभिं पू० ॐ लं ८२
बोदराय० उदरं पू० ॐ कौस्तुभवक्षसे० वक्षः पू० ॐ चतुर्भुजा० बाहू० ॐ विश्वमुखा

०मुखं० ॐ सहस्रशिरसे० शिरसि० ॐ सर्वेश्वरा० सर्वांगं० ततः शिवांगपूजा ॥ आदि
त्यचंद्रनयनो दिग्वासा दैत्यसूदन ॥ पूजां दत्तां मया भक्त्या गृहाण करुणाकर ॥ इति तथा म
हेश्वर महेशान नमस्ते त्रिपुरांतक ॥ जीमूतकेशाय नमो नमस्ते वृषभध्वज इति आद्यमंत्रे
ण संप्रार्थ्य द्वितीयेन नत्वा पूजयेत् ॥ ॐ ईशाना० पादौ० ॐ चंद्रशेखरा जानु० ॐ पशुप
तये० जंघे० ॐ शंकराय० ऊरू० ॐ उमाकांता० गुह्यं० ॐ नीललोहिता० नाभिं० ॐ कृ
त्तिवाससे० उदरं० ॐ नागयज्ञोपवीतिने० बाहू० ॐ पंचवक्त्रा० वक्त्रं० ॐ त्रिलोचना
०नेत्राणि० ॐ रुद्राय० शिरः० ॐ विश्वेश्वरा० सर्वांगं० इत्यंगपूजा ॥ ततः पंचामृता
द्युपचाराः पीठं छत्रं कमंडलुं श्वेतवस्त्रयुगं ब्रह्मणे ॥ पीतांबरद्वयं विष्णवे ॥ लोहि
तवस्त्रयुगं शंकराय ॥ कमलैस्तुलसीपत्रैर्बिल्वपत्रैश्च क्रमेणा संपूज्य ॥ ततो ब्रह्मा

विष्णुशिवेतानमंत्रेणक्रमेणाष्टोत्तरशतंतिलैर्घृताक्तैर्हुत्वाग्रामेकांकारया
त्॥ततः तिलपर्वतं प्रतिमात्रयंशाय्यात्रयंचदद्यात्॥संकल्पोक्तफलसंकी
र्त्यै॥गोत्रायशर्मणेसुपू॰मंत्रोतु॥यस्मात्त्रिभुवनेविष्णुर्देहस्वेदसमुद्भवाः॥
तिलाः कुशाश्चमाषाश्चतस्माच्छंनोत्रवैलह॥हव्यकव्येषुयस्माद्धतिलैरेवाभि
रक्षणं॥तवाकुदुरवौलेद्गतिलाचलनमोस्तुते इति॥अन्यत्सर्वंतिलाचल
दानवत्कुर्यात्॥स्कांदे॥अयोदयेतिसंप्राप्तेसर्वगंगास्नमंजसा॥पूतात्मानोद्वि
जाः सर्वेतवेर्युर्ब्रह्मसंमिताः॥यत्किंचिद्दीयतेदानंमेरुतुल्यंतुतद्भवेतिदि॥
तथैवाथाचात्रदानविशेषोनिर्णयामृते स्कांदे॥चतुःषष्टिपलंमुख्यममंत्रंतत्र
कारयेत्॥तत्रमष्टदलेचत्वारिंशत्पलंवापिपंचविंशतिमेववा॥तत्तुकांस्यम

यमुक्तंतत्रैव॥एवंसुघटितंकार्यंकांस्यभाजनमुत्तममितिस्कांदे॥निधायपायसं
तत्रयष्टमष्टदलंलिखेत्॥पद्मस्यकर्णिकायांतुकर्षमात्रंसुवर्णकं॥तदर्धंवेत
दर्धंवातदर्धंवापिकारयेत्॥कृत्वातुतंडुलैः शुक्लैःपद्ममष्टदलंतुवि॥अमंत्रस्था
पयेत्तत्रब्रह्मविष्णुशिवात्मकं॥तेषांपूजाततःकार्याश्वेतमाल्यैस्करोत्तमैः॥
वस्त्रादिभिरलंकृत्यब्राह्मणायनिवेदयेदिति॥अद्येत्यादि॰समुद्रसमग्रसंभ्यक्
पृथ्वीदानसमफलावाप्तिकामोगोत्रायशर्मणेसुपूजितायब्राह्मणायइदंपाय
सपूरितकांस्यपात्रमष्टदलपद्मस्थितंस्वर्णवस्त्रादिभिरलंकृतंब्रह्मविष्णु
शिवात्मकंविष्णुदेवतंतुभ्यमहंसंप्रददेनममेतिदत्वामंत्रस्तु॥स्वर्णपायसा
न्नंचयस्मादेतत्त्रयीमयं॥आवयोस्तारकंयस्मात्तद्गृहाणद्विजोत्तमेति॥कांस्य

पात्रदानमुक्तं स्कांदे॥ समुद्रमेखलां पृथ्वीं सम्यग्दत्वा तु यत्फलं॥ तत्फलं लभते म
र्त्यः कृत्वा दानमिमं त्रकमिति॥ अमत्रं पात्रं॥ इत्युद्देश्ये तिलाचलदानं कांस्य
पात्रदानं च॥ ॥अथ कार्पासाचलदानं॥ पाद्मे॥ कार्पासपर्वतस्तद्वद्विंशद्भारै
रिहोदितः॥ दशभिर्मध्यमः प्रोक्तः कनिष्ठः पंचभिः स्मृतः॥ भारस्यधनोत्तारे
णैकेन वा कुर्यात्॥ विधिस्तु धान्यपर्वतवत्॥ दानं तु प्रभातायां सर्वर्या॥ अरुणो
दयात्सूर्योदयात्प्राक् नाडिकाचतुष्टयमध्ये इत्यर्थः॥ अद्येत्यादि० श्रीत्यर्थम
मसकलपापक्षयोत्तराकल्पावधिरुद्रलोकतिवासनंतरं भूलोकराज्यत्वकामइ
तिसंकल्पेदानवाक्ये च वदेत्॥ मंत्रस्तु॥ त्वमेवावरणं यस्माल्लोकानामिह स
र्वदा॥ कार्पासाचल तत्तस्मात्वमघध्वंसनो भव॥ ॥इति कार्पासाचलदानं ८४

॥ ॥अथ घृताचलदानं॥ ॥पाद्मे॥ विंशत्याघृतकुंभानामुत्तमः स्याद्घृताच
लः॥ मध्यमस्तु तदर्धेन तदर्द्धेनाधमस्तु इति॥ अल्पवित्तस्तु द्वाभ्यां वापि
कुर्वीतेति॥ विष्कंभादिपर्वतांश्चतुरो यत्नेन कार्याः कुंभः पलसहस्रात्मकः इत्यु
क्तं दानविवेके॥ घृतकुंभः पात्रएव॥ शालितंडुलैः पूर्णानि पात्राणि कुंभाना
मुपरि निवेशयेत्॥ अहतसुक्लवस्त्रैरावेष्टयेत्॥ इक्षुदंडैः फलान्वितः अ
न्यत्सर्वं धान्यपर्वतवत् बोध्यं॥ उदयात्प्राक् घटिचतुष्टये मध्ये दद्यात्॥ ॥
अद्येत्यादि० श्रीत्यर्थं मम सकलपापक्षयपूर्वकहंससारसयुक्तं किंकिणीजा
लमालात्मकवर्णविमानकरणशंकरलोकगमनपूर्वकसिद्धचारणविद्याधरा
र्चितत्वतिसृष्टपितृसहितानंतसंप्लवावधिकविचरणकामेतिसंकल्पेदान

दा०चं०का० वाक्येचवक्तव्यं॥ मंत्रोतु॥ संयोगाद्घृतमुत्पन्नंयस्मादमृततेजसः॥ तस्माद्घृताची
८५ विश्वात्माप्रीयतांममशंकरः॥ यच्चतेजोमयंब्रह्मघृतेनचप्रतिष्ठितं॥ घृतप
र्वतरूपिणातस्मान्नःपाहिनृधरेति॥ ॥इतिघृताचलदानं॥ ॥पाद्मे॥ अथ
रत्नाचलदानं॥ ॥अथातःसंप्रवक्ष्यामिरत्नाचलमनुत्तमं॥ मुक्ताफलसह
स्रेणपर्वतस्यादिहोत्तमः॥ मध्यमःपंचशत्यातिकस्त्रिंशताताचाधमःस्मृतः॥
चतुर्थांशेनविष्कंभानारयः॥ वज्रगोमेदैःपूर्वे॰ इंद्रनीलेदक्षिणे॰ पद्मरागयुतः॥
स्कवर्णः वैडूर्यविद्रुमः दानवाक्यंतु॰ अद्येत्यादि॰ प्रीत्यर्थंममानेकजन्मकृत
ब्रह्महत्यादिपापक्षयोत्तरपरमेश्वरपूजितत्वसागनकल्पशतावधिविष्णुलोक ८५
निवासानंतरंअष्टापुरारीग्परूपगुणोपेतसप्तद्वीपावधिमहाकामइतिसंकल्प्ये

दानवाक्येचवक्तव्यं॥ मंत्रौतु॥ यथादेवगणाःसर्वेरत्नेषेवव्यवस्थिताः॥ त्वंचरत्ना
मयोनित्यमतःपाहिसदाचल॥ यस्माद्रत्नप्रसादेनवृष्टिंप्रकुरुतेहरिः॥ रत्नाचलप्र
सादेनतस्मान्नःपाहिसर्वतद्इति॥ अन्यत्सर्वंधान्यपर्वतवत्॥ ॥इतिरत्नाचलदा
नं॥ ॥अथरौप्याचलदानं॥ ॥पाद्मे॥ दशभिःपलसहस्रैरुत्तमोरजताचल
ः॥ पंचभिर्मध्यमःप्रोक्तस्तदर्द्धेनाधमःस्मृतः॥ अशक्तोविंशतिपलादूर्ध्वंकु
र्यात्॥ विष्कंभाद्रयस्तुरीयांशेति॥ अन्यत्सर्वंधान्यपर्वतवत्॥ दानवाक्यंतु॰ अद्ये
त्यादि॰ प्रीत्यर्थंममसकलपापक्षयपूर्वकदशाहस्रगोदानसमफलावाप्तिपूर्वकं
धर्वाप्सरोगणपूज्यमानत्वचत्रिषुवैतवेनयावदाब्दतसंपूर्वसोमलोकेनिवास
कामइतिसंकल्प्येदानवाक्येचवक्तव्यं॥ मंत्रस्तु॥ पितॄणांवल्लभंयस्माद्धरेर्हरोः

संकरस्य तु ॥ रजतं पातु तस्मान्नः शोकसंसारसागरादिति ॥ ॥इति रौप्याच
लदानं ॥ ॥अथ शर्कराचलदानं ॥ पाद्मे ॥ अष्टभिः शर्कराभारैरुत्तमस्यान्महा
चलः ॥ चतुर्भिर्मध्यमः ॥ प्रोक्तस्तदर्द्धेनाधमस्मृतः ॥ भारेण स्वल्पवित्तापि
भारार्द्धेनापि वा पुनः ॥ चतुर्थांशेन विष्कंभादयः मंदार पारिजात कल्पवृक्षा
दयो हैमा एव पूर्ववत् ॥ पूर्वपश्चिमे हरिचंदनसंतक्तो॰ धनदो दक्षि॰ मुखो गंधमा
दने ॥ प्राङ्॰मुखा वेदमूर्तिर्विपुलाचले ॥ हैमीक्तपार्श्वे दक्षिणामुखी स्करत्नी अ
न्यत्सर्वं धान्यपर्वतवत् ॥ अद्येत्यादि॰ शर्मन्न सकलपापक्षयानंतरकल्पशत
तवधि विष्णुलोकनिवासानंतरं सप्तद्वीपाधिपत्योचरं जन्मायुतत्र यावच्छिं
नायुरारोग्यादिकाम इति संकल्पे दानवाक्ये च वक्ष्यमाणमंत्रौ तु ॥ आरोग्यामृत

सारोयं परमः शर्कराचल तस्मान्मानंदकारित्वं कुरु शैलेंद्र सर्वदा ॥ अमृतं पीब
तां ये तु निपेतुर्भुवि शीकराः ॥ देवानां तत्समुत्थोयं पाहि नः शर्कराचल ॥ नमोत्तव
धर्नुर्मध्याद्भूता शर्करा यतः ॥ तन्मयोसि महाशैल पाहि संसारसागरादिति ॥ स
र्वत्र ब्राह्मणभोजनं दक्षिणा कार्यमेव ॥ दाता पूर्वद्युः कृतोपवासः परेद्युर्दानानंत
रं अक्षारालवणो भुंजीत ॥ एवं प्रसन्नचित्तो दानं दद्यादिति ॥ ॥इति शर्कराच
लदानं ॥ ॥इति दशाचलदानानि ॥ ॥अथ शिखरदानानि ॥ ॥विष्णुधर्मे ॥
गुडेस्तु वस्त्र लवण धान्य काजाति शर्करा ॥ खर्जूर तंदुल द्राक्षा क्षौमं मलयजे
न च ॥ फलैर्मनोहरैः रम्यैः शिखराणि प्रदापयेत् ॥ माघमार्गशीर्षवैशाखरोहि
णीयुतायां तृतीयायां प्रोष्ठपदस्थ कृततीयायां वा दद्यात् ॥ शिखरप्रमाणं तु

व्रा०चं०द्री० आत्मसमप्रमाणं प्रादेशमप्यधिकं शरीरार्धप्रमाणं सप्रादेशं वा॥ ॥अथास्य दा
नप्रयोगः॥ ॥उक्तकाले यजमानः कृतनित्यक्रियः पूर्वह्नि॥ अद्येत्यादि० र्थंम
८७ मदुःखदौर्भाग्यत्वाभावपूर्वककल्पकोटिशततत्रयावच्छिन्नगौरीभवननिवासा
नंतरं पृथ्वीपतित्वकामश्च गुडशिखरदानमहं करिष्ये इति संकल्प्य गणेशपूजा\
नादि नांदीश्राद्धांतं कृत्वा आचार्यवरणं॥ नियथाविभवं वस्त्रालंकारदक्षिणाभिर्मधु
पर्कपूजांतं कृत्वा आचार्यवरणादि० गोमयेनोपलिप्तायां भुवि इक्षुपात्राण्यास्ती
र्य मूले द्विहस्तविस्तारं इक्षुदंडमयमुत्पलं कृत्वा तदभ्यंतरे रक्तवस्त्रेणावेष्ट्य गु
डादि देयद्रव्येणापूर्य उपरि इक्षुपत्रकटमास्तीर्य तत्र हैमादिवस्त्रोपरि खंड ८७
वर्णानं चंद्रमौलिं पद्मासनां अक्षसूत्रकमंडलुवरदाभयकरीं हैमीं गौरीं सन्नि

खरां सूत्रेणावेष्ट्य कुंकुमादिना पूजयेत्॥ अथांगपूजा॥ ॐ भवान्यै नमः॥ पादौ
पूजयामि॥ ॐ कामिन्यै० जानुनी पू० ॐ कामदेव्यै० ऊरू पू० ॐ जगौप्रियै० नाभिं पू० ॐ
आनंदायै० हृदयं पू० ॐ नंदायै० स्तनौ पू० ॐ वेदास्त्रधारिण्यै० बाहवः पू० ॐ शितिकं
ठ्यै० कंठं पू० ॐ सुमुखायै० मुखं पू० ॐ ललितायै० शिरः पू० ॐ त्रिलोचनायै० नेत्रा
णि पू० ॐ चंद्रशेखरायै० भालं पू० ॐ सर्वात्मिकायै० सर्वांगं पू० इत्यंगपूजा॥ ततों
जलिना पुष्पाण्यादाय प्रदक्षिणीकृत्य पठेत्॥ यस्मान्निवासः पार्वत्याः शिखरं त्वस्म
रे कृतं॥ तस्मान्मां पाहि भगवंस्त्वं गौरीशंकरः सह पुष्पांजलिं समर्प्य नमस्कृत्य गीत
वाद्यनिर्घोषैः जागरं कुर्यात्॥ प्रभाते स्नानादि कृतनित्यक्रियः शिखरात्पश्चिमभागे
प्राङ्मुखः उपविश्य॥ अद्येत्यादि० संकल्पोक्तफलं संकीर्त्य गोत्राय शर्मणे इदं\

दा०चं०
८८

गुडशिखरंगौरीप्रतिमासहितंसोपस्करतुभ्यमहंसंप्रददेनममेतिदद्यात्॥ततः
स्वर्णंदक्षिणांदत्वाभूयसींचदत्वाब्राह्मणांश्चसंभोज्यतद्दिनेक्षारंघृतंवा।
ऽन्यतोमुक्तकेशास्तत्रीप्राश्नीयात्॥इक्षुवस्त्रादिशिखरपदस्थानेसंकल्पादौ
तत्तत्पदंतत्रवक्तव्यमितिविशेषः॥अन्यत्सर्वंपूर्ववत्इतिगुडशिखरादि
शिखरदानानि॥इतिनानाशिखरदानानि॥ ॥अथसमस्तपापहरं॥त्रिशू
लदानंकर्मविपाकसारे॥श्रुताध्ययनसंपन्नेयाचितारमकिंचने॥ब्राह्मयं
दातुमाहूतोदानार्थंनददातियः॥मनुष्याणांहिंसकश्चजगरेभूत्वावनेवनेत
॥वायुपुराणे॥कल्पयन्तेचतुर्दश्यांपर्णमष्टम्यांवासितेतरे॥कुर्याद्द्वादशनिष्कै ८८
स्त्रिशूलंलक्षणान्वितं॥सुवर्णमानंतुनिष्कचतुष्कःसौवर्णिकः॥षट्पंचा

शदधिकशतद्वयपलमूल्योवानानौनिधायसंपूर्णतिलताम्रविनिर्मितं॥पात्र
माढकमानंस्यात्तत्रशूलंन्यसेत्तुनः॥ततःशैवपंचाक्षरेणरुद्रप्रोक्तवैदिकमं
त्रेणत्रिशूलायनमः॥इतिनाममंत्रेणवात्रिशूलंसंपूज्यहैमविम्बरूपात्तक
मलोपरिसंपूज्य॥अघोरेभ्यइतिमंत्रेणप्रणिपत्यततोविप्रंवृत्वायथावित्तं
वस्त्रालंकारादिभिःसंपूज्यअद्येत्यादि०ममबुध्याबुद्धिपूर्वककायवाङ्मानकृ
तकर्मोपात्तजन्मार्जितान्यजन्मोपार्जितमनुष्यहिंसनदानार्थमाहूतब्राह्मणनि
राकरणजन्योदरस्थूलजनितपीडापनोदकामोयंस्वर्णमयत्रिशूलविरूपाक्ष
प्रतिमायुतःसोपस्करोगोत्रायशर्मणे०सुपूजितायतुभ्यमहंसंप्रददेनमम
ति॥मंत्रास्तु॥भगवन्भगनेत्रघ्नदक्षयज्ञप्रमर्दन॥तवायुधप्रदानेनया

पंनश्यंतुशंकर॥ युगांतेयेनलोकानांत्वमंतकविनाशन॥ विदग्धयास्वपाने
नतेनपापंव्यपोहय॥ येनदग्धंक्षणार्धेत्रिपुरासुरदुर्जयं॥ तेनपाशुपते
नाशुमममूलविनाशय॥ यदिबुद्धिकृतंपापंमनोवाक्कायमानसं तत्सर्वंदह
मयेशस्त्रिशूलदानप्रभावतःइति॥ ततःसुवर्णपरिमितांदक्षिणांदत्वाद्विज
भोजनसंकल्पंविधायतत्प्रसीदत्वाकर्मेश्वरार्पणंकुर्यात्॥ इतित्रिशूलदानं
॥ ॥अथदारिद्र्यहरंकुबेरमूर्तिदानं॥ वायवीये॥ दरिद्रोजायतेमर्त्योदानवि
घ्नंकरोतियः ऐश्वर्यंजायतेयेनकर्मणातच्छृणुष्वमे॥ पक्षार्द्धेनतदर्द्धेनचतुर्था
शेनवापुनः अर्थसार्धमाषद्वयादारभ्यपंचाशत्माषावधिवावित्तशाठ्यरा
हित्येनपुष्पकविमानस्थांकुबेरमूर्तिंपार्श्वयोःपद्मशंखाकारयुतांकृत्वाशु

भेह्नि अद्येत्यादि० ममेहजन्मनिपूर्वजन्मनिवादानविघ्नजनितदारिद्र्यविनाशपू
र्वकयथेप्सितधनप्राप्त्यर्थंकुबेरमूर्तिदानंकरिष्यइतिसंकल्प्यगोमयेनोपलिप्तेद्वि
चतुरेकद्रोणातंडुलराशौकुबेरप्रतिमांराजाधिराजायेतिसंपूज्यततःआग्नेयास्व
गृह्यविधिनाग्निंप्रतिष्ठाप्यसमिदाज्यचरुभिःप्रत्येकमष्टोत्तरशतंराजाधिराजा
येतिमंत्रेणहुत्वाततःसंस्रवयाघृताक्ततिलैर्व्याहृतिभिश्चहुत्वाकुबेरमूर्तिंदद्यात्
अद्येत्यादि० प्रीत्यर्थंममेहजन्मनिजन्मांतरेवाकृतदानविघ्नजनिततीव्रदारि
द्र्यविनाशपूर्वकंयथेप्सितधनप्राप्त्यर्थंचइमांकुबेरमूर्तिंकुबेरपुष्पकविमान
स्थांपार्श्वयोःपद्मशंखाकारयुतांसोपस्करांगोत्रायशर्मणेसुपूजितांयतुभ्य
महंसंप्रददेनममेति॥ मंत्रोत्तुयक्षराजाधिपतेदेवकुबेरनरवाहनपद्मशंख

दा०चंद्री० निधीनांत्वंपतिश्रीकंगवद्धनदानविधानमयाप्राप्तदारिद्र्यंनवदुःखदातस्स
९० र्वंतवदानेनपापमाशुविनाशयेति॥ देयद्रव्यत्तीयांशंचतुर्थांशंवासुवर्णद
क्षिणांदद्यात्॥ इतिविशेषः ततोब्राह्मणभोजनसंकल्पंकृत्वान्यसंचदद्या
त्॥ इतिदारिद्र्यहरंकुबेरमूर्तिदानं॥ ॥अथउमामहेश्वरमूर्त्तिदानं॥ ॥तद्विधे
॥अद्येत्यादिसशैलवनकाननससागराकपृथ्वीदानसमफलावाप्तयेइमामु
मामहेश्वरमूर्तिंसालंकृतांसोपस्करांसोपस्करणांगोत्रायशर्मणेतुभ्यमं०देन
ममेतिमंत्रस्तु॥ शिवशक्त्यात्मकंयस्मात्तुगदेतच्चराचरं॥ तवदानेनमेवरां
न्वयांपृथिवीस्यात्फलतिश्चलां॥ सुवर्णदक्षिणांदद्यात्॥ ॥इतिउमामहेश्वरमू ९०
र्तिदानं॥ ॥अथलक्ष्मीनारायणमूर्तिदानं॥ ॥स्कांदे॥ संकल्पादिपूर्ववत्॥

मंत्रस्तु॥ लक्ष्मीनिवासदेवेशशंखचक्रगदाधर॥ तवदानातियरालक्ष्मीमह
हेस्यास्सदाध्रुवं॥ सुवर्णदक्षिणांदद्यात्॥ ॥इतिलक्ष्मीनारायणमूर्तिदानं॥ ॥
॥अथहरिहरमूर्त्तिदानं॥ ॥संकल्पादिपूर्ववत्॥ मंत्रस्तु॥ ॥शिवोनामशिवं
साक्षात्तथानारायणोपिच॥ अस्यदानाद्धरिहरौप्रसन्नौस्तःसदामम॥ ॥इति
हरिहरमूर्तिदानं॥ ॥अथसूर्यमूर्त्तिदानं॥ ॥सूर्यारुणसंवादे॥ संकल्पादिपू
र्ववत्॥ मंत्रस्तु॥ ग्रहाणामधिपःसूर्यःपद्महस्तःप्रभाकरः॥ दानेनास्यरवि
रायुःश्रांतिश्रीदःसदामम॥ सुवर्णदद्यात्॥ ॥इतिसूर्यमूर्त्तिदानं॥ ॥अथ
गणपतिमूर्तिदानं॥ ॥स्कांदे॥ यजमानमतीरीशगद्विश्वनाथमुमासुतं॥ विघ्ने
शारत्नप्रचुरतुसंदास्यामभीष्टदं॥ इतिप्रार्थ्यसंकल्पादिकृत्वादद्यात्॥ मंत्रस्तु

दा०चंद्री०
८१

॥ गणनाथो विघ्नहरो गौरीसूनुरभीष्टदः ॥ अस्य दानेन मे शांतिं प्रसंनोस्तु विनाय
क इति ॥ इति गणेशमूर्तिदानं ॥ ॥ अथ जगदंबिकादानं ॥ देवीपुराणे ॥ संक
ल्पादि पूर्ववत् ॥ मंत्रस्तु ॥ आदिमाद्या महाशक्तिर्विश्वमाता जगन्मयी ॥ दानेना
स्याः प्रसंनास्तु सर्वदा मम शांभवी ॥ इति जगदंबिकादानं ॥ ॥ अथ सरस्वति
मूर्तिदानं ॥ वायवीये ॥ संकल्पादि पूर्ववत् ॥ मंत्रस्तु ॥ वीणापुस्तकसंयुक्ता
वाङ्मूर्तिः समलंकृता ॥ गृहाण त्वं द्विजश्रेष्ठ वाक्सिद्धिरस्तु मे मम ॥ इति
सरस्वतीमूर्तिदानं ॥ ॥ अथ शालग्रामदानं ॥ हेमाद्रौ पाद्मे ॥ शालग्राममद्रि
नाचक्रे यो दद्याद्दानमुत्तमं ॥ भूचक्रं तेन दत्तं स्यात्सशैलवनकाननमिति ॥ अ ८१
द्येत्यादि० सशैलवनकाननभूचक्रदानसमफलकामोयं शालग्रामो घंटाभू

षादिसोपस्करणतुलसीपत्राद्यर्चितः सवस्त्रताम्रादिपात्रे स्थितो यथाश
क्ति सोपस्करः सालंकृतो गोत्राय शर्मणे सालंकृताय तुभ्यमहं संप्रददे न म
मेति मंत्रस्तु ॥ महाकोशनिवासेन चक्राद्यैरुपशोभितं ॥ शालग्रामप्रदा
नेन मम संतु मनोरथा इति ॥ सुवर्णदक्षिणा सर्वत्र ॥ न रजतं ॥ एवं संकल्पा
दि सर्वदेवमूर्तिशिलादानेष्वपि योजनीयं ॥ मणिः शालग्राम इति हेमाद्रि
णा व्याख्यातं ॥ घोरप्रतिग्रहेषु च गणितमिति ॥ इति शालग्रामदानं ॥ ॥ अ
थ शिवनाभिदानं ॥ लैंगे ॥ संकल्पादि पूर्ववत् ॥ मंत्रस्तु शालग्रामशिला
पुण्या भुक्तिमुक्तिप्रदायिनी ॥ इति ॥ शिवनाभिःप्रदानेन पूर्णाः संतु मनोर
थाः ॥ इति तथा महाकोशनिवासस्त्वं शालग्राम महेश्वर ॥ प्रीयतां तव दानेन

दा०चंद्री० प्राप्त विष्णुमहेश्वराः ॥ इति शिववाजिदानं ॥ अथ लिंगदानं ॥ लैंगे ॥ संकल्पादि
पूर्ववत् ॥ मंत्रस्तु ॥ सालंकारमहालिंगनिवासत्वं वृषध्वज ॥ प्रीयतां वरदेवे
१८२ शः शिवो गौर्यायुतस्सने ॥ तथा ॥ कैलासवासी गौरीशं भगवन्त्रिगुणेत्रन्त ॥
चराचरात्मके लिंगे रूपं दिव्यात्तु वांछितमिति ॥ रुद्राक्षमालासहितं लिंगं द
द्यात् ॥ कोटिगुणपुण्यं भवति ॥ अथ मारकतलिंगदानं ॥ इदं मारकतं लिंगं रौ
प्यपीठसमन्वितं ॥ धान्यैर्द्रु दिव्यभक्तियुक्तमेकादशायुतान्वितं ॥ संप्रदद्याद्विधा
नेन पृथ्वीदानफलं लभेत् ॥ इति ॥ रुद्राक्षमालफलं ॥ संकल्पादिकमेव ॥ का
श्मीरलिंगदाने तु मारकतपदस्थाने काश्मीरपदं वदेत् ॥ मंत्रस्तु ॥ मृत्युंजये १८२
शं गौरीशसूनुर्मां वृषवाहन ॥ संप्रदानेन तेशं नो मम संतु मनोरथा इति ॥ इति

लिंगदानं ॥ ॥ अथ घंटादानं ॥ पाद्मे ॥ अद्येत्यादि० मम संर्केस्य घंटानादश्रवण
लोकनिवासप्राप्तिकामो० गोत्राय शर्मणे सुपूजिताय० इमां घंटां विष्णुदैवत्यां
तुभ्यमहं० ददे न मम इति द० मंत्रस्तु ॥ घंटा देवप्रिया नित्यं दैत्यत्रासकरा सदा ॥ संप्रदा
नेन मे तस्या विजयोस्तु सदा मम इति ॥ सुवर्णदक्षिणा देया ॥ इति घंटादानं ॥ अथ
शंखदानं ॥ पाद्मे ॥ अद्येत्यादि० गोत्राय शर्मणे० अयं शंखः सुपूजिताय० विष्णुदै
वतस्तुभ्यमहं संप्र० न मम इति मंत्रः ॥ शंखं वै शुभकरं नित्यं सर्वमंगलदायकं ॥ त
स्मादस्य प्रदानेन शांतिरस्तु सदा मम इति ॥ सुवर्णदक्षिणा ॥ इति शंखदानं ॥ अ
थ कालचक्रदानं ॥ ॥ मृत्युंजयकल्पे ॥ अद्येत्यादि० मम महामृत्युनिरासार्थं
कालचक्रदानमहं करिष्ये इति संकल्प्य ॥ शक्तितो रौप्यकृतं चक्राकारमनेक

मुक्तामालात्मकरश्मियुक्तं कालचक्रं विधिं चेंगं धाल्वकारादिभिः संपूज्य दद्या
त्॥ गोत्राय० पूजितायेन्दूदं कालचक्रं मुक्तादामयुतं सुपूजितं महापमृत्युनि
वारणकामस्त्वमहं संप्रददे नममेति॥ मंत्रस्तु॥ इमं मेरा जतं चक्रं इंदु
रश्मिसमाकुलं॥ अपमृत्युविनाशाय दत्तमायो विद्धय इति॥ ततः सुं०दे
वाकालोऽस्त्वत्वा अग्निं प्रतिष्ठाप्य॥ ओंकालचक्राय नमः स्वाहेत्यनेन मंत्रेणा
ष्टोत्तरशतघृताक्ततिलैर्हुत्वा पायसादिना द्वादश ब्राह्मणान्भोजयित्वा स्वयं
अक्षारलवणसकृद्भुंजीतेति॥ इति कालचक्रदानं॥ ॥ अथ परमापमृत्यु
हरं यममूर्तिदानं॥ मृत्युंजये॥ ॥ लोहपात्रे स्थितं कांस्यपत्रपदं तु राजतं॥
तस्मिन्कालेश्वरः स्वर्णः पुरुषाकारतां गतः॥ तद्रूपं तु॥ ईषत्पीतो दंडह

स्तो रक्तदृक्पाशहस्तकः॥ कृष्णो वस्त्रालंकृतस्या द्रोगिणामभयप्रदः॥ अलंकृत
ः स्वर्णालंकारैः त्रिलोहारैर्हृतैर्वृतः॥ त्रिलोहं कांस्यताम्रपित्तलाख्यं पुरुषाका
रैर्हृतैः दंडहस्तैः कृत्वा महिषपृष्ठे अष्टम्यां चतुर्दश्यां वा दद्यात्॥ दक्षिणा तु घृ
तपूर्णो घटः॥ सुवर्णं वा॥ एवं कृत्वा दानेनायमृत्युनाशान्मुच्यते॥ नाशोपमृ
त्युः॥ इत्यपमृत्युहरं यममूर्तिदानं॥ ॥ अथ कालपुरुषदानं॥ ॥ तत्र विष्णु॥
देषं निष्कशतं पार्थ दानेषु विधिरुत्तमः॥ मध्यमस्तु तदर्धेन तदर्धेनाधमः स्मृ
त इति॥ इत्यशक्तौ पंचसौवर्णिकेन वा॥ ततोऽन्येन तु प्रतिगृहीता दुःखशोका
वहः स्यात्॥ चतुर्थ्यां चतुर्दश्यां त्र छायां करणे वा कुर्यात्॥ कालपुरुषस्वरूपमा
ह॥ रौप्यदशनं रक्तवर्णनेत्रं खड्गोत्तकमांसपिंडयुतवामकरं जपाकुसुमकुंड

व्वरक्तस्रग्विणं शंखमालाधरं छूरिकायुतकटिदेशं अतिदीर्घहस्तं जिनयुतं नि॥
र्माय॥ ॥अद्येत्यादि०॥ ॥अपमृत्युव्याधिसर्वबाधानिवारणाय अहं तैश्वर्यप्राप्ति
धर्मस्त्रीपुत्रपौत्रादिकलत्रराज्यांतेपरमपदावाप्तिकामोवाकालपुरुषदानमहं
करिष्ये०॥ कालपुरुषं संपूज्यविभूष्य द्विजं कृत्वा यथाविभवं वस्त्रालंकारादि
भिः संपूज्य पुष्पांजलिं गृहीत्वा पठेत्॥ सर्वकालवरो यस्मात्कलत्वं कले नचोच्य
ते॥ ब्रह्मविष्णुशिवादीनां त्वमसाध्योसि सुव्रत॥ पूजितस्त्वं यथा शक्त्या मामाधि
तेश्वयथासुखं॥ यदुच्यते तव विभो तत्कुरुष्व नमोस्तु ते इति संप्रार्थ्य॥ ॥अद्ये
त्यादि०॥ ॥अपमृत्युव्याधि इत्यादि॥ राज्यपरमपदावाप्तिकामोतं संकल्पो
क्तवत्फलं संकीर्त्य गोत्रायशर्मणे० सुपूजिताय इमं कालपुरुषं साक्षं कृतं

उक्तोपस्करं विष्णुदैवतं तुभ्यमहं संप्रददे न मम इति दत्वा पूर्वोक्तसंख्याकासो॥
वर्णदक्षिणात्वेन दत्वा तं विसृज्य तन्मुखं नेक्षेत स्पृशेत्॥ ततः शांता पृथिवी॥
शिवमंतरिक्षमिति जपित्वा॥ हस्तौ पादौ प्रक्षाल्याचम्य नृपसीद क्षीणां दत्वा
विप्रान्संतोष्य सुहृद्युक्तोनुजीतेति॥ अनेन विधिना यस्तु दानमेतत्प्रयच्छ॥
ति॥ नापमृत्युभयं तस्य नाचव्याधिभयं कृतं॥ नवत्यमाह ते भयं सर्वबाधा
विवर्जितेति॥ हेमाद्रिः॥ इति कालपुरुषदानं॥ अथ सर्वसंपत्करदानं॥ ॥
बृहन्नारदपुराणे॥ सूर्योपरागादिपुण्यकाले देवालयादिपुण्यदेशे गृहे वाका॥
र्ये॥ प्रतितस्ति व्वकुशमिश्रोदकेन स्नात्वा कृतनित्यक्रियाचम्य प्राणानायम्य
०अद्येत्यादि० सर्वसंपदायुरारोग्यसमस्तपापनाशपुत्रपौत्रादिकुलवृद्धि॥

दा॰चं॰ स्वर्गनिवासमोक्षेष्टसिद्धिकामोमित्रादिप्रतिमादानमहंकरिष्ये॥ गुरुंवृत्वाय
८५ यावित्तंवस्त्रालंकारादिभिः पूजयेत्॥ ततोविंशद्धस्तांचतुरस्रांभुवंगोमये॥
मयेनोपलिप्यतत्रप्रागायताश्चतस्रउदगायताश्चतस्रोलेखालिखित्वाते
षुनवकोष्ठेषुद्रोणमितंतंडुलांन्निक्षिप्यतेषुनवकुंभान्संस्थाप्यवस्त्रैरावेष्ट्य
तेषुस्ववर्णतयाहूर्ध्वपलावधिस्ववर्णनिर्मितानवप्रतिमाःसंस्थाप्यपूजये
त्॥ तत्रपश्चिमपंक्तावुदक्संस्थाः॥ मित्रं॰ वरुणं॰ सोमं॰ मध्यपंक्तौब्रह्मा
णंचतुर्भुजं॰ विष्णुमुमापतिंचांत्यपंक्तौ॥ दिवाकरं॰ वृत्रहणं॰ वह्निंच॥ त
तोऽष्टौविप्रान्संपूज्यैकस्मै॥ अद्येत्यादि॰ संपदादि॰ कामोऽनंतसंकाश्योरूप ८५
वन्मुक्तिवर्गत्रायणामणे॰ स्वपूजिताय॰ इमांमित्रप्रतिमांस्वपूजितांतु

भ्यमहंसंप्रददेनममेतिदत्त्वाततोवरुणप्रतिमांगुरवेदत्त्वादेयद्रव्यसमसुवर्णां॥
दक्षिणांवस्त्रयुगंचदद्यात्॥ ततः सोमब्रह्मविष्णुशिवदिवाकरवृत्रहणवह्निप्र
तिमाश्चब्राह्मणेभ्योदत्त्वासुवर्णादक्षिणांचतेभ्योदत्त्वान्येभ्योभूयसींदत्त्वाब्राह्म
णांश्चभोजयित्वासुहृद्युक्तोभुंजीतेति॥ इतिसर्वसंपत्करदानं॥ ॥ अथकृष्णा
जिनदानं॥ सौरपुराणे॥ कृष्णाजिनंचमहिषींमेषींचदद्याद्धेनवः॥ ब्रह्मलो
कप्रदायीस्यात्तुलापुरुषएवचेति॥ मात्स्ये॥ वैशाखीपूर्णमासीचग्रहणंशं
शिसूर्ययोः॥ पौर्णमासीतुयामाघेआषाढीकार्तिकीतथा॥ उत्तरायणंद्वाद॥
शीवातस्यांदत्तंमहाफलमिति॥ अथास्यदानप्रयोगः॥ ॥ पूर्वोक्तकालेगो
मयेनोपलिप्यदेशेआविकंकंबलंतदुपरिसखुरंग्रीवंकृष्णाजिनमास्ती

दा०चं०
९६

र्यस्वर्णशृंगं रौप्यदंतं मौक्तिकपुच्छं स्वर्णनासिकं कृत्वा तदुपर्यात्मप्रमाणां
स्तीलान् संस्थाप्य वाससाच्छाद्य संगंधरत्नानि चत्वारि पात्राणि कांस्यघृतदु
ग्धदधिमधुयुतानि चत्वारि स्वदक्ष प्रागादि दिक्षु दानदेशाद्दहे शृंपकरंगं स्वा
मवर्णं कुंभं च संस्थाप्य ॥ देशकालौ संकीर्त्य० ममस ज्जन्मोपात्त पापनाश
कामात्मपितृपुत्रापमृत्यु परिहारत्वार्थं धनदेश दुवियोगकामः सकलेष्ट
फलावाप्तिब्रह्मलोकावाप्तिकामश्च कृष्णाजिनदानमहं करिष्ये इति संका
ल्प्य ॥ जीर्णपीतवाससास्वागात्संमृज्य ॥ यानिकानि च पापानि मयाल्लो नाल्ल
तानि च ॥ लोहपात्रप्रदानेन प्रदानेन प्रणश्यंतु मया नु वै ॥ इति मंत्रेण सति ९६
लं लोहपात्रं कृष्णाजिनस्य वामपादे निवेदयेत् ॥ यानिकानि च पापानि का

योत्थानि कृतानि च ॥ कांस्यपात्रप्रदानेन तानि नश्यंतु मे सदा ॥ इति मंत्रेण म
धुमयं कांस्यपात्रं कृष्णाजिनं दक्षिणपादे निवेदयेत् ॥ परापवादपैशून्याद्दृथा
मांसस्य भक्षणात् ॥ तदुत्थितं तु मे पापं ताम्रपात्रात्प्रणश्यतु ॥ इति मंत्रेण सति
लं ताम्रपात्रं वामहस्ते ॥ कन्यानृतं गवां चैव परदारप्रधर्षणं ॥ रौप्यपात्रप्रदा
नेन क्षिप्रं नाशं प्रयातु मे ॥ इति मंत्रेण मधुमयं रौप्यपात्रं दक्षिणहस्ते ॥ जन्मज
न्मसहस्रेषु कृतं पापं कुबुद्धिना ॥ स्वर्णपात्रप्रदानात्तं नाशयाशु जनार्दन ॥ इ
ति मंत्रेण साज्यं तत हेमपात्रं मध्ये तथा हेममुक्ताविद्रुमदाडिममातुलिंगादिभिः
संपूज्य ॥ पुनर्देशकालौ संकीर्त्य० अमुकगोत्रोऽमुकशर्माहं ममस ज्जन्मोपा
पादि० ब्रह्मलोकावाप्त्यंतमुक्त्वा० गोत्रायशर्मणे० सुपूजिताय तुभ्यमिदं कृ

ष्णाजिनं यथाशक्ति सोपस्करं वृषभध्वजप्रीतये तुभ्यमहं संप्रददे न ममेति ॥
एतद्दक्षिणा परिमाणं तु गारुडे ॥ सुवर्णनिष्कत्रितं तदर्धं तदर्धं वा नतोन्यू
नत्वेनाधिकफलं ॥ अस्य त्वयसद्द्विजो राजन् चित्ररूपसमो हि सः ॥ दाने चश्रा
द्धकृत्ये च दूरतः परिवर्जयेत् ॥ इति गारुडोक्तं ॥ स्व॰ म॰ महात्म्यं तं विप्रमंडले
स्नानमाचरेत् ॥ पूर्णकुंभेन राजेंद्र शाखायां पकचस्य तु ॥ कृत्वा वाचार्यकल
शमंत्रेणानेन मूर्धनि ॥ आप्यायतां समुद्रस्त्वां रुचो दाप्यास्क षोडश ॥ अहते
वाससी कृत्वा आचांतः शुचितामियात् ॥ तद्दत्त संहितं कुंभेनीत त्रयं चतुष्प
यइति ॥ ततो न्यसीं दक्षिणां दत्वा द्विषो गृह्णीयात् ॥ दानेनानेन सकलारिष्टप
मनाशोन्नमिदानफलं चेति हेमाद्रिः ॥ होमादि विनो षक्तम् अथांतराद वगंतव्यः ५७

इति

॥ ॥ अथ कृष्णाजिनदानं ॥ ॥ अथ शय्यादानं ॥ ॥ महाभारते ॥ यजमानः पुण्य
काले अष्टदले तिलप्रस्थं निक्षिप्य तस्मिन् शय्यामास्तीर्य तस्याः समंतादिग्गादिको
णचतुष्टये क्षीरोत्त गो च पंच कुंभान् क्रमात् ॥ घृत ॥ कुंकुम ॥ गोधूम ॥ जलपूर्ण
कुंभमुष्टीबीघृतपूर्णकलशान् ॥ सप्तधान्यानि च संस्थाप्य ॥ अद्येत्यादि॰ ममसम
स्तपापक्षपूर्वकास्सरोगया सेव्यसुतविमानकरणकेंद्रपुरगमनोत्तर षष्टिसहस्र
वर्षाधिकरणकक्रीडणस्त्री सहस्त्र संघसमावृतसर्गलोकमहिमत्वतदुत्तरं षष्टि
योजनमंडलराज्यभोगानंतरं शिवसायुज्यतावाप्तिकामः शय्यादानमहं करिष्ये
इति संकल्प्य ॥ द्विजं सपत्निकं वृत्वा यथाविभवं वस्त्रालंकारादिभिः संपूज्य शय्या
यां लक्ष्मीनारायणप्रतिमां स्कवर्णमयीं संस्थाप्य संपूज्य सपत्नीक विप्रेण सह ॥

दा०चंद्री० य्यां प्रदक्षिणीकृत्य नमः प्रमाण्यै देव्यै इति चतुर्दिक्षु क्रमेण प्रणम्य तिथ्यादि संकीर्त्य०
१०८ मम सर्वपापक्षयेत्यादि० शिवसायुज्यतावाप्तिकामो गोत्रायशर्मणे० सुपूजिताय०
इमां शय्यां ईशानादिकोणचतुष्टयस्थापनक्रमेण घृतकुंकुमगोधूमजलपूर्ण
कुंभसमेतां हंसतूलिप्रच्छिन्नां शुभगंडोपधानिकां प्रच्छादनपटास्तरणां सप्तधा
न्ययुतां तांबूलायतनादर्शैलालवंगाकर्पूरयुतां सुगंधपरिमलोपस्करचं
दनागरुदीपिकोपानच्छत्रचामरासनयुतां भोजनभाजनजलपात्रपंचवर्ण
वितानां केशप्रसाधिकांजनशलाकापुष्पमाल्यादियुतां श्रीलक्ष्मीनारायणप्रति
मासहितां युक्तोपस्करमंदिरोदैवतां गोत्रायशर्मणे० सुपूजिताय साक्षिकृताय १०८
सक्षिकाय तुभ्यमहं संप्रददे न मम इति शय्योपवेशितविप्रहस्ते साक्षतकुशोदकं

क्षिपेत्॥ मंत्रस्तु॥ यथा न कृष्णशयनं शून्यं तु रमया विना॥ तथा शय्या ममाप्यस्तु अ
शून्या जन्मजन्मनीति॥ ततः सुवर्णमेव दक्षिणां दद्यात्॥ ततो भूयसीं दत्वा ब्राह्मणां
श्च भोजयेदिति॥ ॥इति शय्यादानं॥ ॥अथ शयनदानं॥ ॥तद्विधिः अद्येत्यादि० गोत्र
यशर्मणे० इदं शयनं सुखस्पर्शं श्रीविष्णुप्रीतिकामः तुभ्यमहं संप्रददे न मम इति
॥मंत्रस्तु॥ मृदुः शय्यासनं सुखदं केशवस्य प्रियं सदा॥ दानेनानेन सौभाग्यं सर्व
दास्तु गृहे मम॥ ततः सुवर्णदक्षिणा॥ ॥इति शयनदानं॥ ॥अथ कशिपुदानं॥
॥तद्विधिः॥ अद्येत्यादि० गोत्रायशर्मणे० कशिपुं यावज्जीवं शीतवातोष्णनिवारण
कामस्तुभ्यमहं संप्रददे॥ मंत्रस्तु॥ मृदुरं बीजकार्पासं पूरितं सुखदं नृणां॥ तस्मा
दस्याः प्रदानेन सुखं स्यात्सर्वदा मम इति॥ ॥इति कशिपुदानं॥ ॥अथ वस्त्रदाना

दा०चं०
१५८

नि॥नंदिपुराणे॥वस्त्रंयश्चार्थिनेदद्याच्छुत्तंवापियदृच्छया॥सनवेद्धनवान्श्रीमान्
वृहस्पतिपुरेवसेदिति॥विष्णुधर्मोत्तरे॥वासोहिसर्वदैवत्यंसर्वधायोज्यमुच्यते॥
वस्त्रदानात्सुवेषस्याद्रूपद्रविणसंयुतः॥युक्तोलावण्यसौभाग्योविरोगश्चत
याद्विजः॥दत्वाकार्पासिकंवस्त्रंस्वर्गलोकेमहीयते॥दत्वोर्णजंचतत्रापिफा
कंदुरागुणंत्नवेदिति॥ ॥अद्येत्यादि०गोत्रायशर्मणेइदंश्वेतवस्त्रंसूक्ष्मंशिव
प्रियंदेहालंकारणंबार्हस्पत्यदैवतंतुभ्यमहंसंप्रददेनमम॥मंत्रस्तूक्तः॥सि
तंरूपंसुखस्पर्शईशानादेःप्रियंसदा॥देहालंकारणंयस्माद्दतःशांतिंप्रय
छमे॥ ॥इतिश्वेतवस्त्रदानं॥ ॥अथ॥पीतवस्त्रस्य॥संकल्पादि०॥ममसमस्त १५९
पापक्षयकामः॥मंत्रस्तु॥पीतंवासःसुमंगल्यंदेवानांप्रीतिवर्धनं॥दानेना

नेनमेपापंहरत्वाशुजनार्दन॥ ॥पितवस्त्रदानं॥अथरक्तवस्त्रदानं॥ ॥तत्रवि
ष्ये॥अद्येत्यादित्यप्रीतिकाम०मंत्रस्तु॥रक्तवस्त्रंसदारम्यंआदित्यस्यप्रियंसदा॥
श्रीकरंनृपदंनित्यमतःशांतिंप्रयच्छमे॥इतिरक्तवस्त्रदानं॥अथनिलवस्त्रदानं
॥ ॥तत्रविष्ये॥अद्येत्या०बलायुश्रीवृद्धिकामः०मंत्रस्तु॥मनोहरंनीलवस्त्रंबलरा
मप्रियंसदा॥आयुर्विवर्धनंश्रीदमतःशांतिंप्रयच्छमे॥इतिनीलवस्त्रदानं॥ ॥
अथचित्रवस्त्रदानं॥तत्रविष्ये॥अद्येति०षण्मुखप्रीतिकामः॥मंत्रस्तु॥षण्मु
खस्यप्रियंनित्यंचित्रवस्त्रंमनोहरं॥तस्मादस्यप्रदानेनशांतिरस्तुसदाममेति॥
इतिचित्रवस्त्रदानं॥ ॥अथकृष्णवस्त्रदानं॥ ॥तत्रविष्ये॥अद्येति०सर्वारिष्टनय
पीडापमृत्युपरिहारायमृत्योःप्रीतिकामश्च०मंत्रस्तु॥कृष्णंवासःप्रियंमृत्योःस

वरिष्टविनाशनं॥भयपीडामतिहरमतःशांतिंप्रयछमे॥इतिकृष्णवस्त्रदानं॥ ॥
अथपट्टकूलदानं॥ ॥भविष्ये॥अद्येत्यादि०॥कीर्तिकांतिसर्वदेवप्रीतिकाम०
॥मंत्रस्तु॥पट्टकूलंसदारम्यंपवित्रंकांतिदंनृणां॥कृष्णादीनांप्रीतिकरमतःशां
तिंप्रयछमे॥इतिपट्टकूलदानं॥ ॥भविष्ये॥अथमृतकर्पटदानं॥ ॥अद्येत्या
दि०पितृतृप्तिकामः मंत्रस्तु॥कीटजंत्रसरंपुण्यंमृतकर्पटसंज्ञकं॥पितृणां
प्रीतिदंयस्मादतःशांतिंप्रयछमे॥ ॥इतिमृतकर्पटदानं॥अथोर्णावस्त्रदा
नं॥भविष्ये॥अद्येत्यादि०सर्वदेवप्रीतिकामः०मंत्रस्तु॥ऊर्णावस्त्रंचारुचित्रं
देवानांप्रीतिवर्धनं॥सुखस्पर्शकरंतस्मादतःशांतिंप्रयछमे॥सकलातथि १००
रसमादीनामप्ययमेवमंत्रः॥ ॥इत्यूर्णावस्त्रदानं॥ ॥अथकंबलदानं॥ ॥

स्कांदे॥कंबलःपट्टगर्त्तश्चमहाशीतविनाशनः॥सएवविपरीतश्चेन्मंत्रवृष्टिवि
नाशकः॥अद्येत्यादि०श्रीविष्णुप्रीतिकामः मंत्रस्तु॥शीतवर्षाहरःपुण्योद
ढोबलविवर्धनः॥कंबलस्यप्रदानेनशांतिरस्तुसदाममेति॥ ॥इतिकंबलदा
नं॥ ॥अथचित्रकंबलदानं॥ ॥भविष्ये॥अद्येत्यादि०लक्ष्मीनारायणप्रीति
कामः०तुभ्यमहंसंप्रददे॥मंत्रस्तु॥ऊर्णापट्टश्चाविकादिसर्वदेवप्रियःशुचिः॥
चित्रकंबलदानेनममसंतुमनोरथाः॥ ॥इतिचित्रकंबलदानं॥ ॥अथता
म्रपात्रदानं॥ ॥वाराहपुराणे॥ ॥अथातःसंप्रवक्ष्यामिपात्रदानमनुत्तमं॥कृ
त्वाताम्रमयंपात्रंयथाविभवविस्तरं॥तस्योचेहैमींलक्ष्मीनारायणप्रतिमांतुमा
महेश्वरप्रतिमांचसंपूज्यद्विजमपिपूजयित्वा॥परापवादपैशुन्यादनृतस्य

दा०चंडी.
१०१

चनहननादिसमुत्थं न पापं दानेन ताम्रपात्रं विनश्यतु॥ शारीरोत्थसकलपापा
नाशकामो गोत्रायशर्मणे० कृपूजिताय० इदं ताम्रपात्रं मामहेश्वरप्रति
मा लक्ष्मीनारायणप्रतिमासहितं तुभ्यमहं संप्रददे न मम मेति॥ मंत्रस्तु॥
परापवाद पैशून्याद भक्षस्य च भक्षणात्॥ पापं गोत्रोत्थितं ताम्रपात्रदाना
त्प्रणश्यत्विति॥ एवं संकल्प्य प्रतिमादि सर्वपात्रेषु बोध्यं॥ इति ताम्रपात्र
दानं॥ अथ प्रसंगात् ताम्रपात्रदानमपि॥ ॥तत्र विष्णौ॥ अद्येत्यादि० आयुरारो
ग्यबलवृद्धिश्च सूर्यप्रीतिकामः० मंत्रस्तु॥ सूर्यप्रीतिकरं ताम्रमारोग्यबल
वर्धनं॥ तस्मादस्य प्रदानेन शांतिरस्तु सदा मम मेति॥ इति ताम्रपात्रदानं॥ १०१
॥ ॥अथ कांस्यपात्रदानं॥ ॥वाराहे॥ अद्येत्यादि० कामाकामकृतपाप

नाशकामः॥ मंत्रस्तु॥ यानि पापान्यनेकानि कामाकामकृतानि च॥ कांस्यपात्र
प्रदानेन तानि नश्यंतु मे सदा॥ ॥इति कांस्यपात्रदानं॥ ॥अथ प्रसंगात् कांस्य
दानमपि तत्र विष्णौ॥ ॥अद्येत्यादि० ब्रह्मविष्णुशिवप्रीतिकामः॥ मंत्रस्तु॥ कां
सि ब्रह्मा शिवौ साक्षात् कांस्यमेतद्धि तावसुः॥ कांस्यं विष्णुमयं यस्मादतः शांतिं
प्रयच्छ मे॥ ॥इति कांस्यदानं॥ ॥अथ लोहपात्रदानं॥ ॥तत्र विष्णौ॥ अद्येत्यादि
० ब्रह्मज्ञाताज्ञातकृतपापक्षयकामः॥ मंत्रस्तु॥ ज्ञानाज्ञानकृतं पापं म
या लोके त्वकृतं चिरात्॥ लोहपात्रप्रदानेन मम पीडां व्यपोहत्विति॥ ॥इति लो
हपात्रदानं॥ ॥अथ रौप्यपात्रदानं॥ ॥विष्णुधर्मे॥ अद्येत्यादि० कन्यादूषण
परदाराभिमर्शनादिपापक्षयकामः० मंत्रस्तु॥ कन्यादूषणतः पापं परदाराभि

त्रिमर्द्दनं॥ रौप्यपात्रप्रदानेन तानि नश्यंतु ते सदेति॥ ॥इति रौप्यपात्रदानं॥
॥ ॥अथ सुवर्णपात्रदानं॥ ॥वाराहे॥ अद्येत्यादि० जन्मांतरसहस्रोत्थदु
ष्कृतनाशकामः॥ मंत्रः॥ जन्मांतरसहस्रेषु यत्कृतं दुष्कृतं मया॥ तत्सर्वं नाश
मायातु स्वर्णपात्रप्रदानतः॥ इति स्वर्णपात्रदानं॥ अथ स्थालीदानं॥ ॥कृ
त्वा ताम्रमयीं स्थालीं पलानां पंचभिः शतैः॥ अशक्तः कृतदर्धेन चतुर्थांशे
न वा पुनः॥ अल्पशक्तो मृन्मयीं॥ पायसेन घृतं पूर्णां शर्कराजलपात्रयुतां च स
वस्त्रां मंडले संस्थाप्य गंधमाल्यादिनालंकृत्य॥ आदित्येऽह्नि संक्रांतौ चतुर्दश्या
मष्टमीषु च॥ एकादश्यां तृतीयायां विप्राय प्रीतिदापयेत्॥ ॥अद्येत्यादि० १०२
यावज्जीवसकुटुंबस्य यथेष्टमन्नतत्पानीयादिलाभकामः इमां स्थालीपाय

सपूर्णां घृतशर्कराशाकजलपात्रवस्त्रयुतां मंडलस्थां सालंकृतां गोत्रायशर्मणे तु
भ्यमहं संप्रददे न ममेति मंत्रश्च॥ इयं पायसपूर्णा तु स्थाली घृतजलायुता॥ दानात्ते
पत्रिपात्रेस्या मतः पाहि महेश्वरेति॥ सुवर्णदक्षिणा॥ ॥इति स्थालीदानं॥ ॥अथ
वेदपुराणदानानि॥ वायवीये॥ अष्टादशपुराणानि सहिरण्यानि पर्वणि॥ लिखि
त्वा यः प्रयच्छेत्तु स विद्यापारगो भवेत्॥ रामायणं भारतं च दत्वा स्वर्गे महीयते॥ धर्मशा
स्त्रं नरो दत्वा स्वर्गलोके महीयते॥ भविष्ये॥ धेनुदानसहस्रेण सम्यक्दत्तेन यत्फलं
॥तत्फलं समवाप्नोति पुस्तकैकप्रदानतः॥ इति॥ संगाश्चतुर्दश॥ विद्योक्ता मदन
रत्ने नंदीपुराणे॥ विद्याश्चतुर्दश प्रोक्ताः क्रमेण च यथास्थिताः॥ षडंगाश्चतुरो वेद
धर्मशास्त्रं पुरातनं॥ मिमांसा तर्कशास्त्रं च एता विद्याश्चतुर्दश॥ आसां नवांत॥

दा०चं०का रोत्पन्नाः परा विद्याः सहस्रशः ॥ इति ॥ पुरातनं पुराणं ॥ तत्रैव कालमाह ॥ चंद्र
१०३ सूर्योपरागे वा संक्रांत्ययनवासरे ॥ शुभेऽह्नि शुभनक्षत्रे कृत्वा मंडपमुत्तमं ॥ चतु
रस्रवितानेन च बध्वा पुष्पोपशोभितं ॥ तत्रान्यस्यासनं दिव्यं दिव्यैर्गंधादिवासितं
॥ तत्र संस्थापयेद्ग्रंथं नानागदंतमयं शुभं ॥ संस्थाप्य पुस्तकं तत्र नैगमं भारतादि
कं ॥ नैगमं वेद पुस्तकं ॥ पुण्यं पवित्रं संपूज्य वस्त्रालंकारभूषणैः ॥ पूजयेच्च
दिशां पालांल्लोकपालांन्यथाक्रमं ॥ कन्यास्त्रियश्च संपूज्या मातरः कल्याणव
ताः ॥ शास्त्रसद्भावविदुषे दद्यात्पुस्तकमुत्तममिति ॥ ॥ अथास्य दानप्रयोग
ः ॥ ॥ यजमानः कृतनित्यक्रियः शुचिः पुण्यकाले देशकालौ संकीर्त्य गोसह १०३
स्रदानसमफलावाप्तिस्वर्गलोकमहिमत्वसकलचतुर्दशविद्यावेदवेदांग

पारगत्वसिध्यिद्वारा श्रीपरमेश्वरप्रीत्यर्थं अमुकपुस्तकदानमहं करिष्ये ॥ ॥ इ
तिसंकल्प्य ॥ ॥ पूर्वोक्तमंडपादि यथाशास्त्रं कल्पयित्वा नागमयं चैव वस्त्रद
यं बध्य पट्टसूत्रवेष्टितं पुस्तकं संस्थाप्य हैमीं सारस्वतप्रतिमां रौप्यमयं सिंहं वि
ष्णुं तत्र वाह्य परितो लोकपालांश्चावाह्य तत्र सुवासिन्यः कुमार्यश्चावाह्य ॥ यागुंगू
र्या सिनीवाली या राका या सरस्वती ॥ इंद्राणीमह्व ऊतये वरुणानीं स्वस्तये ॥ इति मं
त्रेणायह्व ॥ देवीं वाचमजनयंत देवास्तां विश्वरूपाः पशवो वदंति ॥ सा नो मंद्रेष
मूर्जं दुहाना धेनुर्वागस्मानुप सुष्टुतैतु ॥ इति मंत्रेण वा ॥ ॥ आवाहितदेवता
ः षोडशोपचारैः रत्नच्छद्दिं च वृत्वा यथाविभवं वस्त्रालंकारादिभिः पूजयेत् ॥
अद्येत्यादि० गोत्रा यशर्मणो० संकल्पोक्तफलं संकीर्त्य० इदं पुस्तकं प्रतिमायु

तंसमिंहेर्तर्यापट्टवधंदृढसूत्रवेष्टितंनागमयंयंत्रेस्थितंयथाशक्तिसोपस्करयु
तंसारस्वतदैवतंतुभ्यमहंसंप्रददेनममेति॥ मंत्रस्तु॥ सर्वविद्याश्रयंज्ञानका
रणंलक्षिताक्षरं॥ पुस्तकस्यप्रदानेनप्रीणातुममभारती॥ सारस्वतीजगन्मा
ताब्दब्रह्माधिदैवतं॥ अस्याःप्रदानाद्वागीशाप्रसन्नाजन्मजन्मनि॥ ततःसु
वर्णंदक्षिणांदद्यात्॥ ॥इतिपुस्तकदानं॥ ॥अथरत्नदानं॥ ॥तद्विधे॥ ॥
माणिक्यंपद्मरागंचवैडूर्यंवज्रमेवच॥ मरकतंचगोमेदंपुष्परागंचमौक्ति
कं॥ हरितंचनवैतानिरत्नान्युक्तानिसूरिभिरिति॥ रत्नादानेनाधरिर्लक्ष्मीस्वपदं
चप्रयच्छतीति॥ ॥अद्येत्यादि॰श्रीलक्ष्मीनारायणपदावाप्तिकामः॥ मंत्रस्तु १०६
॥यस्माद्रत्नेषुसर्वेषुसर्वेदेवाव्यवस्थिताः॥ तस्माद्रत्नप्रदानेनवांछितंफलं

मस्तुमे॥ इतिनवरत्नदानानि॥ ॥मौक्तिकदानमंत्रस्तु॥ मौक्तिकंभूषणंविष्णोः
प्रियेगौर्याःश्रियस्च॥ दानेनास्यसुखंचास्तुऐहिकामुष्मिकंममेति॥ प्रवाल
दानमंत्रस्तु॥ प्रवालंतुष्टिदंश्रीदंकांतिदंशुभदंतथा॥ दानेनास्यमहीसौख्यंसंत
तिरस्तुसदाममेति॥ कर्णभूषणदानं॥ ॥मंत्रस्तु॥ भूषणंकर्णयोःस्त्रीणांस्वर्ण
रत्नादिसंयुतं॥ ताटकस्यप्रदानेनसौभाग्यंवर्धतांममेति॥ मांगल्यमणिदानं॥
मंत्रस्तु॥ मांगल्यमणयोलक्ष्याःगौर्याःप्रीतिकराःसदा॥ तस्मादेषांप्रदानेन
शांतिरस्तुसदाममेति॥ कुंकुमदानमंत्रस्तु॥ कुंकुमंशोभनंरम्यंसर्वदामंग
लप्रदं॥ दानेनास्यमहत्सौख्यंसौभाग्यंस्यात्सदाममेति॥ इतिकुंकुमदानं॥ ॥
अथहरिद्रादानमंत्रस्तु॥ गौर्याःप्रीतिकरंनित्यंहरिद्रासर्वकामदा॥ तस्मा

दा०चं०डी० तस्याः प्रदानेन सौभाग्यं जन्मजन्मनि ॥ इति ॥ सिंदूरदानेमंत्रस्तु ॥ सिंदूरं शो-
१०५ भितं रम्यं गणेशस्य प्रियं परं ॥ दानेनास्य पुरा लक्ष्मीः स्थिरा मे चास्तु संततिरिति
॥ कस्तूरिदानमंत्रस्तु ॥ कस्तूरी नागपद्मिन्याः देवमर्त्यजनप्रिया ॥ दानेना-
स्याः सुखं नो गाः शांतिरस्तु सदा ममेति ॥ कर्पूरदानमंत्रस्तु ॥ कर्पूरं शीतलं
चारु देवर्षिगुरुसेवितं ॥ तस्मादस्य प्रदानेन लक्ष्मीप्रीतिकारा ममेति ॥ कर्पू-
रं रुचिरं विप्र गृहाणेमं सुपूरितं ॥ पुण्पगंध स्थिता सा मे कमला प्रीयतामिति
॥ नानास्तु गंधद्रव्यदाने मंत्रः ॥ गंधो मनोहरो दिव्यः शांतिदः सुखदस्तथा
॥ तस्मादस्य प्रदानेन सुगंधः स्यात्सदा ममेति ॥ ॥ इति भविष्यपुराणोक्त- १०५
नानाद्रव्यदानमंत्रः ॥ ॥ अथ देवेगलंतिकादानं ॥ ॥ भविष्यपुराणे ॥ ॥ व-

संतसमये ज्ञात्वा गत्वा देवालयं शुभं ॥ शिवस्य विष्णोरर्कस्य इष्टदेवस्य वा पुनः ॥
स्रवंतं कारयेत्कुंभं छिद्रं देवमस्तके ॥ दिवारात्रौ स्रवेद्देवे जलं मासचतुष्टयं
॥ स्रवंत् बिंदुसंख्याका हि स्वर्गलोके महीयते ॥ इति अत्र प्रयोगः स्तु वसंते शुभदिने
स्थिरलग्ने हि कृतनित्यक्रियः ॥ आचम्य प्राणानायाम्य० अद्येत्यादि० देव शिर-
सि स्रवज्जलबिंदुसमसंख्यकाब्द शिवपुरादिनिवासकामो मासचतुष्टयं दिवा
रात्रौ च देवेगलंतिकादानमहं करिष्ये इति संकल्प्य ॥ प्रासादं सम्यक् प्रक्षाल्य
देवं पंचामृताद्युपचारैरभ्यर्च्य देवे गलंतिकां बध्नीयात् ॥ मंत्रस्तु स्कांदे ॥ ॐ न-
मः शंकर शंभो त्वं शिवो वापि शिवो हरः ॥ प्रीयतां मे महारुद्रो जलसेकप्रदान-
त इति ॥ एवं मासचतुष्टयं देवेगलंतिकादानं कृत्वा अंते पंचामृतादिपू-

जनंकृत्वायथाशक्तिब्राह्मणान्भोजयित्वादेवेभ्योदक्षिणांदद्यादिति॥त्रया
हा०चं० णामपिलोकानांसुदकंजीवनंस्मृतं॥पवित्रममृतंयस्मात्तद्देयंपुण्यमिच्छ
१०६ तेति॥ ॥इतिस्कांदेशकटेवेगलंतिकादानं॥ ॥अथप्रपादानं॥ ॥भविष्ये॥
अतीतेफाल्गुनेमासिप्राप्तेचैत्रमहोत्सवे॥पुण्येह्निविप्रकथितेमंडपंका
रयेत्ततः इति॥पुरमध्येचतुष्पथेजलरहितेमार्गेवृक्षमूलेप्रपामंडपंकार
यित्वातन्मध्येसुगंधकान्जलकुंभान्संस्थाप्य॥प्रपापालकंबहुपुत्रंसं
स्थाप्यप्रार्थयेत्॥प्रपेयंसर्वसामान्याभूतेभ्यःप्रतिपादिता॥अस्याःप्रदा
नात्सकलाममसंतुमनोरथाइति॥ततोनिवारितंतोयंदेयंमासिचतु १०६
ष्टयं॥त्रिपक्षंवामहाराजजलविनाज्जीवनंपरं॥प्रत्यहंकारयेत्तस्मोभोज

येच्छक्तितोद्विजान्॥अनेनविधिनायस्तुग्रीष्मोतापप्रणाशनं॥पानीयमुत्तमंदद्या
त्तस्यपुण्यफलंशृणु॥कपिलाशततदानस्यसम्यक्दत्तस्ययत्फलं॥तत्फलंसम
वाप्नोतिसर्वेर्देवैःसुपूजिताइति॥ ॥इतिप्रपादानं॥ ॥अथहेमंतिकेग्निदानं॥
॥इतिभविष्ये॥अग्निंहेमंतशिशिरेरुतौतीर्थेसुरालये॥मठेदेवालयेचैवअग्नि
प्रज्वाल्यतेतुयः॥षष्टिवर्षसहस्राणिस्वर्गलोकेमहीयते॥इतितथाचज्वालये
द्वन्हिसेवनार्थंद्विजन्मनां॥दातव्योदीपकोरवंडोदेवमुद्दिश्यमाधवा॥इतिमाधवो
क्तेश्च॥ ॥इतिहेमंतशिशिरुताविग्निदानं॥ ॥अथदीपदानं॥संवर्तः॥देवागा
रेद्विजागारेदीपंदद्याच्चतुष्पथे॥मेधाविज्ञानसंपन्नश्चक्षुष्मांश्चसदाभवेत्तपो
त्तरायणेदीपदानं॥अतिप्रमाणं॥मंत्रस्तु॥दीपोज्ञानप्रदोनित्यंदेवतानांप्रि

यः सदा॥ दानेनास्य नवेत्सौख्यं त्रांतिर्मे वांछितं फलं॥ सुत्यो तिस्तेलयात्रं
चदीपं वाकुसमन्वितं॥ सुखस्यादस्य दानेन त्रांतिरस्क सदाममेति॥ इति
दीपदानं॥ ॥अथ पांथपरिचर्या॥ ॥नवीष्ये॥ ॥पांथं परिचरेद्यस्तु ग्राय
नासनन्नोजनैः॥ सस्वल्पेन प्रयासेन तु यतिक्रतुयाजिनं इति॥ तथा॥ अ
प्रणोद्ये तिथिः सायंमपिवान्नूतणोदकैरिति॥ याज्ञवल्क्यः॥ प्रचेता अपि
॥ यः सायं चैश्वदेवांते सायं वा गृहमागतः॥ देववत्पूजनीयोसौ सूर्योढुः सो ति
थिः स्मृता इति॥ तथा॥ दिवातिथौ तु विमुखे गते यत्पातकं नृणां॥ तदेवाष्ट
गुणं पुंसां सूर्योढो विमुखे गते॥ तस्मात्सदा कंपाराजेंद्र सूर्योढुमतिथिं नरः॥
पूजयेत्पूजिते तस्मिन्पूजिताः सर्वदेवता इति॥ ॥इति पांथपरिचर्या॥ ॥अ

थगोपरिचर्या॥ विष्णुः॥ गवां कंडुयनं चैव सर्वकल्मषनाशनं॥ गवां ग्रासप्र
दानेन स्वर्गलोके महीयते॥ इति ग्रासदानं मंत्रस्तु पराशरे॥ सुरभिस्त्वं जगन्मा
ता दैवि विष्णुपदे स्थिता॥ सर्वदेवमये ग्रासं मया दत्तमिमं ग्रस॥ प्रार्थनामंत्रस्तु॥
ततः सर्वमये देवि सर्वदेवैरलंकृते॥ मातर्ममाभिलषितं सफलं कुरु नंदिनीति
प्रार्थयेत्॥ ॥इति गोपरिचर्या॥ ॥अथ धर्मघटदानं॥ ॥विष्णुः॥ शीतलेन सुगं
धेन वारिणा पूरितं घटं॥ शुक्लचंदनलिप्तांगं पुष्पदामोपशोभितं॥ दध्योदनमतं
कुर्याच्छारावं तस्य चोपरि॥ तपनछत्रसंयुक्तं धर्माख्यं कस्यचे हृतं॥ पुष्पाद्दातं गृ
हीत्वा तु इति मंत्रमुदीरयेत्॥ नमोस्तु विष्णुरूपाय नमः सागरसंभव॥ अपांपू
र्णोधरास्मात्त्वं दुःखसंसारसागरादिति॥ प्रार्थनामंत्रस्तु॥ उदकुंभो मया

 दत्तो ग्रीष्मकाले दिने दिने ॥ शीतोदकप्रदानेन प्रीयतां मधुसूदन ॥ इति भविष्ये ॥ प्रस
दृधर्मघटको वस्त्रसंवेष्टितो नवः ॥ ब्राह्मणस्य गृहे देयः शीतामलजलः शुचिः ॥
 वसंतग्रीष्मयोर्मध्ये पानीयं यः प्रयच्छति ॥ पाले पले सुवर्णस्य फलमाप्नोति मा
नवः ॥ मार्गशीर्षात्समारभ्य दकुंभं तु यः क्षिपेत् ॥ दिने दिने सहस्रस्य गवां दान
फलं लभेत् ॥ उद्यापनं तु ॥ मार्गशीर्षमासे कार्यं ॥ भविष्ये ॥ मंडकावेष्टका ॥ त
स्यपक्वान्नैः सर्वकामिकैः ॥ उद्दिश्य शंकरं विष्णुं ब्रह्माणमथवा पितॄन् ॥ ततः
सतिलं धौतवस्त्रमनेन मंत्रेण दद्यात् ॥ एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः
॥ अस्य प्रदानात्सकला मम संतु मनोरथा इति ॥ अनेन विधिना यस्तु धर्मकुंभं
प्रयच्छति ॥ वसंतग्रीष्मसमहत्सौख्यं तृप्तिरस्तु सदा ममेति ॥ ये गोप्रदानफलं

लभेत् ॥ इति धर्मघटदानं ॥ करकादानमंत्रस्तु ॥ ॥ कलशं [illegible] जलेन
परिपूरितं ॥ दानेनास्य महत्सौख्यं तृप्तिरस्तु सदा ममेति ॥ अथ जलपात्रदान
मंत्रोपि ॥ वारिणा पूरितं पात्रं तापत्रयहरं शुभं ॥ देवर्षिपितृतुष्ट्यर्थं गृहाणमु
सत्तमेति ॥ अथ यज्ञोपवीतदानं ॥ बौधायनः ॥ यज्ञोपवीतदानेन जायते ब्रह्म
वर्चसी ॥ तस्मात्तानि प्रदेयानि ब्राह्मणेभ्यो विपश्चिते ॥ ॥ इत्युपवीतदानं ॥ अथमा
सदानानि ॥ हेमाद्रौ ॥ माघे तिलदानात्पापनाशः ॥ यमलोकजयकाम्य ॥ फा
ल्गुने प्रियंगुदानाद्धस्तीवान्भवेति ॥ चैत्रे चित्रवस्त्रदानात्सौख्यवान्भवति ॥ वैशा
खे अपूपदानात्स्वर्गप्राप्तिः ॥ ज्येष्ठे छत्रदानात्सर्वान्कामानवाप्नोति ॥ आषाढे चं
दनकर्पूरदानात्फलातिशयः ॥ श्रावणे वस्त्रदानान्महाफलं ॥ भाद्रे फणि

दा०चं०का०

१०७

तद्दानात्फलातिशयः ॥ आश्विने घृतदानेन रूपवान् ॥ कार्तिके दीपान्नदानाश्वा
नर्गलफलं ॥ मार्गशीर्षे लवणदानाद्रूपवान् ॥ पौषे स्वर्णदानात्पुष्टिमान् ॥ स
र्वमासशुक्लपक्षेषु पुष्पदानान्महालक्ष्मीमवाप्नुयात् ॥ कृष्णपक्षेषु फलदाना
त्फलातिशयः ॥ ॥ इति मासपक्षदानानि ॥ ॥ अन्यत्र ॥ अथाधिमासे दानं ॥
॥ हेमाद्रौ पाद्मे ॥ ॥ अधिमासे तु संप्राप्ते गुडसर्पिर्युतानि च ॥ चंद्रवह्नितुल्या
न्सम्यक्व्रीहिपिष्टकृतानि च ॥ साज्यानि दधिसिक्तानि अधिमासे नरोत्तम ॥
त्रयस्त्रिंशदपूपानि दातव्यानि दिने दिने ॥ व्यतीपातदिने यद्वा द्वादश्यामथवा
नृप ॥ पौर्णमास्याममायां वा नवम्यां वा नरोत्तम ॥ अष्टम्यामथ पंचम्यां कु १०७
र्याद्वित्तमनुत्तमं ॥ अधिमासे तु संप्राप्ते त्रयस्त्रिंशत्तु देवताः ॥ उद्दिश्यापूप

दानेन पृथ्वीदानफलं लभेत् ॥ इति ॥ देवतानामानि तु भविष्ये ॥ विष्णुं जिष्णुं म
हाविष्णुं हरिं कृष्णमधोक्षजं ॥ केशवं माधवं राममच्युतं पुरुषोत्तमं ॥ गोविंदं वाम
नं श्रीशं श्रीकंठं विश्वसाक्षिणं ॥ नारायणं मधुरिपुमनिरुद्धं त्रिविक्रमं ॥ वासुदेवं
जगद्योनिमनंतं शेषशायिनं ॥ संकर्षणं प्रद्युम्नं च दैत्यारिं विश्वतोमुखं ॥ जनार्द
नं धरावासं श्रीपतिं चेति नामभिः ॥ त्रयस्त्रिंशदपूपानि कांस्यपात्रे निधाय च ॥
सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् ॥ अद्येत्यादि० मम समस्तपापक्षय
स्त्रीपुत्रपौत्रादीनां चायुरारोग्यधनधान्यादिसंपत्तिवृद्धिपृथ्वीदानसमफलावा
प्तिविष्ण्वादिश्रीपत्यंतत्रयस्त्रिंशद्देवताउद्दिश्य श्रीपुरुषोत्तमभास्करप्रीतिकाम
श्वगोत्राय शर्मणे० सुपूजितायेदं वायनकं त्रयस्त्रिंशदपूपघृतकांस्यपात्रसमु

वर्णघृतमंबूल्वफलदक्षिणादिसोपस्करंश्रीविष्णुरूपायतुभ्यमहंसंप्रददेन
ममेतिवदेत्॥दानमंत्रस्तु॥विष्णुरूपीसहस्रांशुः सर्वपापप्रणाशनः॥
अपूपान्नप्रदानेनममपापंव्यपोहतु॥नारायणजगद्बीजभास्करप्रतिरू
पक॥दानेनानेनपुत्रांश्चसंपदंचाभिवर्धय॥यस्यहस्तेगदाचक्रेगरुडोय
स्यवाहनं॥शंखः करतलेयस्यसमेविष्णुः प्रसीदतु॥कलाकाष्ठादिरूपे
णनिमेषघटिकादिना॥योवंचयतिभूतानितस्मैकालात्मनेनमः॥कुरुक्षेत्र
मयदेवः सूर्यपर्वद्विजोहरिः॥पृथ्वीसममिदंदानंगृहाणपुरुषोत्तम॥मलि
नांचवित्तंधर्मपापप्रणाशनायच॥पुत्रपौत्रादिधर्मप्रदंतंतवभास्क
र॥मंत्रैरेतैश्चयोदद्यात्त्रयस्त्रिंशदपूपकान्॥प्राप्नोतिविपुलांलक्ष्मींपुत्र

पौत्रादिसंपदमिति॥इत्युक्तंमहाभारतेच॥ ॥एतन्मलमासव्रतंतुदान
रूपंसर्वेषांनित्यं॥मलमासेयदासंध्योपासनतर्पणं॥श्राद्धादिनियमंज्ञा
त्वंनिष्फलंतद्भवेदिति॥तद्विषये॥करेपात्रस्यवायोक्तेः॥ ॥इतिविधिमा
सेदानरूपव्रतं॥अथप्रातर्नित्यघृतपात्रछायादानं॥ ॥तद्विषये॥ ॥कां
स्यपात्रस्थिताज्येचआत्मरूपंनिरीक्ष्यतु॥ससुवर्णमुखोदद्यात्सर्वविघ्नो
पशांतये॥ ॥अद्येत्यादि०ममैतच्छरीरावच्छिन्नसमस्तपापक्षयसर्वग्रह
पीडाशांतिद्वारारोग्यादिनानामनोः प्रसादायुष्यारोग्यादिसर्वसौ
ख्यकामोगोत्रायब्राह्मणे०इदंस्वदेहछायावीक्षिताज्यपूरितकांस्यपात्रंस
सुवर्णंविष्णुदैवतंतुभ्यमहंसंप्रददेनममेति॥मंत्रोक्तः॥याजस्त्रीयद्भवे

दोस्मासर्वांगेसमुपस्थितं॥तत्सर्वंनाशयाज्यत्वंश्रियमायुश्चवर्धय॥आज्यंते
जःसमुद्दिष्टमाज्यंपापहरंस्मृतं॥आज्यंसुराणामाहारःसर्वमाज्येप्रतिष्ठि
तं॥अस्यपात्रप्रदानेनशांतिरस्तुसदामम॥इतिर्नित्यछायादानं॥ ॥
अथसंक्रांतिदानानिविश्वामित्रः॥ ॥मेषसंक्रमणेनानोमेषदानंमहा
फलं॥वृषसंक्रमणेदानंगवांप्रोक्तंतथैवच॥वस्त्रान्नपानदानानिमिथु
नेविहितानितु॥घृतधेनुप्रदानंतुकर्कटेचविधिष्यते॥पात्रेदद्यात्सु
वर्णंसिंहेचविहितंतथा॥मेकन्याप्रवेशेचवस्त्राणांवेश्मनादानमेवच॥
कीटोवृश्चिकः॥धनुःप्रवेशेवस्त्राणांयानानांदानमुच्यते॥झयप्रवेशेदारू
णांदानमग्नेस्तथैवच॥झषोमछः॥कुंभप्रवेशेदानंतुगवामंबुतृणस्यच॥

मीनप्रवेशेत्वन्नानांमाल्यानामपिचोत्तमं॥दानान्येतानिमयाद्विजेंद्राःप्रोक्ता
निकालेतुनरःप्रदत्वा॥प्राप्नोतिकामंमनसास्वभीष्टंतस्मात्वदाःसंतिहिकालद
नंमिति॥ ॥अत्रकालसमयः॥ ॥इतिसंक्रांतिदानानि॥अथनानाधान्यदा
नानि॥तत्रमंत्राः॥हेमाद्रौदानखंडे॥देयंतद्योनयेत्पूर्वंततोविप्रंचपूजयेत॥त
तंमंत्रैःप्रदद्याद्धिसर्वदानेष्वयंविधिरिति॥तत्रादौतंदुलमंत्रः॥पावनात्सर्वयज्ञे
षुप्रशस्ताहेमकर्मणि॥तंदुलानांप्रदानेनप्रीयतामग्निदेवताः॥तथा॥व्रीहि
जास्तंदुलाःशुभ्राःपितृदेवद्विजप्रियाः॥तस्मादेषांप्रदानेनसर्वकामाश्चमेसदा
॥व्रीहिदानमंत्रस्तु॥ब्रह्मणानिर्मिताःपूर्वंव्रीहयोयज्ञसाधनं॥अनेनव्रीहि
दानेनममसंतुमनोरथाइति॥यवदानमंत्रस्तु॥धान्यराजाश्चमेगस्येसुर
मा

प्रीतिकरा यवाः॥ तस्मादेषां प्रदानेन ममास्त्विति मतं फलमिति॥ तथा॥ पूर्वमेव
हि यज्ञार्थं ब्रह्मणा निर्मिता यवाः॥ अनेन यवदानेन शांतिरस्तु सदा ममेति॥ ॥
गोधूमदानमंत्रस्तु॥ धान्यचूडामणिर्जंबुद्वीपे गोधूमसंज्ञकः॥ गंधर्वसौख्यतृ
प्तिस्यादतः शांतिं प्रयच्छतु॥ मुद्गदानमंत्रस्तु॥ मुद्गधान्यप्रियं चैव मनुष्याणां॥
तृप्तिदा माषास्ततः शांतिं सदास्तु मे॥ ॥चणकदानमंत्रः॥ पुरा गोवर्द्धनोद्धार
समये कृष्णरक्षिताः॥ चणकाः सर्वपापघ्नास्ततः शांतिं प्रयच्छ मे॥ ॥कुलित्थ
दानमंत्रस्तु॥ अग्निगर्भोद्भवाः सौम्याः बलारोग्ययन्नाः प्रदाः॥ कुलित्थानां प्र
दानेन शांतिरस्तु सदा ममेति॥ ॥अथ तिलदानं॥ ॥तिलाः पापहरा नित्या ११२
विष्णुदेहसमुद्भवाः॥ तस्मात्तेषां प्रदानेन पापं नाशाय मे सदा॥ इति॥ स्वर्ण

तिलदानमंत्रस्तु॥ ॥तिलाः स्वर्णमया देवदुरितक्षयकारकाः॥ विष्णुप्रीतिक
रा नित्यमतः शांतिं प्रयच्छ मे॥ इति॥ सामान्यतः सर्वधान्यदानमंत्रस्तु॥ धान्यं
करोति दातारमिह लोके परत्र च॥ तस्मात्तस्य प्रदानेन मम संतु मनोरथा इति॥
॥ससुवर्णतिलपात्रदानमंत्रस्तु॥ ॥तिलाः पुण्याः पवित्राश्च सर्वपापहराः॥
स्मृताः॥ शुक्लाश्चैव तथा कृष्णा विष्णुगात्रसमुद्भवाः॥ यानि कानि च पापानि ब्र
ह्महत्यासमानि च॥ तिलपात्रप्रदानेन तानि नश्यंतु मे सदा॥ निष्पावदानमं
त्रस्तु॥ निष्पावा निर्मिताः पूर्वं लोकानां हितकाम्यया॥ तस्मादेषां प्रदानेन म
म पापं व्यपोहतु॥ प्रियंगुदानमंत्रस्तु॥ प्रियंगवः प्रिया यस्मादग्नेश्च हव्य
साधनाः॥ तस्मादेषां प्रदानेन पावको वरदस्तु मे॥ श्यामाकदानमंत्रस्तु॥

दा०त० ॥श्यामाकाश्च सदा पुण्या यज्ञसाधनदाः स्मृताः॥ अतस्तेषांस्ते प्रदानेन प्रा
वकोनन्तदः सदेति॥ कोद्रवदानमंत्रस्तु॥ कोद्रवा निर्मिता देवैः प्राणिनां जी
११३ वनाय वै॥ तस्मादेषां प्रदानेन प्रीणातु पुरुषोत्तमः॥ कंबलदानमंत्रस्तु॥
यावनालः प्रियकराः कांतिपुष्टिबलप्रदाः॥ तस्मादेषां प्रदानेन यस्य पू
र्णं गृहं ममेति॥ अथ मसूरदानमंत्रस्तु॥ सात्वकरा मसूरास्तु दुरितक्ष
यकारकाः॥ तस्मात्तेषां प्रदानेन विष्णुप्रीतिकरो ममेति॥ समान्यमंत्रस्तु
सर्वौषध्यः॥ इति हेमाद्रौ नानाधान्यदानमंत्राः॥ अथान्नदानमंत्रा अपि तत्रैव
॥ आदौ पायसदानमंत्रस्तु॥ ॥ पायसं शर्करायुक्तं सघृतं कांस्यभाजनं॥ प्र ११३
दानान्मे फलं चास्तु ऐहिकामुष्मिकं च यत्॥ मंडकदानमंत्रस्तु॥ सूर्यमंड

लसंभूता गोव्यदुग्धयुताः प्रियाः॥ जनार्दनादिदेवानामतः पाहि सनातन॥
ओदनदानमंत्रस्तु॥ अन्नं ब्रह्ममयं साक्षान्नराणां प्राणरक्षणं॥ ओदनस्य प्रदा
नेन मम संतु मनोरथा इति॥ दध्यन्नदानमंत्रस्तु॥ चंद्रमंडलमध्यस्थं चंद्रं
बुदसमप्रभं॥ दध्यन्नस्य प्रदानेन प्रीयतां वामनो ममेति॥ कृसरान्नदान
मं०॥ कृसरान्नं स्वादुवर्यं देवानां प्रीतिवर्धनं॥ घृतव्यंजनसंयुक्तं दत्वा रोगैर्वि
मुच्यत इति॥ नानान्नस्य दानमंत्रस्तु॥ अन्नं केशवस्य प्रियान्यस्यानं तु ब्रह्मा
दितुष्टिदाः॥ पृथग्विधान्नरूपा या यच्छंतु बलमोरसमिति॥ सर्वान्नदानमं
त्रस्तु॥ अन्नमेव यतो लक्ष्मीरन्नमेव जनार्दनः॥ अन्नं ब्रह्माखिलत्राणमा
स्तु मे जन्मजन्मनि॥ इति हेमाद्र्युक्तान्नदानमंत्राः॥ अन्येपि केचन मंत्रा

दान॰चं॰

११८

स्त्रसारावसक्तुदानमंत्रस्तु॥ प्राजापत्या मया प्रोक्ताः सक्तवो यज्ञकर्मणि॥
तस्मादेषां प्रदानेन प्रीयतां मे प्रजापतिरिति॥ अथ शर्करादानं॥ अमृता-
स्य कुक्षौ संजाता ऐक्षवेयास्तु शर्कराः॥ सूर्यप्रीतिकरा नित्यमतः शांति शांतिंप्र-
यच्छ मे॥ तथा॥ शर्करेक्षुरसोद्भूता सदा स्वादुकराः प्रिया॥ दानेनैनास्यात्क्षमे
नित्यं तुष्टास्य बीज देवता इति॥ गुडदानमंत्रस्तु॥ प्रणवः सर्वमंत्राणां ना-
रीणां पार्थिवती यथा॥ तथा रसानां प्रवरः सदैवेक्षुरसो मतः॥ मम तस्मा-
त्परां शांतिं ददस्व गुड सर्वदेति॥ इक्षुदानमंत्रस्तु॥ इक्षुदंडं गुरुतरं रसा-
लं सर्वकामदं॥ तुभ्यं दानेन तेनाशु प्रीयतां परमेश्वर इति॥ मधुदानमं- ११८
त्रस्तु॥ यस्मात्पितॄणां श्राद्धे च प्रीतं मध्यमतोद्भवं॥ तस्मादस्य प्रदानेन

मोक्षः स्याद्दुःखसागरादिति॥ घृतदानमंत्रस्तु॥ कामधेनोः समुद्भूतं देवानां
मुत्तमं हविः॥ आयुर्विवर्द्धनं यौतु राज्ञं पातु सदैव मामिति॥ तैलदानमंत्रस्तु
॥ तैलं पुष्टिकरं नित्यमायुर्दं अघनाशनं॥ अमंगल्यहरं श्रीदमतः शांतिं
प्रयच्छ मे॥ नवनीतदानं॥ कामधेनोः समुद्भूतं विष्णोः प्रीतिकरं परं॥ नव-
नीतप्रदानेन बलं पुष्टिं च मेच्युतेति॥ तथा॥ क्षीरार्णवसमुद्भूतं विष्णोस्तु-
ष्टिकरं सदा॥ नवनीतप्रदानेन वांछितं चास्तु मे सदेति॥ क्षीरदानमंत्रस्तु
॥ अलक्ष्मीहरणं नित्यं नित्यं सौभाग्यवर्धनं॥ क्षीरमंगल्यमायुष्यमतः शां-
तिं प्रयच्छ मे॥ तथा॥ त्रिकृतां जीवनं क्षीरं पितृदेवप्रियं सदा॥ कांतिदं पुष्टि-
दं नित्यमतः शांतिं प्रयच्छ मे॥ दधिदानमंत्रस्तु॥ क्षीरमल्लसमुद्भूतं देववि-

पितृतृप्तिदं॥दधिस्यान्मेमृतंनित्यमतःशांतिंप्रयच्छमे॥तक्रदानमंत्रस्तु॥त
क्रंदधिसमुद्भूतंप्राणिनांतृप्तिदंपरं॥अतस्तस्यप्रदानेनशांतिरस्तुसदाम
मेति॥पुष्पदानमंत्रस्तु॥मनोहाराणिपुष्पाणिसदादेवप्रियाणिच॥अ
तस्तेषांप्रदानेनममसंतुसुराःप्रियाइति॥फलदानमंत्रस्तु॥फलानि
मधुराणीहमुनिदेवप्रियाणिच॥तस्मात्तेषांप्रदानेनसफलामेमनोर
याइति॥तथा॥मनोहराणिरम्याणिनित्यंस्वादुकराणिच॥फलानांसं
प्रदानेनसंततेस्तुफलंममेति॥तांबूलदानमंत्रस्तु॥सोपस्करंचतांबू
लंसर्वदामंगलप्रदं॥प्रियंचैवतुदेवानांसौगंध्यंवदनेस्थिते॥पादुकादा ११५
नमंत्रस्तु॥कंटकोच्छिष्टपाषाणवृश्चिकादिनिवारणे॥पादुकेसंप्रदत्तेमे

द्विजप्रीत्याप्रगृह्यतामिति॥उपानहमंत्रस्तु॥उपानहौप्रदत्तेमेकंटकादिनि
वारणे॥सर्वमार्गेषुसुखदोअतःशांतिंप्रयच्छमे॥छत्रदानमंत्रस्तु॥इहामु
त्रातपत्राणांकुरुतेकेशवप्रभो॥छत्रंत्वत्प्रीतयेदत्तंममास्तुतत्सदाशुभं॥
चामरदानमंत्रस्तु॥शशांककरसंकाशंहिमडिंडीरपांडुरं॥प्रोत्सारयाशु
दुरितंचामरामरहत्त्वेति॥पत्रिकादानमंत्रस्तु॥पत्रिकासर्वजंतूनांत्रास
नंदकरीशुभा॥देवेंद्रप्रीतयेदत्ताअतःशांतिंप्रयच्छमे॥व्यजनदानमंत्रस्तु
॥व्यजनंवायुदैवत्यंग्रीष्मकालेसुखप्रदं॥अस्यप्रदानात्सकलाममसंतु
मनोरथाइति॥दर्पणदानमंत्रस्तु॥दर्प्पवैरस्वभावस्त्रीणांमंगलदायकः॥
शोचसौभाग्यसत्कीर्तिमंगलंज्ञानमस्तुमे॥अथकूष्मांडनैवेद्य॥नविष्णु

दा०चं०

११६

ग्णे॥ब्रह्महत्यादिपापघ्नंकुष्मांडंसुतसौख्यदं॥कार्तिकेरयसंमम्यांदद्यातु
ण्यदिनेप्यपीति॥अद्येत्यादि०ममब्रह्महननादिसमस्तपापक्षयपूर्वकबहु
पौत्रश्रीसौभाग्यादिसकलमनोरथावाप्तिकुष्मांडबीजसमसहस्रसंख्याका
ब्दब्रह्मलोकानवासकामोगोत्रःशर्मायो०सुपूजिताय०इदंकुष्मांडफलंबहु
बीजाढ्यंघृतप्लुतंतिलच्छिद्रंमुक्ताप्रवालरत्नहेमफलंताम्रवस्त्रादियुतंगो
धूमराशिस्थितंवनस्पतिदैवतंतुभ्यमहंसंप्रददेनममेतिद्विजहस्तेजलंदद्यात्
॥सुवर्णदक्षिणादानमंत्रौतुतत्रैव॥ब्रह्महत्यादिपापघ्नयानिर्मितापुरा
॥कूष्मांडकुबीजाढ्यंपुत्रपौत्रादिवृद्धिदं॥मुक्ताप्रवालहेमादियुक्तंदत्तंतवद्वि ११६
ज॥अनंतपुण्यफलदमतःशांतिंप्रयच्छमे॥कुष्मांडदानं॥इति॥अथहे

मदानं॥वायवीये॥निष्कमात्रंपवित्रंवातदर्धंपादमेववा॥तंडुलाढकसंपूर्णे
पात्रेपात्रांतरेन्यसेत्॥आर्द्रढकतिलैःपूर्णंतस्योपरिघृतान्वितं॥तिलार्धमान
तःपात्रंघृतेतत्रहेमविन्यसेत्॥गोमयेनोपलिप्तायांभूमौतत्रितयंन्यसेत्॥विप्रंच
तद्धिरण्यंचद्रानुंस्मृत्वाप्रपूजयेत्॥आत्मछायाहिरण्यंचतिलतंडुलमेवच॥वि
प्रायदद्याद्विप्रायशिवःसंप्रीयतामिति॥आयुरारोग्यसंप्रीतितस्मिन्कालेन्नवि
ष्यति॥इतिहेमदानं॥अथतिलपात्रदानं॥माघमासेतुसंप्राप्तेशुक्लपक्षेद्वि
जोत्तम॥गोमयंमंडलंकृत्वाचतुरस्रंमहामते॥नववस्त्रसमास्तीर्णकृष्णाजिन
समन्वितं॥द्रोणावरंतिलांस्तत्रनिधायवसनोपरि॥मध्यमष्टदलंकृत्वातुतं
तत्कर्णिकोपरि॥निष्कमात्रसुवर्णस्यस्थापयेत्तुततोपरि॥ध्यायेच्चतुर्भुजंदेवं

शा०चं० प्रणतार्तिहरं हरिं ॥ हिरण्यगर्भममृतं श्रीगर्भपरतः परं ॥ शंखचक्रगदापाणिपी
११७ तवाससमच्युतं ॥ श्रीवत्सांकं जगद्बीजं सर्वकारणकारणं ॥ कविं पुराणं विश्वेशं
पुंडरीकनिभेक्षणं ॥ आसीनं कर्णिकामध्ये सर्वशक्तिसमन्वितं ॥ पूज

अथ देशविशेषे मकरसंक्रांतौ सौभाग्यवतीनां दानविशेषो लोके हेमाद्रौ व्यासेन ॥
सौभाग्यद्रव्यदानं च स्त्रीभिः कार्यं प्रयत्नतः ॥ सनर्तकाभिः संक्रांतौ फलादीनां प्र
पेरवौ ॥ दानं षोडशसंख्याकमेकैकस्य फलस्य च ॥ हेमराजतकांस्यानां भाजना ११७
नि यथाभवेत् ॥ वर्धितफलदानमंत्रः ॥ सतिलं गुडसंयुक्तं रसप्रीतिकरं नृणां ॥

वर्धितं संगृहाणेदमतः शांतिं प्रयच्छ मे ॥ सतिलगुडपिष्टग्रासदानमंत्रः ॥ मकरेऽर्के
तु संप्राप्ते ग्रासतिलगुडौ द्विजे ॥ दानेन पुत्रसौभाग्यं धनधान्यसदास्तु मे ॥ भांडदा
नमंत्रः ॥ हिरण्यादीनि पात्राणि भांडानि मृन्मयानि वा ॥ गृहाणेमानि वैषस्मा
द्भास्करः प्रीयतामिति ॥ ॥ गोधूमपिष्टदानमंत्रः ॥ गोधूमजनितं पिष्टं शर्कराघृ
तसंयुतं ॥ द्विजवर्य गृहाण त्वमतः शांतिं प्रयच्छ मे ॥ शूर्पस्थार्द्रतंडुलदानमंत्रः ॥ तं
डुलाः शांतिछिजाः शुक्लाः सार्द्राः शूर्पव्यवस्थिताः ॥ संप्रदानेन वै तेषां शांति
रस्तु सदा मम ॥ ॥ पायसपूरितकांस्यदानमंत्रः ॥ सौभाग्यजाजनं कांस्यपाय
सान्नेन पूरितं ॥ दानेनानेन सौभाग्यं शांतिरस्तु सदा मम ॥ ॥ सफलपुष्पक
दलीस्तंभदानमंत्रः ॥ कदली सर्वदोषघ्ना हेमवर्णा वरीवृता ॥ दानेनास्यां प्रशु

दा०चं०द्वी० त्रपौत्रं सौभाग्यं चास्तु मे सदा॥ ॥सौभाग्यद्रव्ययुतशूर्पदानमंत्रः॥ सैकं चु
कंवस्त्रयुग्मैस्तथा कणवितंसकैः॥ कंठसूत्रादिशूर्पस्थदानात्तातुष्टिवामम
११८ ॥ ॥जानकीप्रीतये शूर्पयंचकदानमंत्रः॥ रामपत्नी महाभागे सौभाग्यद्र
व्यसंयुतं॥ गृहाणेमानि शूर्पाणि सोपस्काराणि जानकी॥ ॥सौभाग्यमा
ग्यमारोग्यं सुतं सौख्यं सदास्तु मे॥ ॥अथ षोडशविप्रेभ्यः सांगषोडशफ
लदानानि॥ ॥तद्विष्णुपुराणे॥ ॥दानं षोडशसंख्याकमेकैकस्य फलस्य
च॥ एवं षोडशविप्रेभ्यो दत्त्वेप्सितमवाप्नुयात्॥ इत्यादि॥ ॥अद्येत्यादि० म
मसमस्तपापक्षयपूर्वकसकलसौभाग्यस्त्रीपुत्रपौत्रेप्सितानंतकालावा ११८
प्तये दीयमानसफलसमसंख्यावर्षसहस्रावच्छिन्नदेवांगनाभिसहभोगे

श्चानेकसुखावाप्तिकामः अमुकनामानामगोत्रेभ्यो ब्राह्मणेभ्यः षोडशसंख्याकेभ्यः
सुपूजितेभ्यः इमानि षोडश षोडशसंख्याकानि अमुकफलान्येकैकस्मै सगोधू
मतांबूलफलदक्षिणायुतानि वनस्पतिदैवतानि दातुमहमुत्सृजे तन्नममेतिद
त्वा प्रणमेदिति दानमंत्रस्तु॥ फलैः षोडशसंयुक्तं स्वर्णधान्यादिसंयुतं॥ द्विज
वर्य गृहाण त्वं मम संतु मनोरथाः॥ ॥षोडशिकाफलदानं॥ अथ व्यतीपाते
स्वर्णदानं॥ हेमाद्रौ॥ शंकुकर्णप्रलंबोष्टं लंबभ्रू दीर्घनासिक॥ अष्टनेत्र
चतुर्वक्त्र विस्तीर्णशायोजन॥ व्यतीपात नमस्तेस्तु सोमसूतप्रजो॥ यत्किंचि
द्दीयते स्वर्णं मेरुतुल्यं तु तद्भवेत्॥ इति॥ अद्येत्यादि० मम समस्तपापक्षयपू
र्वकहेमयहिमाचलदान॥ समफलावाप्त्यक्षय्यसुखश्रीसूर्यजनार्दन

रा०चं०प्र० प्रीतिकामश्चगौर्वायज्ञार्पणेस्तुपूजिता।येदंसुवर्णंअग्निदैवतंसदक्षिणंतु
११८ भ्यमहंसंप्रददेनमनेति॥दानमंत्रस्तु॥गुंजामात्रमिदंस्वर्णंहेमविप्र
करेर्पितं॥हिमाचलमितंभूत्वाप्रीयतांमेजनार्दनेति॥हिरण्यगर्भगर्भ
स्थमितिवा॥इतिव्यतीपातेसुवर्णदानं॥ ॥अथाश्वत्थसेचनं॥ ॥भविष्य
पुराणे॥ ॥उदकुंभप्रदानेतुअश्वत्थाक्रोयःपुमान्भवेत्॥तेनाश्वत्थतरोर्मूलं
सिंचंतिसंजितात्मनां॥सर्वपापप्रशमनंसर्वदुःखविनाशनं॥सर्वरोगापहं
नित्यंध्रुवसंततिवर्धनं॥सेचनमंत्रस्तु॥सिंचाम्यश्वत्थतेमूलंममसंता
तिवृद्धये॥अश्वत्थरूपीभगवान्प्रीयतांमेजनार्दनः॥अनेनमंत्रवर्येणसि ११८
चेदश्वत्थमूलकं॥नमस्कुर्यात्ततोसम्यक्कारयेचपुनःपुनरिति॥सेचन

फलमितितत्रैव॥यःकरोतितरोर्मूलेकंमासचतुष्टयं॥मनोरथास्तस्यसि
ध्यंतिसततिरेषासनातनमिति॥मासचतुष्टयेचैत्रादौवैशाखधर्मेपि॥
अश्वत्थमूलमासिंचेत्तोयेनबहुनासदा॥कुलानामयुतंतेनतारितंस्यान्न
संशयइति॥ ॥इत्यश्वत्थसेचनं॥ ॥अथाथर्वणीये॥ ॥अश्वत्थातिमंत्रणं
॥आरातइत्यस्यापथर्विकांडुतोयोनिरग्निरृषिःवनस्पतिर्देवता॥अनुष्टुप्छं
दः॥अश्वत्थातिमंत्रणेविनियोगः॥ ॥आरात्तेअग्निरस्त्वितस्तवनस्पतइ
ति॥तेकारस्थानेमेकारःस्वयंवक्तव्यः॥पौराणमंत्रस्तु॥अक्षिस्पंदंभुजं
स्पंदंदुःस्वप्नंदुर्विचिंतितं॥शत्रुभ्यश्चसमुत्पन्नमश्वत्थशमयस्वमे॥पुराणां
तरेमंत्रोनरमप्युक्तं॥मूलतोब्रह्मरूपायमध्यतोविष्णुरूपिणे॥अग्रतः

शिवरूपायअश्वत्थायनमोनमइति॥अश्वत्थस्पर्शस्तुमंदवासरंएवंकु
र्यात्॥अन्यवारेष्वर्चनंसेवनंहरतरावकुर्यादित्यर्थः॥पद्मे॥अश्वत्थसे
वनविधिः॥अथसूर्यादिनावैषम्येदानान्युक्तानिज्योतिःसागरे॥कौसुंभ
वस्त्रंगुडहेमताम्रंमाणिक्यगोधूमसवत्सधेनुं॥सवत्सगोदानमितिप्रणी
तंदुष्टायसूर्यायमस्करकाश्चेतिसूर्ये॥१॥घृतकलशंसितवस्त्रंदधिशंखमौ
क्तिकं॥सुवर्णंचरजतंचदद्याद्वंद्वारिष्टोपनामयेतिचंद्रे॥२॥प्रवालगोधू
ममसूरिकाश्ववृषंसताम्रंकरवीरपुष्पं॥आरक्तवस्त्रंगुडहेमताम्रंदुष्टायभौ
मायचचंदनंचेति॥३॥भौमे॥चंदनंरक्तचंदनं॥नीळंवस्त्रंमुद्गहेमंबुधायर
त्नंपाचिर्दासिकाहेमसर्पिः॥कांस्यंदंतंकुंजरस्याथमेषोरौप्यंसस्यपुष्पजाता

दिकंचेतिबुधे॥४॥अश्वंसुवर्णमुत्तमपीतवस्त्रंसपीतधान्यंलवणंसपुष्पं॥सश
र्करंतद्रजनीप्रयुक्तंदुष्टायशांत्यैगुरवेप्रणीतमितिगुरवे॥५॥चित्रवस्त्रमपिदान
वर्चितेदुष्टगेस्तविचरैःप्रणीयतां॥तंदुलंघृतसुवर्णरूपकंवज्रकंपरिमलोधव
लागौरितिशुक्रे॥६॥नीलकंहिषीवस्त्रंकृष्णलोहंसदक्षिणं॥विश्वामित्रायुतंदद्याच्छ
निदुष्टप्रशांतयेइतिशनौ॥७॥राहुदानंकृष्णमेषोगोमेदोलोहंकंबलैः॥सुवर्णना
गरूपंचसतिलंताम्रभाजनमितिराहोः॥८॥केतौवैडूर्यमनलंतैलंमृगमदंतथा॥
र्णांतिलैस्तसंयुक्तंदद्यात्केतोप्रशांतयेइति॥केतोः॥९॥इतिनवग्रहाणांदानन्
न्याण्युक्तानि॥अथग्रहाणांदानानि॥ब्राह्मे॥ग्रहदानेक्रमंवक्ष्येसर्वसिद्धिकरंपरं
॥सर्वशांतिकरंनृणांसर्वपापप्रणाशनं॥दानकालमपितत्रैव॥अथविषुव

चंद्रसूर्योपरागे जन्मर्क्षे तानुवासरे पंचदश्यां व्यतिपाते कुल्यपुण्यकाले पुण्यदेशे वा विवा
हादौ च दाने कार्यं॥ तत्रायं प्रकारः॥ हस्तमात्रां द्विहस्तां वा वेदिं कृत्वा गोमयेनोपलि
प्य तत्र सर्वतोभद्रं पंचरंगैर्विलिख्य तत्र वस्त्रं प्रसार्य तंडुलैस्तत्र नवकोष्ठात्मकं पद्मं
कृत्वा कोष्ठेषु तंडुलैः पद्मानि कृत्वा तेषु निष्कत्रयेण यथाशक्त्या वा सुवर्णप्रतिमा ना
दित्यादिग्रहाणां कृत्वादौ आदित्यं मध्यमे कोष्ठे आग्नेये चंद्रं दक्षिणे भौममैशान्यां
बुधमुत्तरे गुरुं पूर्वे शुक्रं पश्चिमे शनैश्चरं निर्ऋते राहुं वायव्ये केतुं तत्तन्मंत्रैः ततस्तु
ष्पगंधधूपदीपनैवेद्यादिभिः संपूज्य प्रार्थयेत्॥ प्रार्थनामंत्रास्तु॥ पद्मासनः प
द्मकरो द्विबाहुः पद्मद्युतिः सप्ततुरंगवाहनः॥ दिवाकरो लोकगुरुः किरीटी म
मप्रसादं विदधातु देवः॥१॥ श्वेतांबरः श्वेतविभूषणश्च श्वेतद्युतिर्दंडधारो द्विबा

हुः॥ चंद्रोमृतात्मा वरदः किरीटी श्रेयांसि मह्यं प्रददातु देवः॥२॥ रक्तांबरो रक्तवपुः
किरीटी चतुर्भुजो मेषगतो गदाभृत्॥ धरासुतः शक्तिधरश्च शूली सदा मम
स्याद्वरदः प्रशांतः॥३॥ पीतांबरः पीतवपुः किरीटी चतुर्भुजो दंडधरश्च हारी॥
॥ चर्मासिधृक् सोमसुतः सदा मे सिंहाधिरूढो वरदो बुधश्च॥४॥ पीतांबार
: पीतवपुः किरीटी चतुर्भुजो देवगुरुः प्रशांतः॥ दधाति दंडं च कमंडलुं च तथा
क्षसूत्रो वरदोस्तु मह्यं॥५॥ श्वेतांबरः श्वेतवपुः किरीटी चतुर्भुजो दैत्यगुरुः प्रशां
तः॥ दधाति दंडं च कमंडलुं च दंडं च बिभ्रद्वरदोस्तु मह्यं॥६॥ नीलद्युतिः शूलधरः
किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान्॥ चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु मह्य

दान
१२२

वरमंदगामी॥७॥नीलांबरोनीलवपुःकिरीटीकराळवक्त्रःकरवालशूली॥चतुर्भुजश्च
र्मधराश्चराहुःसिंहासनस्थोवरदोस्तुमह्यं॥८॥धूम्रोद्विबाहुर्वरदोगदाभृत्गृध्रासन
स्थोविकृताननश्च॥करालकेतुर्वरवित्तपीतोवरःसदास्तुमेकेतुगणःप्रशांतः॥९॥संप्रार्थ
येद्यात्॥इतिप्रार्थनामंत्राः॥दानमंत्रास्तुअन्वयवासरदोषापतोददानाति॥संहिताप्रदी
पे॥तानुक्तावृक्षदन्नादयहरतितृणंवैकृतंवामरीत्यंसामग्रीरंवडुदानाद्भवतिसुतनवो
रक्तपुष्पप्रदानात्॥सौम्यःशाकस्यमंत्रीहरिहरनमनाज्ञार्गवःशुक्लवस्त्रैस्तैलंनस्नात्सु
तातेदिनकरतनयोब्राह्मणद्यापरौच॥१॥इतिवासरदोषापनोददानानि॥अथसहस्रभोजनवि
धिः॥भविष्यपुराणे॥सहस्रभोजनस्येहविधिंनारायणोमुनिः॥सर्वेषांचैवपुण्यान १२२

मब्रवीत्पुण्यमुत्तमं॥यदाविंत्तंचचित्तंचनक्रिरात्मनिजायते॥तदानीमेवकर्तव्यंप्रीय
तेपरमात्मने॥आषाढेचैववैशाखेचमार्गमासेतथैवच॥गुरुभार्गवयोरस्तंहित्वान्य
स्मिन्शुभेदिने॥कृत्वादौमंगलस्नानंमुहूःसभार्ययासह॥कृत्वादौद्रव्यशुद्ध्यर्थंप्रा
यश्चित्तंयथाविधि॥स्वर्णंवाद्रव्यमादायविप्रेभ्योविनिवेदयेत्॥द्रव्यंसंप्रोक्षयेचाभ्यसं
पादिततदाज्ञया॥गणेशंपूजयेत्पूर्वंमातृणांपूजनंततः॥कृत्वाभ्युदयिकंश्राद्धंस्व
स्तिवाचनपूर्वकं॥आचार्यंवरयेत्पश्चाद्वस्त्रालंकारभूषणैः॥ऋत्विजोवरयेद्धीमा
वस्त्रादिभिश्चपूजयेत्॥पुष्पमंडपिकांकृत्वाचतुरस्त्रांसुशोभनां॥कृत्वेशस्यसुवर्णे
नप्रतिमावर्षसंमितं॥सत्राक्तिकस्यदेवस्यभवानीशंकरस्यच॥तस्याधिदेवताविष्णु
र्ब्रह्मप्रत्यधिदेवता॥शुक्लवनस्पतेइति॥तेकारस्थानेमेकारःस्वयंवक्तव्यः॥पौराया

मंत्रस्तु॥ अश्वत्थस्पंदनं तु जस्पंदं दुःस्वप्नं दुर्विचिंतितं॥ शत्रुतश्च समुत्पन्नम
श्वत्थ शमयस्व मे॥ पुराणांतरे मंत्रांतरमप्युक्तं॥ मूलतो ब्रह्मरूपाय मध्यतो वि
ष्णुरूपिणे॥ अग्रतः शिवरूपाय अश्वत्थाय नमो नमः इति॥ अश्वत्थस्य स्पर्शस्तु म
मंदवासर एव कुर्यात्॥ अन्यवारे पूजनं सेवनं दूरत एव कुर्यादित्युक्तं॥ पद्मे॥
अश्वत्थसेवनविधिः॥ अथ सूर्यादिनवग्रहेदानान्युक्तानि ज्योतिःसागरे॥
कौसुंभवस्त्रं गुड हेम ताम्रं माणिक्य गोधूम सवत्सधेनुं॥ सवत्सगोदानमिति प्र
णीत दुष्टाय सूर्याय मसूरकाश्चेति सूर्ये॥१॥ घृतकलशं सितवस्त्रं दधिशंख
मौक्तिकं॥ सुवर्णं च रजतं च सौदद्याद्दुष्टेरिष्टोपशमनाय इति चंद्रे॥२॥ प्रवाल १२३
गोधूममसूरिका वृषं सताम्रं करवीरपुष्पं॥ आरक्तवस्त्रगुडहेमताम्रं दु

ष्टाय भौमाय च चंदनं चेति॥३॥ भौमे ३॥ चंदनं रक्तचंदनं॥ नीलं वस्त्रं मुद्गहेम बुधाय
रत्नपाचिंदासिका हेमसर्पिः॥ कांस्यं दंतं कुंजरश्चाथ मेघोरो प्यं सस्यं पुष्पजात्यादि
कं चेति बुधे॥४॥ अश्वं सुवर्णं मधु पीतवस्त्रं सपीतधान्यं लवणं सपुष्पं॥ सशर्क
रं तद्रजनी प्रयुक्तं दुष्टाय शांत्यै गुरवे प्रणीतमिति गुरवे॥५॥ चित्रवस्त्रमपि दान
वर्चितं दुष्टगोत्र विचरैः प्रणीयतां॥ तंदुलं घृत सुवर्णरूप्यकं परिमलो धवला
गोरिति शुक्रे॥६॥ नीलकं महिषी वस्त्रं कृष्णलोहं सदक्षिणं॥ विश्वामित्रायुतं द
द्यात् दुष्टग्रहशांतये इति शनौ॥७॥ राहोर्दानं कृष्णमेषो गोमेदो लोहकंब
लैः॥ सुवर्णनागरूपं च सतिलं ताम्रभाजनमिति राहोः॥८॥ केतौ वैडूर्यमम
लं तैलं मृगमदं तथा॥ ऊर्णां तिलैः संयुक्तं दद्यात् केतोः शांतये इति॥ के॥

तोः॥१७॥इतिनवग्रहाणांदानद्रव्याण्युक्तानि॥अथग्रहाणांदानानि॥ब्राह्मे
॥ग्रहदानकर्मवक्ष्येसर्वसिद्धिकरंपरं॥सर्वशांतिकरंनृणांसर्वपापप्रणाशनं
॥दानकालमपितत्रैव॥अथविषुवचंद्रसूर्योपरागेजन्मर्क्षेजन्मानुवासरेपंचद
वर्षाप्राप्तिकृत्स्यपुण्यकालेपुण्यदेशेविवाहादौचदानंकार्यं॥तत्रायंप्रकारः॥
॥हस्तमात्रांद्विहस्तांवावेदिंकृत्वागोमयेनोपलिप्यतत्रसर्वतोभद्रंपंचरंगै
र्विलिख्यतत्रवस्त्रंप्रसार्यतंदुलैस्तत्रनवकोष्ठात्मकंपद्मंकृत्वाकोष्ठेषुतंदुलै
ःपद्मानिकृत्वातेषुनिष्कत्रयेणयथाशक्त्यावासुवर्णप्रतिमानामादित्यादिग्रहा
णांकृत्वादौआदित्यंमध्यमेकोष्ठेआग्नेयेचंद्रंदक्षिणेभौमंमैशान्यांबुधंउत्त
रेगुरुंपूर्वेशुक्रंपश्चिमेशनैश्चरंनिरृतौराहुंवायव्येकेतुंतत्रमंत्रैःतत्तत्पुष्प

गंधधूपदीपनैवेद्यादिभिःसंपूज्यप्रार्थयेत॥प्रार्थनामंत्रस्तु॥पद्मासनःपद्म
करोद्विबाहुःपद्मद्युतिःसप्ततुरंगवाहनः॥दिवाकरोलोकगुरुःकिरीटीमम
प्रसादंविदधातुदेवः॥१॥श्वेतांबरःश्वेतविभूषणश्चश्वेतद्युतिर्दंडधरोद्विबा
हुः॥चंद्रोमृतात्मावरदःकिरीटीश्रेयांसिमह्यंप्रददातुदेवः॥२॥रक्तांबरोरक्त
वपुःकिरीटीचतुर्भुजोमेषगतोगदाभृत्॥धरासुतःशक्तिधरश्चशूलिःसदा
ममस्याद्वरदःप्रशांतः॥३॥पीतांबरःपीतवपुःकिरीटीचतुर्भुजोदंडधर
श्चहारी॥चर्मासिधृक्सोमसुतःसदामेसिंहाधिरूढोवरदोबुधश्च॥४॥पीतां
बरःपीतवपुःकिरीटीचतुर्भुजोदेवगुरुःप्रशांतः॥दधातिदंडंचकमंडलुंच
तथाक्षसूत्रंवरदोस्तुमह्यं॥५॥श्वेतांबरःश्वेतवपुःकिरीटीचतुर्भुजोदैत्यगु

रुः प्रकीर्तितः ॥ दधाति दंडं च कमंडलुं च दंडं च बिभ्रद्वरदोस्तु मह्यं ॥६॥ नीलद्युतिः शूल
धरः किरीटी गृध्रस्थितस्त्रासकरो धनुष्मान् ॥ चतुर्भुजः सूर्यसुतः प्रशांतः सदास्तु
मह्यं वरमंदगामी ॥७॥ नीलांबरो नीलवपुः किरीटी करालवक्त्रः करवालशूली
॥ चतुर्भुजश्चर्मधरश्च राहुः सिंहासनस्थो वरदोस्तु मह्यं ॥८॥ धूम्रो द्विबाहुर्वरदो
गदाभृत् गृध्रासनस्थो विकृताननश्च ॥ किरीटकेयूरविभूषितांबरः सदास्तु मे केतुग
णः प्रकीर्तितः ॥९॥ संप्रार्थ्यं दद्यात् ॥ इति प्रार्थनामंत्राः ॥ दानमंत्रास्तु ॥ अथ वासर
दोषापनोददानानि ॥ संहिताप्रदीपे ॥ भानुस्तांबूलदानादपहरति नृणां वैकृतं वासरो
त्थं सोमः श्रीखंडदानादवनिसुतनवो रक्तपुष्पप्रदानात् ॥ सौम्यः स्राक्स्यमंत्री हरिह
रनमनाद्भार्गवः शुक्लवस्त्रैस्तैलं तस्मात्स्नाते दिनकरतनयो ब्रह्मनद्यापरे च ॥१॥

॥ इति वासरदोषापनोददानानि ॥ अथ सहस्रभोजनविधिः ॥ ॥ भविष्यपुराणे ॥ सहस्रभो
जनस्येह विधिं नारायणो मुनिः ॥ सर्वेषां चैव पुण्यानामब्रवीत्पुण्यमुत्तमं ॥ यदा वित्तं च
चित्तं च सत्क्रियात्मनि जायते ॥ तदानीमेव कर्तव्यं प्रीयते परमात्मने ॥ आषाढं चैव पौ
षं च मलमासं तथैव च ॥ गुरुभार्गवयोरस्तं हित्वा सम्यक्शुभे दिने ॥ कृत्वा दैवं मंगल
स्नानं सुहृद्भिः सन्नार्यया सह ॥ कृत्वादौ द्रव्यशुद्ध्यर्थं प्रायश्चित्तं यथाविधि ॥ दक्षिणां द्रव्य
मादाय विप्रेभ्यो विनिवेदयेत् ॥ द्रव्यं संप्रोक्षयेच्चास्य संपादितं तदाज्ञया ॥ गणेशं पू
जयेत्पूर्वं मातॄणां पूजनं ततः ॥ कृत्वाभ्युदयिकं श्राद्धं स्वस्तिवाचनपूर्वकं ॥ आचा
र्यं वरयेत्पश्चाद्वस्त्राळंकारभूषणैः ॥ ऋत्विजो वरयेद्दक्षैर्वस्त्रादिभिः सुपूजयेत् ॥ पु
ण्यमंडपिकां कृत्वा चतुरस्रां सुशोभनां ॥ कृत्वैकां स्वसुवर्णेन प्रतिमां वर्षसंमितं ॥

श०चंद्वी० मध्याकिकंस्यदेवस्यभवानीशंकरस्यच॥तस्याधिदेवताविष्णुर्ब्रह्माप्रत्यधिदेवता॥
१२६ कृत्वातुप्रतिमांस्तुहिनस्फलारयापूर्वकं॥षोडशैरुपचारैश्चतत्तन्मंत्रेणपूजयेत्॥रु
ग्मिश्चपावमानीस्पर्शत्रिषिच्यतत्र्वविधि॥पुष्पमंडपिकामध्येस्थापितेमंडलोपरि॥
प्रतिमांतत्रसंस्थाप्यकलशेचांवरावृते॥समंतोदेवदेवस्यक्रमेणैवतुपूर्वतः॥तत्तन्मं
त्रेणनाम्नावापूजयेदंगदेवताः॥कर्णिकायांभवानीशोह्यधिप्रत्यधिसंयुतः॥तद्ब
हिश्चैवचत्वारतद्बहिःषोडशाक्रमात्॥एकत्रिंशद्बहिश्चाष्टचत्वारिंशत्तथाक्रमात्
॥पद्मस्यदलपङ्क्तस्थाःकर्णिकाद्यातसंख्यया॥गणेशश्चततोदुर्गाक्षेत्रपालानयं
कराः॥मातृकाश्चतथादित्यारुद्राश्चवसवोग्रहाः॥दिग्दिवारुषयः॥सप्तसागरा॥ १२६
भुवनत्रयं॥नद्यःसप्तगुणाश्चैवेवेदाश्चात्मेत्यनुक्रमात्॥इति॥अत्रपीठयंत्रस्था

यनदेवताक्रमोप्रयोगश्चाहं॥आदौपद्मकर्णिकायांमध्येअधिदेवताविष्णुप्रत्यधिदेव
ताब्रह्मासहितंभवानीशंकरंस्थापयेत्॥तद्बहिश्चतुर्दलपद्मेप्राक्रदक्षिणेपनदुर्गाक्षे
त्रपालमनयंकाराःस्थाप्याः॥तद्बहिस्तृतीयेषोडशदलेषोडशमातरः॥गौरीप
द्माशचीमेधासावित्रीविजयाजया॥देवसेनास्वधास्वाहामातरोलोकमातरः॥धृति
ःपुष्टिस्तथातुष्टिरात्मनःकुलदेवताइति॥तद्बहिरेकत्रिंशद्दलेवसुरुद्रादित्याश्च॥
अष्टौवसवस्तु॥धरोध्रुवश्चसोमश्चअपश्चैवानिलोनलः॥प्रत्यूषश्चप्रभासश्च॥
वसवोष्टौप्रकीर्तिताः॥एकादशरुद्रास्तु॥वीरभद्रश्चशंभुश्चगिरीशोजैकपात्तथा
॥अहिर्बुध्न्यःपिनाकीचभुवनाधीश्वरस्तथा॥कपालीविट्पतिस्थाणुर्भगारव्यारु
द्रसंज्ञिकाइति॥द्वादशादित्यास्तु॥धातार्यमाचमित्रश्चवरुणोंशोभगस्तथा॥इंद्रो

विवस्वान्पूषाचपर्जन्योदशमास्तथा॥त्वष्टाविष्णुरितिप्रोक्ताआदित्याद्वादशक्रमादिति
॥तद्दृष्टिःपंचमेष्टाचत्वारिंशद्दलेष्वादौक्रमेणनवग्रहाःसूर्यःसोमोमहीपुत्रोसोमपु
त्रोबृहस्पतिःशुक्रःशनैश्चरोराहुःकेतवश्चनवग्रहाइतिदशलोकपालास्तु॥इंद्रो
ग्नियमोनिर्ऋतिःवरुणोवायुरेवच॥कुबेरईशश्चब्रह्माचअनंतोदशदिक्पतिरिति॥
सप्तसैर्ऋषयस्तु॥कश्यपोत्रिर्भरद्वाजोविश्वामित्रोथगौतमः॥जमदग्निर्वसिष्ठश्चस
प्तैतेऋषयस्मृताइति॥समुद्रास्तुपूर्वदक्षिणपश्चिमोत्तराश्चत्वारःसमुद्राइति॥भुव
नत्रयंतु॥भूर्लोकोभुवर्लोकोस्वर्लोकइति॥सप्तसरितस्तु॥गंगाचयमुनाचैवगोदाव
रीसरस्वती॥तापीपयोष्णीरेवाचसप्तनद्यःस्पृशांकमइति॥गुणास्तु॥सत्वोरजगु
णाइति॥चत्वारोवेदास्तु॥ऋग्वेदोथयजुर्वेदःसामवेदोथर्वइति॥आत्माच

इत्येतान्मंत्रावाह्यपूजयेदिति॥इतिपीठत्रयेदेवतास्थापनक्रमः॥गंधपुष्पादिभि
श्चैवसमभ्यर्च्ययथाविधि॥यथाशक्तिकृतंसर्वमर्चनंविवेदयेत्॥देवदेवजग
न्नाथविश्वासाक्षान्नमोस्तुते॥गृहाणेमांकृतांपूजांप्रसीदभगवन्गुरो॥ग्रहयज्ञ
विधानेनग्रहपूजांसमप्यच॥ऋत्विग्भिःसहवैहोमंततःकुर्याद्यथाविधि॥कुंडे
वास्थंडिलेवाविस्वगृह्यविधिनाद्विजःकृत्वाग्न्याज्यभागपर्यंतमुपलेपादिकंततःस
मिदाज्येनचरुणायर्वोस्तृसमन्वितैःसहस्रंचाहुतिस्तत्रव्याहृतिभिस्ततक्रा
मात्॥जुहुयाद्दत्विकैकश्चचतुर्विंशतरंशुतं॥प्रणवेनाहुतिंचैकामंतेशैव
पृथक्पृथक्॥देवतानांचसर्वेषांनाममंत्रैर्जुहुयाद्धुतं॥देवतानामंगदेवतानां
॥ततःस्विष्टकृतंकृत्वाहोमशेषंसमापयेत्॥आचार्यादीन्समभ्यर्च्यगंधपु

दान०चं० ष्याक्षतादिभिः॥ दद्याद्धिरण्यं वसारेण दक्षिणां च यथोचितं॥ लेह्यं पेयं तथा चोष्य-
१२८ खाद्यं चैव च षड्रसं॥ देवायादौ निवेद्यं ते द्विजवर्यान्समर्चयेत्॥ तस्मै ज्ञादिकं
दद्यात्तत्तियर्स्पयदाप्नुवेत्॥ दक्षिणा च यथा प्रोक्ता सर्वेषां च समं शतः॥ ततस्तु
भोजयेद्विप्रान्सहस्रं सम्यगेव हि॥ एकस्मिन्नेव काले वा न्यव्हापि दिने दिने॥ यथे
द्यावत्सहस्रं तु तावदेव हि भोजयेत्॥ तेभ्योपि दक्षिणां दद्याद्ज्ञानेन्य स्वशक्तितः॥
दीनान्धकृतपादीन्भोजयित्वा स्वयं ततः समाहितमनः कर्ता भुंजीयान्सह बंधुभि
॥ एवं यः कुरुते सम्यक् सहस्रं द्विजभोजनं॥ समाप्ते तु पुनः हेमिः कर्तव्यो मुक्तिर
ब्रवीत्॥ ब्रह्महा च सुरापी च परद्रव्यापहारकः॥ मातृगामी च गोघ्नश्च परदाररता १२८
ः सदा॥ ज्ञानतो ज्ञानतो वापि पापकारी यथेच्छया॥ सदाचारविहीनश्च दम दान

विवर्जितः इंद्रघ्नोपि हि भ्रूणोयस्मात्सहस्रद्विजभोजनं॥ कुरुते मनुज एवेह स पुनाति न सं
शयः॥ ब्रह्मानंदपदं गच्छेत्तेन पुण्येन चैव हि॥ सहस्रभोजनं श्चैव नानाविधमनोरथा
न्॥ भुंक्ते च सकलान्कामान्भोगानपि च पुष्कलान्॥ तत्र संकल्प्यमाह॥ मम पंचम
हापातक निवृत्तिगोवधपरदारपरद्रव्यापहार कायिक वाचिक मानसिकैन च्छिन्ना
समस्तपापक्षयपूर्वक नानाविधमनोरथसिध्यते षष्टिवर्षसहस्राणि विष्णुलोक
निवासांते ब्रह्मानंदप्राप्तिद्वारा श्रीपरमेश्वरप्रीत्यर्थं सहस्रं ब्राह्मणान्यथाश
यथोपपन्नेनान्नेन यथा कालं यथादेशं सदक्षिणं भोजयिष्ये इति संकल्प्य॥ तत्रादौ
गणेशपूजनं स्वस्तिवाचनं मातृकापूजनं नांदीश्राद्धं आचार्यऋत्विग्वरणं होमादि
च करिष्ये इति संकल्प्य॥ गणेशपूजनादि यथोक्तक्रमेण कुर्यादिति॥ अथ सर्वस्व

दानसंकल्पवाक्यं तु मात्स्ये ॥ अद्येत्यादि० ममैतच्छरीरावच्छिन्नसमस्तपापक्षयपूर्वक
कमनोरथसिद्धिपत्तियात्वसर्वदेयदानजन्यसर्वतीर्थस्नानजन्यसर्वदेवपूजाजन्यस
मफलयमलोकादर्शनदारिद्र्यानुत्पत्तिसार्वकालस्त्रीपुत्रपौत्रधनधान्यमैरव्याद्याव
च्छिन्नवियोगस्वैकाहिकामुष्मिकैश्वर्यत्ववकुगंधर्वोपनेगीयमानदिव्याप्सरोगणसे
वितदिव्यांगनासमाकीर्णहंससारविहंगादिपरिवृतहेमकिंकिणीजालमालिकामंत
र्यादित्यसंकाशविमानारोहणशक्रादिसुरगणसमानत्वब्रह्मविष्णुरुद्रलोकेंद्रग
लोकादिस्वेच्छयाविचरणयावदाहूतसंप्लवान्त्यपवर्गप्राप्तिकामःस्यंतेविष्णुसायु
ज्यत्वाकामः इदं सकलममाश्रमीयं सकलं वस्तु सर्वस्वं सविष्णुदैवतं तत्रैव क १२८
ल्पितसमस्तवर्णदक्षिणं ॥ ॐ सर्वस्वायनमः इति मंत्रेणसुपूजितं गोत्रायशर्मणे

• सुपूजितायतुभ्यमहं संप्रददे नममेति ॥ तत्रैकस्मैदद्यात् ॥ यद्वानानानामगोत्रेभ्यो
ब्राह्मणेभ्यः सुपूजितेभ्यः सदक्षिणां दातुमहमुत्सृजे नममेति ॥ तेनश्रीपरमेश्व
रः प्रीयतां तत्सद्ब्रह्मार्पणमस्तु ॥ प्रार्थनामंत्रस्तु ॥ हरिश्चंद्रो यथाराजा सर्वं दत्वा
दिवं गतः ॥ तथाहं मामनंतीत्वा यास्यामि त्रिदशालयं ॥१॥ दिवि नुवंतरिक्षे च ह
स्त्यश्वरथसंकुलं ॥ हरिश्चंद्रस्य नृपतेर्योऽन्नते न रीतपा ॥२॥ तथा मम माश्रमं सर्वं
दिविसर्वत्र गच्छतु ॥ सर्वस्वमुनये दत्वा यां गतिं नृपतिर्गतः ॥३॥ सर्वस्वदानेनोत्से
कैनानेन तां गतिं प्राप्नुयामहं ॥ सर्वस्वते च दानेन हरिश्चंद्रो यथाभवत् ॥४॥ दुः
खहीनः खहीनः सुखमयस्तथा मां कुरु सर्वदा ॥ सर्वस्वदानात्सैसाकल्यामनसं
तुमनोरथाइति ॥५॥ इति सर्वस्वदानप्रयोगः ॥ अथ युगप्राधान्येन व्यासोक्तधर्म

च्यते॥तपःपरंकृतयुगेत्रेतायांज्ञानमुत्तमं॥द्वापरेयज्ञमित्याहुर्दानमेकंकलौस्मृ
तइति॥स्कांदे॥श्रांतस्ययानंतृषितस्यपानमन्नंक्षुधार्तस्यनरोनरेंद्रः॥विद्याधि
नानेनकरांगनाभिःसंस्तूयमानस्त्रिदिवंप्रयांतीति॥इत्यादिनाप्राहयमः॥यतीनां
परमोधर्मस्त्वनाहारोवनौकसां॥दानमेवगृहस्थानांशुश्रूषाब्रह्मचारिणामिति॥दा
नमावश्यकंकेषामित्याहव्यासः॥मातापित्रोश्चयद्दत्तंभ्रातृस्वसृसुतासुच॥सौद
र्येपिचयद्दत्तंसोतिपिःस्वर्गतिःक्रमः॥पितुःशतगुणंदानंसहस्रंमातुरुच्यते॥अनं
तंदुहितुर्दानंसोदर्येदत्तमक्षयं॥नविष्णोत्तरेपि॥नकेवलंब्राह्मणानांदानंसर्वत्र
शस्यते॥भगिनीभागिनेयानांमातुलानांपितुःस्वसुः॥दरिद्राणांचबंधूनांदानंको
टिगुणंभवेत्॥मातुर्गोत्रेशतगुणंस्वगोत्रेदत्तमक्षयं॥दातुर्लक्षगुणमपितत्रै

वश्चपापोरोगीधर्मात्मादित्सयाचमनःशुचिः॥अनिंद्याजीविकर्माचषड्भिर्दाताप्रश
स्यते॥प्रतिग्रहीतुरन्नेणमपितश्चैव॥त्रिशुक्लःक्षीणवृत्तिश्चघृणावान्सकलेंद्रियः
॥नियुक्तोयोनिर्दोषस्योब्राह्मणःपात्रमुच्यतेइति॥तथा॥सौमुख्यमभिसंप्रीतिरर्थि
नांदर्शनेसदा॥सत्कृतिश्चानुसूयाचतथाश्रद्धेतिकीर्त्यते॥देवलः॥यद्ददातियदश्ना
तितदेवधनिनांधनं॥अन्येमृतस्यक्रीडंतिदारैरपिधनैरपि॥व्यासः॥श्रेयासत्वातव्य
श्रयस्यप्राणेभ्योपिगरीयसा॥अतिरेकैक॥वित्तदानमन्नावियन्नयः॥ग्रासाधर्ममपि
ग्रासमर्थिभ्यःकिंनदीयते॥इच्छानुरूपोविभवःकदाकस्यभविष्यति॥मात्स्ये॥न्याये
नार्जनमर्थस्यवर्धनंचाभिरक्षणं॥सत्पात्रेप्रतिपत्तिश्चसर्वशास्त्रेपिगीयते॥इतिमु
निस्तथैव॥अदत्त्वायत्नयत्नेतितत्रतत्रसुदुःखिताः॥दातासुखमवाप्नोतियत्रयत्रापिच

निर्हृतिरिति॥याज्ञवल्क्यः॥अक्षरद्वयमभ्यस्तंनास्तिनास्तीतियत्पुरा॥तदिदंदेहिदे
हीतिविरीतमुपस्थितं॥इतितथा॥द्वारंद्वारंरटन्तीहभिक्षुकाःपात्रपाणयः॥दर्श
यन्त्येवलोकानामदातुफलमीदृशं॥बृहस्पतिः॥द्वावेवाप्सुप्रवेष्टव्यौगलेबध्वादृ
ढंशिलां॥धनवंतमदातारंदरिद्रंचातपस्विनंइति॥दरिद्रस्यैववरद्यादित्याह॥बृह
स्पतिः॥वृष्टिर्यथासमुद्राणांतृप्तानामन्नंयथा॥तथादानंसमृद्धानामदत्तंभवति
निःफलमिति॥अतःपरंषोडशमहादानादीनांवक्तव्यत्वादुपरम्यतइति॥कालोपना
म्नामेश्वरभट्टस्नोःसुधीमतः॥महादेवद्विजार्यस्यसूनुनाज्ञानविष्णुना॥दिवा
करेणरचितादानसंक्षेपचंद्रिका॥गिरिजाजानितुष्ट्यर्थमुदंविन्नेनुसात्त्वतामिति १३१
॥२॥विद्वत्प्रार्थना॥अदृष्टदोषान्मतिविभ्रमाद्यदर्थहीनंलिखितंमयात्र॥त

त्सर्वमार्यैःपरिशोधनीयंकोपंनकुर्यात्खलुलेखकस्य॥३॥किंच॥शास्त्रकतन्त्रिवे
त्त्यासोलेखकोगणेनायकः॥तयोर्विचलिताबुद्धिर्मनुष्याणांचकाकथा॥लेखन
परिश्रमवत्तानुवेत्तिविद्वज्जनोनान्यःसागरलंघनखेदंहनुमानेनकःपरंवेत्तीति
॥॥इतिकारंयांश्रीमत्कालोपनामकभट्टरामेश्वरात्मजभट्टमहादेवद्विजवर्य
सुनुवालंभट्टानुजभट्टदिवाकरविरचितदानचंद्रिकासमाप्ता॥ ॥ ॥दानानि
सर्वाणयन्निधायतेषांप्रतिग्रहेशुद्धिमतोविधास्ये॥ययाधियाज्ञाविनयाप्रवृत्तिप्र
तिग्रहेसाधुजनस्यनस्यात॥१॥तत्रमेषिदानप्रकरणे॥दुष्टप्रतिग्रहहतोविप्र
भवतिपातकी॥नाभिभाषेततोदृष्टान्नन्मुखंनावलोकयेदित्यादिनविप्रात्र
रे॥दुःप्रतिग्रहदग्धस्यविप्रसकिलनारत॥नयन्नेपद्धदनंपश्चात्मैवनमभिवादयेत॥

॥इतिमहाभारते॥पूतकोगणकोव्यासोघोरग्राहीतथैवच॥पराश्चिवाहकोवैद्योग्रामया॥
जीतथैवच॥एतेतसमाख्योकेनस्पृश्याःकदाचन॥कदाचिन्मोहितंस्पृष्टःसवासा
अप्सुतःशुचिरिति॥पाराशरस्मृतौच॥मंत्रेणानेनदत्वातत्त्वपिपत्यस्तमाप्यच॥
आसीमांतमनुव्रज्यतन्मुखंनावलोकयेदिति॥आदित्यमहार्णवे॥चतुःप्रतिग्रह
स्पृष्टःप्रतिग्रहइत्वतुथ॥३॥दातकालदेशप्रतिग्रह्यदोषोभवेत्॥चांडालत्वपति
त्वाद्येदातृदोषः॥कुरुक्षेत्रकाद्योदेशदोषः॥चंद्रसूर्योपरागः॥कालदोषः॥उ
न्मत्तोमुखीत्वमेषीत्वाद्योदेवदोषः॥तिलधेनुगजोवाजीमाहिषाजिनमूर्तयः॥
मुरभिःसूयमानाश्चघोराःसप्तप्रतिग्रहाइति॥निषेधात्॥प्रेतान्नमजिनंमणि
रितिपाठेप्रेतान्नमेकादशाहिकश्राद्धान्नंजनमणिः॥शालग्रामइतिहेमाद्रिः

तत्रैवतन्निषेधोरुणस्मृतौ॥परमापदृतेनापिअंत्यजातिप्रतिग्रहः॥नकार्यंब्राह्मणे
नेहआत्मनःश्रेयमिच्छता॥प्रतिग्रहश्चांत्यजातेःपतितत्वंप्रजायतेइति॥अंत्यजा
हमनुः॥रजकश्चर्मकश्चैवनटोवुरुडएवच॥कैवर्तकोमेदभिल्लाश्चसप्तैतेअंत्यजाःस्मृ
ताः॥इति॥चांडालानामाहव्यासः॥ब्राह्मण्यांशूद्रजातिनश्चांडालोधर्मवर्जितः॥कुरु
क्षेत्रप्रतिग्राहीनृपःपुरुषोभवेत्॥गायत्रीमनुजप्येनसततंलक्षंभवेच्छुचिरिति॥
कालदेयदोषत्रितोसत्प्रतिग्रहप्रायश्चित्तकथनेस्मृतः॥सर्वासत्प्रतिग्रहेप्रायश्चि
त्तंषट्त्रिंशन्मते॥देव्याःसप्तजपेनेवशुध्यतेयत्प्रतिग्रहात्॥इति॥यत्तुयाज्ञवल्क्य
॥गोष्ठेवसन्ब्रह्मचारीमासमेकंपयोव्रतं॥सावित्रीजाप्यनिरतःशुध्यतेसत्प्रतिग्र
हादिति॥जपसंख्यातु॥जपित्वात्रीणिसावित्र्याःसहस्राणिसमाहितइतिमनुना

दा०नं०चं०
१३३

॥तद्भिन्नतिप्रकारेणप्रतिग्रहस्याल्पत्वविषयं॥तेनपतितात्स्वोदुष्टद्रव्यप्रतिग्रहेषट्त्रिंशन्मतो
क्तं॥दत्वाप्राजापत्यरूपंपतितादिभ्योनहिरण्यादिप्रतिग्रहेयाज्ञवल्क्योक्तंमतिविज्ञा
नेश्वरः॥स्मृत्यर्थसारे॥सर्वत्रानुक्तौदातृदेयकालद्रव्येषुदुष्टेष्वपिद्वादशनिष्कप्रमा
णद्रव्यप्रतिग्रहेकार्यं॥एवंसर्वत्रद्रव्यानुसारीप्रायश्चित्तह्रासवृद्धीज्ञात्वाकल्प्ये॥दातृदे
यकालद्रव्येष्वन्यतरदोषेएकैकगुणवृद्धिः॥मणिवासोगवादीनामन्यतरप्रतिग्र
हेगायत्र्याष्टसहस्रजपः॥तिलादिप्रतिग्रहेपुण्यमंत्रोच्चारणं॥नचप्रतिग्रहस्यानिषे
धत्वात्कथंप्रायश्चित्तविधिरितिवाच्यं॥प्रतिग्रहेणापिविप्राणांब्राह्मंतेजःप्रहीयतइति॥
स्मरणस्मृत्याप्रायश्चित्तात्मानेनचतत्कथनात्॥प्रतिग्रहसमर्थोपिप्रसंगंतत्रवर्जये १३३
त्इति॥स्पष्टमेवनिषेधत्वाच्च॥प्रायश्चित्तंप्रतिहीनंसर्वद्रव्यंत्यक्त्वैवकार्यं॥ततिद्रैप्रा

यश्चित्ताधिकारात्त्वादिति॥स्मृत्यर्थसारादयः॥स्मरणास्मृतौतु॥षडंशाहृद्रन्नापू
रित्यागोवैकस्मिन्कापुक्तौतथा॥प्रतिग्रहन्तषडंशंवाणिज्यास्तुतृतीयकं॥कृषेर्विंशति
मंशंगत्वततोनास्तिपापलेशं॥प्रतिग्रहःकुत्सितानांत्रिभिःकृच्छ्रैर्विशुध्यति॥रथोवाजी
चमहिषीतिलधेनुर्गजोजिनं॥स्पृशमानाश्चसुरभिर्घोराःसप्तप्रतिग्रहाः॥एतेषांप्रतिग्र
हेऽश्राहिताग्नेःप्राजापत्येष्टिःस्यात्ग्निमतश्चरुतद्देवताकः॥अनग्नेःअन्येषांचकृच्छ्र
त्रयं॥स्मरणस्मृतौ॥गुडधेन्वादिधेनूनांप्रायश्चित्तंतथोच्यते॥प्रतिग्रहेचरेद्विप्रःप्रा
जापत्यमतंद्रितः॥जपेद्वापौरुषंसूक्तंअप्सुचैवाघमर्षणं॥अहोरात्रस्थितश्चैवमुच्यते
तेनकिल्बिषात्॥अयुतंजपसंख्या॥गृहदानंमहादानंनास्तिदानंगृहात्परं॥येनद
त्तेनदानेनसर्वदत्तंभवेत्क्षणं॥गृहोपस्करणंसर्वंगोमहिष्यादिभूषणं॥कंड्याये

दान०चं०

१३५

षणीचुल्लीक्षुदकुंतस्यमार्ज्जनं॥शय्याचमार्ज्जनंछिंनंवितानंरथगोवृषं॥तत्रकृ
च्छ्रंचरेद्विप्रोमहासांतपनंतथा॥शतंवाभोजयेद्विप्रान्गायत्रीलक्षमेवच॥प्रायश्चि
त्तेकृतेविप्रोमुच्यतेतत्प्रतिग्रहात्॥प्रायश्चित्तंस्पृकरयोपुवैवक्रियतेतुसः॥अश्वंप्र
तिग्रहंकृत्वाचरेच्चांद्रायणत्रयं॥अश्वस्यविक्रयंकृत्वाह्येतदेवव्रतंचरेत्॥कपिला
विक्रयंकृत्वाचरेच्चांद्रायणत्रयं॥गोशतंगोसहस्रंचकृष्णांवैतरणींतथा॥चतस्रः
श्चैवगावश्चवर्ज्जनीयाःप्रयत्नतः॥चतस्रःउत्क्रांतिरुणपापमोक्षधेनवः॥गृहीत्वा
वैतरणींलोहदंडंतथापरं॥प्राजापत्यत्रयंकुर्याद्भोजयेच्चशतंद्विजान्॥जपेद्वावामदे
व्यंचत्रिवसंकल्पमेवच॥रथंतरंवामदेव्यंचपेन्मुच्येतकिल्बिषं॥यज्ञकर्मणिया १३५
धेनुर्लक्षैवच॥मधुपर्कमयाधेनुर्याधेनुःकन्यसिद्धये॥एतत्प्रतिग्रहेविप्रप्राय

श्चित्तंनविद्यते॥पर्वताद्यायेप्रोक्तास्तथैवह्रिमुरवीचगौः॥एषांप्रतिग्रहेविप्रःस्वये
न्मासचतुष्टयं॥प्राजापत्येनकृच्छ्रेणषण्मासंतुव्रतिनाजेत्॥विप्रेभ्योदद्यात्॥जपे
द्वादशलक्षंवागायत्र्याःसायजिनः॥शतेनमुच्यतेपापाद्विप्राणांभोजनेनच॥श
तंब्राह्मणाभोजनेत्स्वर्गः॥गजप्रतिग्रहंकृत्वाद्विजश्चांद्रायणत्रयं॥महासांतप
नंवापिब्रह्मकूर्चसमन्वितो॥रथंप्रतिग्रहेलक्षंगायत्रीजपमाचरेत्॥अयुतंवाप
गायत्र्याःसंगमेस्नानमाचरेत्॥षण्मासंतुपरित्यज्यब्राह्मणांभोजनेछुचिः॥प्रति
ग्राह्यान्ययानातिप्रायश्चित्तंतथोदितं॥जपेन्निरंतरंदेवींवैष्णवंव्रतमाचरेत्॥ज
पसंख्याअयुतादिः॥विद्यादानंगृहीत्वापियत्किंचित्पुस्तकादिकं॥ब्राह्मणांन
भोजयेच्छक्त्याकृच्छ्रमेकंसमाचरेत्॥पृथिवीप्रतिगृह्यायसर्वोत्रवनकःनन्ना॥

अविद्यातुमयंगत्वातस्तकृच्छ्रत्रयंतथा॥ जप्त्वात्रिषवणस्नायीपयोदन्मासतेचैच्छयं॥ एवंमु
ह्विम्वाप्नोतिद्विजः षष्ठंभ्रामुत्सृजेत॥ इदंचसदक्षिणाप्रतिग्रहेतद्रहितप्रतिग्रहेतु
दोषः॥ भूमिंयः प्रतिगृह्णातियः स्तुभूमिंप्रयच्छति॥ तावुभौपुण्यकर्माणौनियतं
स्वर्गगामिनामित्युक्तेः॥ ॥अथषोडशमहादानेषु॥ ॥तत्रवारुणस्मृतौ॥ तुलापुरु
षंतागंचगृह्णीत्वाचांद्रकंचरेत्॥ हिरण्यगर्भेचतथाब्रह्मांडेकल्पपादपे॥ जप्त्वात्रिषव
णस्नायीचरेत्सांतपनद्वयं॥ गोसहस्रपरिग्राहीयदाविप्रोह्यकामतः॥ गोमूत्रंपाचका
राहोमासेनैकेनशुध्यति॥ हिरण्यकामधेन्वादिदानमंत्रंयपयोरितं॥ महाभूतघटं
तेषुप्रायश्चित्तमथोच्यते॥ गायत्र्याद्वादशसहस्रैप्राणायामैर्मत्स्यैरहस्तकैः॥ तत्रंपतिपा
यसंघाश्चकाकथादुःप्रतिग्रहे॥ पावमानंचसूक्तंवैसर्वपातकनाशनं॥ अत्राय

१३५

सधिसंधिः॥ आयुष्यमितिसूक्तेनमणिंकंठेप्रमुच्यते॥ इत्यादिसूत्रेषुखिलानामपिवि
नियोगदर्शनात॥ तेषामपिप्राणाण्यबलोत्पावमानीजपस्यखिलेषुविधानानतत्कः
ल्पयेदित्योर्थः गोघ्नात्मातृपितृवधादित्यादिमंत्रवर्णेनतत्तत्पातकनाशस्यफलत्वाचसा
यान्नतत्पायेषुवैपावमानीजपस्यप्रायश्चित्तत्वंपापानुरोधेनचजपसंख्याकल्पनीये
तिदिक्॥ अथराजप्रतिग्रहप्रायश्चित्तं॥ ॥अनापदिराजप्रतिग्रहनिंदतियाज्ञवल्क्यः
॥नाराज्ञः प्रतिगृह्णीयात्लुब्धस्योच्छास्त्रवर्तिनः॥ प्रतिग्रहेसूनीचक्रीध्वजीवेश्यानरा
धिप॥ अष्टदशगुणंपूर्वात्पूर्वादितेयथोत्तमाति॥ संवर्तः राजप्रतिग्रहोघोरोपद्या
स्वदोविषोपमः॥ पुत्रमांसंवरंभोक्तुंनचराजप्रतिग्रहइति॥ स्कांदे॥ मरुद्देशेतिरु
द्देशेब्रह्मराक्षसत्वमागताः॥ राजप्रतिग्रहात्पुत्रः पुनर्जन्मोनविंदति॥ ब्राह्मण्यय:

परित्यज्यद्व्यक्षेत्रेनमोहितात्‌॥विषयाभिषलुब्धात्मकुर्याद्राजप्रतिग्रहं॥नरकेरौ
रवेघोरेतस्यैवपतनंध्रुवं॥तृष्णादेवाग्निजादग्धावरोहेतिद्यतोगमे॥राजप्रतिग्रहेस्था
नप्ररोहेतिकर्हिचित॥इतिविष्णुधर्मोत्तरे॥दशसूनासमश्चक्रीदशचक्रसमोध्वजी
॥दशध्वजीसमावेश्यादशवेश्यासमोनृपः॥दशसूनासहस्राणियोवाहयतिसौ
निकः॥तेनतुल्यःस्मृतोराजातस्मात्घोराःप्रतिग्रहितिहेति॥इत्यधार्मिकराज्ञविषये
निंदा॥तथाचतत्रैवविषितं॥येषान्नविषयेप्राप्तिर्यद्वेयत्नवतंहरि॥यत्रतेनृनुजा
तेषांमेतत्सुनोदिदंफलं॥येषामाखंडिसंकीर्णराष्ट्रान्नब्राह्मणोत्कटं॥एतेसुनास
हस्त्राणांदेवानांत्ताभिनोनृपः॥येषान्तयत्नपुरुषाकारयोपुरुषोत्तमः॥तेतुपापस
माचारास्तूनाःपापोहत्तोभिनइति॥श्राद्धेष्वनुराज्ञःप्रतिग्रहोननिंदितः॥स्मृत

रेवोक्तंछंदोगपरिशिष्टेवायां॥प्राचीनत्रासादीनमहामुनीनराजप्रतिग्रहेप्रवर्ततइति॥अश्व
पतीनांमेकेनराज्ञादोषाणावाउपन्यस्तः॥नमस्तेनोजनपदेनकदर्योनमद्यपः॥ना
नाहिताग्निर्नाविद्वानस्वैरिस्वैरिणीकुतइति॥याज्ञवल्क्यवचनेपिराजप्रतिग्रहेनिंदा
यांलुब्धस्याछास्त्रवर्तिनइतिराजविशेषणादशुद्धराजप्रतिग्रहोननिंदितइतिग
म्यते॥तथाचनारदोपि॥श्रेयात्प्रतिग्रहोराज्ञानान्येषांब्राह्मणादृते॥ब्राह्मणश्चै
वराजाचद्वावप्येतेधृतव्रतौ॥नैतयोरंतरंकिंचित्प्रजाधर्माभिरक्षणे॥शुचीनामशु
चीनांचसंनिवेशोयथांभसां॥समुद्रेसमतांयातितद्वद्राज्ञांधनागमः॥यथाग्नौसंस्थि
तंचैवशुद्धिमायातिकांचनं॥एवंधनागमःसर्वशुद्धिमायातिराजनीति॥राजप्रति
ग्रहेप्रायश्चित्तमाहचतुर्विंशत्यांहारीतः॥राज्ञःप्रतिग्रहंकृत्वामासमप्सुसदावसेत॥एष्टे

दान०चं०

१३५

कालेयपयोनदः पूर्णेमासेप्रमुच्यते॥ तर्पयित्वा द्विजान्कामैः सनसंनियतव्रतमिति॥ त
दसत्वतिग्रहविषयमितिमाधवः॥ ॥अथरहस्यप्रायश्चित्तानियाज्ञवल्क्यः॥ अना
त्विरमलदोषस्तुरहस्यंव्रतमाचरेदिति॥ कर्तव्यतिरिक्तैर्यदीपदोषोनज्ञायतइत्यर्थ
॥ अतः अपारदार्यादेरपिस्त्रीप्रसंसाम्यामितरेणाज्ञानस्यरहस्यतास्त्येव॥ तस्यप्रा
यश्चित्तमपिरहस्यमेवकर्तव्यं॥ तथाचहारीतः॥ रहस्येरहस्यंप्रकाशेप्रकाशमिति
॥ तत्ररहस्यानांसाधारणप्रायश्चित्तं॥ मनुराह॥ वेदाभ्यासोऽन्वहंशक्त्यामहायज्ञक्रि
याक्षमाः॥ नाशयन्त्याशुपापानिमहापातकजान्यपि॥ यथैधांस्तेजसावह्निः पापं
निर्दहतिक्षणात्॥ तथाज्ञानकृतंपापंकृत्स्नंदहतिवेदवित्॥ सव्याहृतिकप्रणवा १३५
प्राणायामास्तुषोडश॥ अपिभ्रूणहनंमासात्पुनन्त्यहरहः कृता इति॥ वसिष्ठः॥ य

द्यत्कार्यंकृतेसाग्रंशतंवेदेष्वधार्यते॥ सर्वंतत्तस्यवेदाग्निर्दहत्यग्निरिवेंधनमिति॥
यमः॥ सहस्रंपरमांदेवींदशमध्यांदशावरां॥ गायत्रींसंजपेन्नित्यंमहापातक
नाशनमिति॥ वृद्धशौनकः॥ ऋग्वेदमभ्यसेद्यस्तुयजुःसामथवापिच॥ सूक्ता
निसुरहस्यानिअथर्वांगिरसस्तथा॥ ब्राह्मणानिचकल्पांश्चषडंगानितथैवच॥
इतिहासपुराणानिदेवतास्तवनानिच॥ जप्त्वापापैःप्रमुच्येतधर्मस्थानैःस्तथाप
रैरिति॥ कौर्मे॥ जपस्तपस्तीर्थसेवादेवब्राह्मणपूजनं॥ ग्रहणादिषुकाले
षुमहापातकशोधनं॥ पुण्यक्षेत्राभिगमनंसर्वपापप्रणाशनं॥ देवताभ्यर्चनं
नृणांसर्वपापप्रणाशनं॥ अमावास्यातिथिंप्राप्ययः समाराधयेद्भवं॥ ब्राह्मणा
न्भोजयित्वातुसर्वपापैःप्रमुच्यते॥ कृष्णाष्टम्यांमहादेवंयथाकृष्णचतुर्दश्यां

प्रान०चं०

१३८ संपूज्य ब्राह्मणान्मुच्येत्सर्वपापैः प्रमुच्यते॥ तयोदश्यां तयारात्रौ सोपहारं त्रिलोचनं॥
दृष्ट्वेशं प्रथमे यामे मुच्यते सर्वपातकैः॥ एकादश्यां निराहारः समभ्यर्च्य जनार्दनं॥
द्वादश्यां शुक्लपक्षस्य सर्वपापैः प्रमुच्यते॥ उपोषितश्चतुर्दश्यां कृष्णपक्षे समाहि
तः॥ यमाय धर्मराजाय मृत्यवे चांतकाय च॥ वैवस्वताय कालाय सर्वभूतक्षया
य च॥ औदुंबराय दध्नाय नीलाय परमात्मने॥ वृकोदराय चित्राय चित्रगुप्ताय वै
क्रमात॥ चतुर्दशैते मंत्राः स्युश्चतुर्थ्यंता नमोन्विताः॥ प्रत्येकं तिलसंमिश्रा द
द्यात्सप्तोदकांजलीन्॥ स्नात्वा नद्यां तु वाह्नि मुच्यते सर्वपातकैरिति॥ तथा च तंत्रे
वाध्मायां तरेऽस्मिन्कलियुगे घोरे लोकाः पापानुवर्तिनः॥ न विशंति महाबाहो १३८
वर्णाश्रमविवर्जिताः॥ नान्याप्यपापिनिजंतूनां मुक्तौ वाराणसीं पुरीं॥ सर्वपा

पप्रशमनं प्रायश्चित्तं कलौ युगे इति॥ इति रहस्येतासाधारणप्रायश्चित्तानि॥ अथ
य प्रतिपदोक्तप्रायश्चित्तानि॥ याज्ञवल्क्यः॥ त्रिरात्रोपोषितो जप्त्वा ब्रह्महा त्वघ
मर्षणं॥ अंतर्जले विशुध्येत गां च दत्वा पयस्विनीं॥ इति मनुः॥ हविःष्यांतस्य
सूक्तस्य नतमंहइतिति च॥ जप्त्वा च पौरुषं सूक्तं मुच्यते गुरुतल्पक इति॥ हवि
ष्यांतमजरं स्वर्विदि स्पृकोनविंशाद्दर्चं सूक्तं॥ न तमंहो न दुरितमित्यष्टर्चं सूक्तं॥ इ
ति वा इति मे मन इति त्रयोदशर्चं॥ सहस्रशीर्षेति षोडशर्चं॥ एतेषां चतुर्णां सू
क्तानां अन्यतमं प्रत्यहं षोडशकृत्वो मासं जपित्वाऽकामतो गुरुतल्पकः शुध्ये
द्ब्रह्महत्ययेति॥ ॥ इति श्रीमत्का[illegible]ध्यतीति विज्ञाने स्वरादिसंमतोर्थः॥
मूले शौनकः॥ अतो देवा जपेत्सूक्तं अग्रजन्मा पूषिवात्त चा॥ अघमर्षं च वाजा॥

स्नानुच्यतेब्रह्महत्ययेति।। ।।इतिश्रीमत्कालोपनामकजन्हरामेश्वरात्मजतत्सहमह
देवद्विजवर्यसूनुदिवाकरस्वहविरचितदानचंद्रिकायांसदसत्प्रतिग्रह
प्रायश्चित्तानिसंक्षेपेणकात्स्न्येनिरूपितानि।। ।।अथयस्मृत्यर्थसारोक्तरहस्यप्राय
श्चित्तानि।।तत्रकर्तव्यतिरिक्तैरेतद्दोषरहस्यप्रायश्चित्तंचरेत्।।अविद्यास्तुमु
ख्यांतरेणरहस्यप्रायश्चित्तंज्ञात्वारहस्यंचरेत्।।स्त्रीशूद्राश्चैवंजपहोमवर्ज्यं।।त
त्राहारविशेषानुक्तौपयःपयःघृततयःकालविशेषानुक्तौवत्सरादयोसांताःदेश
विशेषानुक्तौग्रामालोचपादयोगौतमोक्ताः।।जपेतुऋषिदैवतछंदोविनियोगाइ
तिज्ञेयाः।।अमत्याब्राह्मणवधेअघ्नस्त्रिरात्रमंतर्जलेनिमग्नकृतंचसलंचेत्स
घमर्षणसूक्तमावर्त्यत्रिरात्रांतेपयस्विनींगांदत्वाशुद्ध्येद्दानाशक्तौसव्याहृति

तिकाःषोडशप्राणायामाःप्रतिदिनंमासमावर्त्याःअन्यस्यतुत्रिरात्रंव्रतस्थ
ःप्राणायामैस्त्रीतेघमर्षणंजपेत्।।महापापैःशुध्येत।।मत्यादृत्वाग्वेनिक्रम्य
स्नाति।। ।।इतिस्मृत्यर्थसारोक्तप्रायश्चित्तानि।।इतिदानचंद्रिकासमाप्ता।। ।। ।।

अथदानचंद्रिकाअनुक्र	अथाद्यदानानि	दातृकृत्यं ४	द्रव्यदेवता ५
मणिकालिख्यंते।।	दानकालः ३	द्रव्यमानं ४	दानलक्षणं ५
तुलापुरुषदानं	पुण्यदेशाः ३	धान्यमानं ५	प्रतिग्रहस्थानानि ६
ब्राह्मणलक्षणं २	तीर्थप्रतिग्रहनिषेधः ३	दक्षिणापरिमाणं	कुंडमंडपविचार ७
द्रव्यविभागः २	नदीवार्त्तलक्षणं ३	दक्षिणाविभाग	तुलावेदीप्रमाणं ८

तुलादानप्रकार ८

तुलालक्षणं ९	तुलादानदेवतास्थाप	अश्वदानं २४	रथदानं ३१
षोडशारचक्रं ९	नपूजनंचप्रार्थना	श्वेताश्वदानं २४	शिबिकादानं
नानारोगपरिहार	तुलाप्रतिग्रहश्च १७	वायाश्वदानं २५	निवर्तनगोचर्ममानं
व्यविशेषः १२	चार्यःप्रायश्चित्तं १८	तिलदानं २५	भूमिदानं
संग्रहतुलादानानि	गोसहस्रमहादा	तिलपात्रदानं २६	गृहदानं
तुलाकर्मणिरेव	नप्रयोगइति १९	महातिलपात्रदानं २६	गृहेनिर्माणलक्षणं
तुलाकालं १२	गोशतदानं २१	नातुरात्पपात्रकं २८	गृहेदिग्विशेषकूपलक्षण
अथतुलापुरुषदा नविधि	सहस्रगोदानं २२	स्वमर्यतिलपात्रदानं	कर्त्तव्यमाहनारदः
नुरथसंकल्पः १३	संक्षेपदशगोदानं	तिलपूर्णकनकदानं २८	वास्तुशांतिप्रयोगः
तुलापुरुषदानप्रयोगः	दशमहादानानि	गजदानं २९	वास्तुदेवतास्थापनं
नुरथसंकल्पः १४	कनकदानं २३	दासीदानं ३०	अग्निस्थापनं

१४७

प्रधानहोमः	धर्मशालादानं	मधुधेनुदानं	लवणधेनुदानं
बलिदानं	अथकन्यादानं	शर्करादानं	सुवर्णधेनुदानं
पूर्णाहुतिं	कपिलादानं	पंचरत्नानि	वंध्यात्वहरं सुवर्णधेनुदा॰
अभिषेकः	महाकपिलादानं	दधिधेनुदानं	वंध्यालक्षणं
सूत्रवेष्टनं	अथपराधेनुदानानि	रसधेनुदानं	उभयतोमुखीदानं
वास्तुप्रोक्षणं	तारसुवर्णमानं	प्रत्यक्षगोदानं	सुवर्णसंख्यामनंगु
वास्तुनिक्षेपः	अथघृतधेनुदानं	गोदानप्रयोगः नानि	जात॰मासे
मत्स्यटिका	अथजलधेनुदानं	श्वेतादिसवर्णगोदा	व्यावहारमासे
सत्त्वोक्तवास्तुशांतिः	तिलधेनुदानसंक्षेप	कृष्णधेनुदानं	निष्कमासे
गृहदानप्रयोगः	दानकमलाकरेप्रयोग	हेमशृंगीगोदानं	तदर्धं २०मासे
अथमठदानं	क्षीरधेनुदानं	कार्पासधेनुदानं	तदर्धं १०मासे

प्रायश्चित्तं
उभयतोमुखीप्रतिहरण
दशदानानि
तिथ्यर्कनक्षत्रं
गोदानं
भूदानं
तिलदानं
हिरण्यदानं
आज्यदानं
वस्त्रदानं
धान्यदानं
गुडदानं

रौप्यदानं
लवणदानं
पापापनोदधेनुदानं
ऋणापनोदधेनुदानं
प्रायश्चित्तधेनुदा०
वैतरणीगोदानं
उत्क्रांतधेनुदानं
मोक्षधेनुदानं
महिषीदानं
महिषीदानं
अथमेषदानं

अजादान
मंदाग्निहरत्वमेषदानं
स्वर्णाचलपर्वतदानं
लवणाचलदानं
गुडाचलदानं
गुडाचलदानं
नारलक्षणं
सुवर्णाचलदानं
तिलाचलदानं
अर्घादिद्येतिलपर्वत
कर्पासाचलदनं

घृताचलदानं
रत्नाचलदानं
रौप्याचलदानं
शर्कराचलदानं
शिखरदानानि
त्रिबलदानं
हारिद्रहरकुबेरमूर्ति
दानंवायवीये
उमामाहेश्वरमूर्तिदा०
लक्ष्मीनारायणमूर्तिदानं
हरिहरमूर्तिदानं

सूर्यमूर्तिदान
गणपतिमूर्तिदानं
जगदंबिकादानं
सरस्वतिमूर्तिदान
शालग्रामदानं
शिवनाभिदानं
लिंगदानं
मारकतलिंगदा
काश्मीरलिंगघटदानं
शंखदानं
कालचक्रदा

अथमृत्यपरिहारंय
यममूर्तिदानंच
कालपुरुषदान
सर्वसपत्करदानं
कृष्णाजिनदानं
अथशय्यादानं
शयनदानं
कन्यापूदान
वस्त्रदानं
पीतवस्त्रदानं
रक्तवस्त्रदानं

नीलवस्त्रदानं
चित्रवस्त्रदानं
कृष्णवस्त्रदा
पट्टकूलदान
शतकर्पदा०
ऊर्णावस्त्रदा०
कंबलदानं
चित्रकंबलदा०
ताम्रपात्रदानं
सुवर्णपीत्सर्यताम्रं
पात्रदानं

कांस्यपात्रदा०
लोहपात्रदान
रौप्यपात्रदानं
सुवर्णपात्रदानं
स्थालीदानं
देवपुराणदानानि
चतुर्दशविद्यासा
पुस्तकदानं
रत्नदानं
नवरत्नानि
प्रवालदानं

दान०चं०वी० १६२

सोनांदारत्नयुक्तं
नागलक्ष्मणिदानं
कर्णभूषणदानं
कुंकुमदानं
हरिद्रादानं
सिंदूरदानमंत्र
कस्तूरीदानं
कर्पूरदानं
नानासुगंधद्रव्यादा०
देवस्योपरिगलंतिका
अथप्रपादानं

अग्निकाष्ठयुक्तमग्निह
त्रिग्निरक्तोपंचापरि
गोपरिचर्या
धर्मघटदानं
घटदानस्योद्यापनं
कलशदानं
यज्ञोपवीतदानं
वासूदानानि
पश्वोदानानि
अधिमासेदानं
अधिमासेत्रयस्त्रिं

घ्रादेवतानानानि
प्रातर्नित्यघृतपात्रछ
यादानं
अथसंक्रांतिदानानि
नानाधान्यदानानि
व्रीहितंदुलदानं
व्रीहिदानेथ
यवदानं
गोधूमदानं
मुद्गदानमंत्रः
माषदानमंत्रः

चणकदानं
कुलित्थादानं
तिलदानं
स्वर्णतिलदानं
धान्यदानं
सुवर्णतिलपात्रद
निष्पावदानं
श्यामाकदानं
कोद्रवदानं
लोकदानं
यावनालदानं १६२

मसूरिकादानं
अन्नदानानि
पायसदानं
ओदनदानं
दध्यन्नदानं
कृसरान्नदानं
नानारसदानं
सर्वान्नदानं
सक्तुदानं
शर्करादानं
गुडदानं

इक्षुदानं
मधुदानं
घृतदानं
तैलदानं
नवनीतदानं
क्षीरदानं
दधिदानं
पुष्पदानं
फलदानं
तक्रदानं
तांबूलदानं

पादुकादानं
उपानहदानं
छत्रदानं
चामरदानं
पत्रिकादानं
व्यजनदानं
दर्पणदानं
कूष्मांडदानं
हिमदानं
तिलपद्मदानं
मकरसंक्रांतौसौना

ग्पादिदानाविशेष मार
गोधूमपिष्टदानं ११७
सूर्यसंक्रांतौतंडुलदा
पायसफरितेकास
पासफलपुष्पकद
लीदानं
सौभाग्यद्रव्यपुत्र
पौत्रविशेषोध्य
उद्यापनं ११८
संकल्प
व्यतीपातेसुवर्णद
११९

बसंतेश्वत्थसेचनं
स्नयादिग्रहाणां दानं
नवग्रहप्रार्थनामंत्र
ग्रहदानं
सहस्त्रभोजनफलः
ऋषीवस्त्रनामानि
एकादशरुद्राः
द्वादशादित्याः
दशदिक्पतिनामा·
ऋषिसंख्या
समुद्राः

त्रलोकादि
सप्तनद्याः
त्रयोगुणाः
चत्वारोवेदाः
सहस्त्रभोजनहोः
ब्राह्मणभोजनः
दक्षिणा
पंचमहापातकी
सहस्त्रभोजनसंकल्पः
सर्वस्वदानं
तपदानचतुर्युगधर्माः

पांयस्थाश्रयमः धर्मः
दातालक्षणं
ब्राह्मणलक्षणं
घोरप्रतिग्रहाः
नानाप्रतिग्रहदोषापह
प्रायश्चित्तानिचगलपी
षोडशमहादानप्र
तिग्रहेप्रायश्चित्तं
रहस्यप्रायश्चित्तं
स्मृत्यर्थसारोक्तरहस्य

प्रायश्चित्तानि
गुडधेन्वादिव्राति
ग्रहप्रायश्चित्तं
स्नापर्वतप्रायश्चि·
रथप्रतिग्रहप्रा
राजाप्रतिग्रहप्रा·
प्रतिपदोक्तप्राय
श्चित्तं
गुरुतल्पकप्राय
श्चित्तं॥ ॥

ज्ञान॰चंद्री॰

१५५

422

१५५